MICRO FILM SERVICE.

Title of Manuscript. ABHINAVABHARATI, R.2478.
Vol I, Chapter I. No. of pages 44.

Date: 12-4-1957.

Photographed by:

"THE HINDU", MADRAS.

नाट्यशास्त्रव्याख्या
(अभिनवभारती)

by अभिनवगुप्ताचार्य



5

२७

545

9.29.23.
10 7/8 × 9 3/8

Vol I

" श्रीः "

" अभिनवभारती "

"भरतनाट्यशास्त्रव्याख्या "

" अभिनवगुप्तविरचिता "

यस्तन्मया ह्रदयसंवदनक्रमेण
द्राक्चित्रशक्तिगर्तभूमिविभागभागी ॥
हर्षोल्लसत्परविकारजुषः करोति
वन्दे तमान्तमहमिन्दुकलावतंसम् ॥
षड्विंशकात्मकजगद्गगनावभास-
संविन्मरीचिचयचुम्बितबिम्बशोभम्।
षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन्
वन्दे शिवं श्रुतितदर्थविवेकिधाम ॥
विश्वबीजप्ररोहार्थं मूलाधारतया स्थितम्।
सर्वशक्तिमयं वन्दे धरणीरूपमीश्वरम् ॥
सद्विप्रकोकवदनोदितनाट्यवेद-
तत्त्वार्थमर्थिजनवाञ्छितसिद्धिहेतोः।
माहेश्वराभिनवगुप्तपदप्रतिष्ठः
संक्षिप्तवृत्तिविधिना विशदीकरोति ॥
उपादेयस्य संपाठस्तदन्यस्यप्रतीकनम्।

स्फुट व्याख्या
व्याख्याविरोधानां परिहारः सुपूर्णता ॥
लक्ष्यानुसरणं श्लिष्टवक्तव्यांशविवेचनम् ॥
सङ्गतिः पौनरुक्त्यानां समाधानसमाकुलम् ॥

[illegible]

थवे [illegible]

नत [illegible]

(मूल [illegible]

दिः [illegible]

थिते [illegible]

नाट्ये [illegible] च नृत्त [illegible]

गुरुश्चेति नमस्कार्यौ । लक्ष्मीपतिस्तु यद्यपि वृत्तीनां निर्माता तथापि
पितामहादिवदसौ स्वकर्तव्यमात्रनिष्ठस्तथापि च नात्र नाट्ये लोकवदुप-
जीवित इति गुरुत्वाभावान्न नमस्कृतः । एतदपि नमस्कारहेतुनिरूपण-
प्रणामः कायादीनां प्रह्वीभावः वाचिकः शिरसेति दर्शितः
स्यानुचितत्वात् असत् । तिस्मात् प्रणमनं प्रह्वीभावः कायेन वाचा मनसा च आद्यः शिरसेति दर्शितः । द्वितीयो देवावित्यनेन प्रणम्यस्य निरूपपदनामग्रहणानौचित्यात् तेन प्रथमं देवावित्युक्तं अभिनेयप्राधान्यादाङ्गिकः शिरसेति वाचिकश्च देवावित्यादिना च वाक्याभिनयो दर्शितः ।
क्रमातः एता नाङ्गिकवाचिकाभिनयौ । लौक

लोकसिद्धो ह्ययमभिनयो न च नाट्यधर्मी । स्पर्शातुर इव भुजादावूर्ध्वादिभिन्न इत्यभिनेयोऽपि प्रदर्शनीय एव । मानसी तु प्रह्वता वाक्कायव्यापारगम्येति नासौ पृथगुक्ता संस्कारस्य पूर्वभवद्धो निपातनात् चरमसंस्कारस्य पितामहमहेश्वराविति क्रम आश्रितः । छेकानुप्रासपरिपोषेण सालङ्कारस्य वाक्याभिनयतां दर्शयितुं यद्वक्ष्यति चक्रीडितप्रभृतिभिः किंतैरक्षरैः शब्दैः युक्ता नाटकानि ललिता भरतप्रयोगा इति । सालङ्कारस्य च देवतापरितोषहेतुत्वं दर्शितं भवति । प्रजाः प्रतिहितैषित्वेन नाट्यप्रवर्तकत्वं कर्तव्यान्तरवैकल्येन पूर्णतायां च तद्गतत्वमिति नाम्नोरभिप्रायः । तत्र नाट्यस्य नटवृत्तस्य शास्त्रं शासनोपायं ग्रन्थं प्रवक्ष्यामीति नैकमित्यन्ये । नाट्यवेदो नाट्यशास्त्रमिति हि पर्यायौ । तत्र नाट्यशास्त्रशब्देन नेदिह ग्रन्थः तद्ग्रन्थस्येदानीं कारणं न तु प्रवचनं त . . . स्यं करणात् भिन्नं कठेन प्रोक्तमिति . . . वेदत्वे उत्पत्त्यादिपञ्चकस्य तद्ग्रन्थस्यान्यग्रन्थसाधारण्यात् प्रश्नासङ्गतिरुत्तरग्रन्थस्य चानुपपत्तिर्दुष्टया ॥ अयं च यद्भवेत् जग्राह पाद्यमृग्वेदादित्यादेः ग्रन्थः प्रत्यक्षगतत्वात् । तस्मान्नाट्यं च तच्छास्त्रं च नुत्पन्नप्रदत्वात् प्रवक्ष्यामि मारभ्यास्य नाट्याख्यं वेदं लक्षणतो निरूपयिष्य इत्यर्थः ।
एतदप्यमनोरमं । शब्दात्मतान्यतिरेकेण प्रवचनायोगान्नाट्यस्य चाशब्दात्मत्वात् निरूपणमात्रे च प्रवचने ग्रन्थस्यापि प्रवचनोपपत्तेः नाट्यस्य च प्रोच्यमानतयैवात्माह्णिकबाह्यस्वरूपनिरासलोके शास्त्रशब्दानर्थक्यप्रसङ्गात् यइमं शृणुयाल्लोके नाट्यवेदमिति शास्त्रान्ते यद्वक्ष्यते तस्यासङ्गत्यापत्तेः शब्दविषयतातिरेकेण शृणुयादित्यस्यावाचकत्वात् [तस्मादित्थमेतदिति

स्फुट व्याख्या

स्वव्याख्याविरोधानां परिहारः सुपूर्णता ॥
लक्ष्यानुसरणं क्लिष्टवाक्यांशविवेचनम् ॥
सङ्गतिः पौनरुक्त्यानां समाधानसमाकुलम् ॥
सङ्ग्रहश्चेत्ययं व्याख्याप्रकारोऽत्र समाश्रितः ॥

(णी)
भरतमुनिरुचितदेवतानमस्कारपूर्वकं अभिधेय गुणी-
भावेन प्रयोजनं मुख्यवृत्त्या प्रतिजानानो विशेषणद्वारेण गुरुपूर्वक्रमं दर्शयि-
त्ततया चाभिधेयप्रयोजनतत्संबन्धान्दर्शयति-

(मूलम्) प्रणम्य शिरसा देवौ पितामहमहेश्वरौ
नाट्यशास्त्रं प्रवक्ष्यामि ब्रह्मणा यदुदाहृतम् ॥

पितामहोऽत्र न पितुः पिता महेश्वरश्च न राजादि-
रिति देवशब्दः। एतच्च नाशङ्कनीयम्। प्रसिद्धेः। राको विजिगीषुर्नाट्यप्रवर्त-
यितेति देवो भगवांस्त्वानन्दनिर्भरतया क्रीडाशीलः सन्ध्यादौ नृत्यतीति
नाट्ये तदुपस्कारिणि च नृत्ते तदुपज्ञं प्रवृत्तिरिति तावेवात्र अधिदैवतं
गुरू चेति नमस्कार्यौ। लक्ष्मीपतिस्तु यद्यपि वृत्तीनां निर्माता तथापि
पितामहादिवदसौ स्वकर्तव्यमात्रनिष्ठस्तथापि च नात्र नाट्ये लोकवदुप-
जीवित इति गुरुत्वाभावान्न नमस्कृतः। एतदपि नमस्कारहेतुनिरूपण-
प्रणामः कायवाङ्मनोभिः प्रह्वीभावः वाचिकः शिरसेति दर्शितः
स्यानुचितत्वात् अस्मत्। तस्मात् प्रणमनं प्रह्वीभावः कायेन वाचाम-
नसा च आद्यः शिरसेति दर्शितः। द्वितीयो देवावित्यनेन प्रणम्यस्य निरू-
पपदनामग्रहणानौचित्यात् तेन प्रथमं देवावित्युक्तं अभिनयप्राधान्याच्चा-
ङ्गिकः शिरसेति वाचिकश्च देवावित्यादिना च वाक्याभिनयो दर्शितः।
क्रमात् एतानाङ्गिकवाचिकाभिनयौ। लोक

लोकसिद्धो ह्ययमभिनयो नच नाट्यधर्मी। रूपकेष्वनुराग इव भुजादावूर्ध्वा-
दिभिन्न इत्यनभिनेयोऽपि प्रदर्शनीय एव। मानसी तु प्रह्वता वाक्कायव्यापा-
रगम्येति नासौ पृथगुक्ता। संस्कारस्य पूर्वभवत्वे निपातनात् चरमसंस्कार-

पितामहमहेश्वराविति क्रमः छेकानुप्रासार्थः। सालङ्कारस्य च वाक्या-
भिनयतां दर्शयितुं सालङ्कारस्य देवतापरितोषहेतुत्वं च दर्शयितुं
पितामहमहेश्वरावित्यनेन देवयोर्लौकिकहितैषित्वमुक्रमम्। नाट्यशा-
स्त्रमिति। नाट्यस्य नटवृत्तस्य शास्त्रं शासनोपायग्रन्थमिति।
नैतदित्यन्ये। नाट्यवेदो नाट्यशास्त्रमिति हि पर्यायौ। तत्र नाट्य-
शास्त्रशब्देन चेदिह ग्रन्थस्येदानीं करणं न तु प्रवचनं, तद्धि व्याख्यानरूपं
करणाद्भिन्नं कथं प्रोक्तमिति यथा। ग्रन्थस्य च नाट्यवेदत्वे उत्पन्ना-
दिपञ्चकस्य तदेतस्यान्यग्रन्थसाधारण्यात् प्रश्नासङ्गतिः उत्तरग्रन्थ-
ग्रन्थं प्रत्यसङ्गतत्वात्। तस्मान्नाट्यं च तत् शास्त्रं च व्युत्पत्तिप्रदत्वात्
तत् वक्ष्यामि व्याख्यास्ये नाट्याख्यं लक्षणतो निरूपयिष्य इत्यर्थः

ऋग्वेदादित्यादेः ग्रन्थां प्रत्यसङ्गतत्वात्। तस्मान्नाट्यं च तच्छास्त्रं च व्युत्पत्ति-
प्रदत्वात् प्रवक्ष्यामि व्याख्यास्ये नाट्याख्यं वेदं लक्षणतो निरूपयिष्य इत्यर्थः।
एतदप्यमनोरमं। शब्दात्मतातिरेकेण प्रवचनायोगान्नाट्यस्य चाशब्दात्म-
कत्वात् निरूपणमात्रे च प्रवचने ग्रन्थस्यापि प्रवचनोपपत्तेः नाट्यस्य च
प्रोच्यमानतयैवाल्पगाह्लणिकबाह्यस्वरूपनिरासत्वात् वा नानयैव प्रसङ्गात्
यइमं शृणुयान्नोक्तं नाट्यवेदमिति शास्त्रान्ते वक्ष्यते तस्यासङ्गत्यापत्तेः
शब्दविषयतातिरेकेण शृणुयादित्यस्यावाचकत्वात् तस्मादित्थमेतदिति

मञ्जुरवः सकलहितकरणप्रवृत्तेः उत्साहसंपदोपेतस्तदभिवृद्धये तत्रान्यूहापसिसारयिषया स्वविज्ञानक्रमोपारूढगुरुकरुपवर्गसर्वोथिपीत परमेश्वराविषयां स्मृत्यौत्सुक्यधृतिमत्यादि लक्षणां व्यभिचारसरणीं वाहाकरणीयविषयेतौ च जडतावहित्थप्रभृतिभावगणं पुरस्सरीकृत्य धर्मवीरानुप्रविष्टस्तदुचिताङ्गिकवाचिकानुभावप्रकरणपूर्वं स्वप्रवृत्तिप्रयोजनमेव निरूपयति। प्रयोजनस्यैव प्रवर्तकत्वात्। यदाहुः = यमधिकृत्य प्रवर्तते तत्प्रयोजनमिति। तत्र नाट्यं नाम लौकिकपदार्थव्यतिरिक्तं तदनुकारप्रतिबिम्बालेख्यसादृश्याध्यवसायोत्प्रेक्षास्वप्नमायेन्द्रजालादिविलक्षणं तत् ग्राहकस्य सम्यग्ज्ञानभ्रान्तिसंशयानवधारणानध्यवसायविज्ञानभिन्नवृत्तान्तास्वादनरूपसंवेदनसंवेद्यं वस्तुरससम्भावेति वक्ष्यामः। तस्य शास्त्रं शासनं बाह्यमाण्डुनाट्यादिवैलक्षण्येन सम्यक् तत्त्वरूपावगमोपायं प्रकर्षेण परब्रह्मशिष्योदीरितो नुप्रयोगिविकासत्वाभावधानेन वक्ष्यामि यद्वदयति॥ य इमं शृणुयाल्लोके नाट्यवेदं स्वयंभुवा कुर्यात् प्रयोगं यश्चैनं तथाधीतवान्नरः। कुर्वीत्प्रयोगं यश्चैवं

याग तिर्वेदविदुषां यागतिर्यज्ञवेदिनाम्

या गतिर्दानशीलानां तां गतिं प्राप्नुयात्तु सः॥ इति॥

begin एतेन कामजो दशको गुणः इति वर्जनीयत्वेन नाट्यस्यानुपादेयतेति यत्केचिदाशङ्किरे। तदयुक्तीकृतम्। याज्ञवल्क्यस्मृतिपुराणादौ चास्य प्रशंसानुश्रवणात्। न चागमादृते धर्मोऽनुमानगम्य इति न्यायात्। एतत्तु वृथैवास्थानशीलप्रीति शङ्काशमनार्थं अभिधीयते नाम। तथाहि = नटनाट्यं तावदेतत् स्वधर्माम्नायरूपतयानुष्ठेयमेव। न चास्माकं यच्चेष्टितं विचार्यं सोमक्रयो-

पदेशिनो विधिवाक्यस्य न तत् विक्रयिब्राह्मणान्तरगतकृत्याकृत्यविचारणोपयोगी युक्तः न विचारणोद्योगो युक्तः। न चाप्यस्योपदिश्यते गायेन्नृत्येदिति किंतु प्रथमनाट्यावसरक्रमप्रवृत्तविरिञ्चिवचनप्रवर्तकभरतमुनिशासनानुपपत्तिशिष्यपरम्परापरिचयागताद्यतनकालावधिमहानटजनस्वकप्रवृत्तिविशेषोपदेशपरमतद्गतसिद्धिसंपत्तिसदुपायोपदेशनपरमिदं शास्त्रमिति नटस्य तावन्नानेन किंचिदुपदिश्यते। तत्रात्तुपकारादृते कवेरपि स्वहृदयायतनसततोदितप्रतिभाभिधानपरवाग्देवतानुग्रहोत्थित विचित्रापूर्वनिर्माणशक्तिशालिनः प्रजापतेरिवाकामजनितजगतः परं प्रत्याशङ्का यदि परमत्रावशिष्यते व्युत्पाद्यो वराकस्तस्यापि तु नेह गायेन्नृत्येत् वादयेत् तन्निरतो वा भवेदित्युपदेशः क्रियते। पितुः स्वरसत एव तावन्मनोज्ञविषयास्वादप्रवृत्तस्यात एव वेदशास्त्रपुराणादिविमुखः श्रीकृष्णद्वयस्य तन्मनोज्ञवस्तुमध्ये तद्वृगिदं वस्त्वनुप्रवेशितं यद्वशादेव पुमर्थोपायावगतिं करोतीति वक्ष्यामः। उत्पत्त्यादिप्रश्नास्तु ये भविष्यन्ति ते नाट्याख्यवेदविषया न तु नाट्यवेदशास्त्रविषयाः यतो नाट्यवेदः कथं ब्रह्मन्नित्यत्र नाट्यमेव वेदमिति व्याख्यास्यामः। एतच्च नाट्यवेदशास्त्रं ब्रह्मणा उदाहृतं मह्यमुक्तम्। यद्वक्ष्यते ब्रह्मणापितो विदित्वाहं नाट्यवेदं पितामहात्/पुत्रानध्यापयामासेति। अत्र तु नाट्यस्य वेदः शास्त्रमिति समासोऽन्यथाध्यापनासंभवात्। तेन ब्रह्मप्रोक्तमेव मया यथा परिपाटि निरूप्यत इति यावत्। नाट्यं च ब्रह्मणोद्धृत्योक्तं वेदाङ्गानि अधीतमिति तद्विषयं शास्त्रमप्युदाहृतमिति उक्तम्॥

यदि हि नाट्यस्य वेदनं सत्तालाभो विचारश्च यत्र तन्नाट्यवेदशब्देन

नाट्याश्रयत्वं दशरूपकत्वमित्युच्यते यद्दृश्यति इतिहासो मया दृष्टः इति
अत्र पद्ये ब्रह्मणा उदाहृतं प्रदर्शितोदाहरणं कृतं निदर्शनमित्यर्थः। अन्ये
तु नटनीयमनुकरणं दशरूपकमेव नाट्यं तस्येदं शास्त्रं दशरूपकलक्षण-
मेवं हीदं। एवं दशरूपकं कविना कार्यमेवं च नटनीयमिति ग्रन्थतात्पर्यम्र-
सादीनां पदार्थानां तत्रैव पर्यवसानात्तच्च ब्रह्मणा उदाहृतं प्रदर्शितोदाहरणं
कृतनिदर्शनमित्यर्थः। अन्येतु नटनीयमनुकरणं दशरूपकमेव नाट्यं
तस्येदं शास्त्रं दशरूपकलक्षणमेव हीदम्। एवं दशरूपकं कविना कार्यमेवं
च नटनीयमिति ग्रन्थकार तात्पर्यं रसादीनां पदार्थानां तत्रैव पर्यवसानात्
तच्च ब्रह्मणा उदाहृतं कृतनिदर्शनं। अन्येतु ब्रह्मणा वेदाख्येन भगवता
शब्दराशिना उदाहृतं निरूपितं त्याज्यानुष्ठेयरूपं अथवा गच्छत्युत्पाद्य-
तया स्वीकुर्वन्शास्त्रं वक्ष्यामीति प्रयोजनप्रयोजनमनेनैव स्वीकृतमि-
त्याहुः। नायकस्तु ब्रह्मणा परमात्मना यदुदाहृतं अविद्याविरचित-
निस्सारभेदग्रहे यदुदाहरणीकृतं तन्नाट्यलक्ष्यामि यथाहि कल्पना-
मात्रसारन्तत एवानवस्थितैकरूपं क्षणेन कल्पनाशक सहस्रसहंस्वप्ना-
दिविलक्षणमपि सुष्ठुतरां हृदयग्रहनिदानमत्यक्रमणलौकिकब्रह्मकल्प-
नटोपरचितं समरावणादिचेष्टितं असत्यं कुतोऽप्यकृतात् कृत्वा...ति
तथाभासमानमपि पुमर्थोपदेशोपायतामिति। तथा तादृगेव विश्वमिद-
मसत्यनामरूपप्रपञ्चात्मकमथ च श्रवणमननादिवशेन परपुमर्थप्राप-
कमिति लोकोत्तरपरपुरुषार्थसूचनेन शान्तरसोपक्षेपोऽयं भविष्यति।
स्वंस्वं निमित्तमासाद्य शान्तमुत्पद्यते रस इति। तदनेन पारमार्थिकामप्र-

योजनमुक्तमिति व्याख्यानं दशरूपके पर्यग्रहीत। यदाह,—

नमस्त्रैलोक्यनिर्माणकवये शम्भवे यतः।
प्रतिक्षणं जगन्नाट्यप्रयोगरसिको जनः इति॥

एवं नाट्यशास्त्रप्रवचने प्रयोजनं [तत्प्रयोजनन्तु दर्शितमेव] अभिधेयश्च
नाट्यवेदः व्युत्पाद्यव्युत्पादकलक्षणश्च संबन्धः [यं च शास्त्रार्थी योजिता-
सते स तावत्तदवसरे तच्छास्त्रप्रणेतरि प्रसिद्धे सिद्धवदेव प्रामाण्यमभि-
मन्यत इति तद्वचनोक्तात्संबन्धाभिधेयप्रयोजना तदेव निर्विशङ्कः प्रवर्तते।
8 परस्त्वधिगतसकलशास्त्रार्थो बहुमन्यते समाप्तजप्यमित्यादिना श्लोकद्व-
येन॥

(मूलम्) समाप्तजप्यं व्रतिनं स्वसुतैः परिवारितम्।
अनध्याये कदाचित्तं भरतं नाट्यकोविदम्॥
मुनयः पर्युपास्यैनं आत्रेयप्रमुखाः पुरा।
पप्रच्छुस्ते महात्मानो नियतेन्द्रियबुद्धयः॥

अरागित्वं [नाट्यवेदयोग्यता नाट्यस्यादृष्टविनोदहेतुतासुज्ञा-
नत्वं प्रश्नावसरलाभयोगः प्रसिद्धत्वं चाचार्ययोग्यता शिष्टप्रमाणिकत्वनिय-
मपूर्वशास्त्रग्रहणं प्रसिद्धादरणानुमेयोपादेयत्वप्रकटनमनिदंप्राथम्यप्रवक्ता
शिष्याणामूहापोहपाटवग्रहणयोग्यता चेति क्रमेण पदानां तात्पर्यमपुनरु-
क्तम्। किं पप्रच्छुरिति दर्शयति —

(मूलम्) योऽयं भगवता सम्यक् कथितो वेदसंमितः।
नाट्यवेदः कथं ब्रह्मन् उत्पन्नः कस्य वा कृते॥

कत्यङ्ग॰ किंप्रमाणश्च प्रयोगश्चास्य कीदृशः।
सर्वमेतद्यथा तत्त्वं भगवन्वक्तुमर्हसि ॥

भगवता तत्रभवता गुरुणा इति भरतमुनिरेवैवमुक्तः तेन भरतमुनिना योऽग्रथितः सुन्दरतमवस्तुसमाहरणयोजनयाऽऽहितः कोऽप्ययं वस्तुविशेषः स तावत्प्रयोगसमयेऽस्माभिः दृष्ट इति प्रत्यक्षत्वेन अयमिति परामर्शः। अविदितान्तस्सारतया चास्माकं प्रत्यक्षोऽप्यप्रत्यक्षकल्प इति यच्छब्देनानिर्वाच्यविशेषत्वमुक्तम्। अत एव तच्छब्दसङ्गतिरत्र नमृग्यते। यथायत्किंचित् वदतीति सन्धायं परीक्षणीयतत्त्वोयंत्रावेदैः संमितस्तुल्यस्तथाहि धीरोदात्तधीरललितधीरोद्धतधीरप्रशान्तानां दुर्णोपायप्रवृत्तत्वेन नायकानां तदुपाश्रयाश्रयेण प्रतिनायकानां चरितं सफलत्वाफलत्वेन साक्षात्क्रियमाणं वीराद्भुताख्यं वीरशृङ्गारहास्यैः वीररौद्रभयानककरुणैर्वा बीभत्सशान्तैश्च प्रतिनायकगतरसान्तरसान्तरतया सातिशयचमत्कारगोचरीभूतैः हृदयानुप्रवेशं विदधत् धर्मादिचतुष्कोपायोपादेयधियमधर्मादिकस्य च निवृत्तिबुद्धिर्निर्विशङ्कं विधत्त इत्यस्माकं अधिगतश्रुतितत्त्वानामपि प्रत्यक्षसिद्धमेवैतत्। प्रसिद्धा चास्य नाट्यवेदसंज्ञा विदितात्मत एवोपदेशहेतुत्वाद्वेदः। एवं च जिज्ञास्यतत्त्व एवायं कथमुत्पन्नः तेन प्रयोजनप्रकारेणोत्पन्नात्तत्प्रयोजनस्य वेदस्य एव सिद्धेः उत्पन्न इति यदि पूर्ववदेव वेदवदपार्थस्य तत्तत्कथमेनं पर्यनुयुञ्जीत श्रुतिचतुष्टयवदेवेत्यर्थः। अथ यस्य वेदेष्वो नोपदेशः सिद्धः स कस्माद्गित्याह- कस्याधिकारिणः कृते प्रयोजनकरणाय किं वेदाधिकृत एवात्राधिकारी

उत तदन्योऽपीत्यधिकारिविषयोऽयं प्रश्नः पूर्वस्तु सिद्धसाध्यतया निश्चयोत्पादनत्वेनाक्षेपाय प्रश्नः कत्यङ्ग इति यद्यस्य सुबहून्यङ्गानि तदवधारणं तया अङ्गवाक्यनिर्णयः तथा परिदृश्यमानगीतातोद्याभिनयादिमध्ये कति अस्याङ्गानि। किं च तदङ्गिरूपं उताङ्गसमुदायमात्रं नाट्यमिति तृतीयः प्रश्नः किं प्रमाणश्चेति।

द्वे नाट्य

ननु प्रत्यक्षप्रमाणसिद्धत्वं तावत् नाट्यस्य यद्वक्ष्यति दृश्यं श्रव्यं च यदिति श्रेयःप्राप्त्युपायज्ञापकत्वमपि मुनीनां स्वसंवेदनसिद्धम्। अन्यथा तु क्वचार्यत्वमेवास्य न स्यादित्युक्तम्। ततोऽयं प्रश्नः सत्यं, किन्तु यान्यङ्गानि कानिचित्तानि यदि विज्ञेयानि केन प्रमाणेन किमङ्गं ज्ञायते तेन किं प्रमाणोऽङ्ग इति तथा तेन प्रमाणेनांशांशिभावनियमोऽत्रेयः। प्रमाणमत्र निश्चयजनकम्। अन्ये तु नाट्यशास्त्राणां रूपकादीनां पाठ्याभिनयरसगीतानां च किं प्रमाणं कासंख्येति विभागविषयोऽयं प्रश्न इत्याचक्षते। अस्येति। नाट्यस्य कीदृक्प्रयोगः। यदि युगपदङ्गानि प्रयुज्यन्ते तद्भिन्नाकारत्वेषु युगपत्संवेदनाभावात् कथमेकं नाट्यमिति प्रतिपत्तिः प्रयोगेऽपि नितराम्। तस्मात् कथं प्रयोग इति। तथा किं नियतेनैवाङ्गाङ्गिभावेन प्रयोग उतानियतेनेति नाट्याङ्गप्रयोगद्वारेण समाप्त्याभिनयचित्राभिनयनाटकादिरूपकवैचित्र्यविषयः प्रश्नः पञ्चमः। एवं प्रश्नपञ्चकात् कविप्रयोक्तृ उपदेशपरं शास्त्रमिति लक्ष्यते। तेन यदाह तस्मात् कर्तृदृष्टः प्रयोक्तुरुपदेशपरमिदं शास्त्रमिति तत्र द्रष्टुरित्यसत्। न ह्यनेन सामाजिकोपदेशो दीयते। अयोग्यत्वाच्छ्रुतिस्मृतीतिहासादिष्विवात्रापि न च तदुपदेशोऽत्र श्रूयते।

दृष्टा तु यदि प्रेक्षाप्रवर्तक उच्यते, तदा तस्यापि न प्रबन्धेनोपदेशोऽपि तु
क्वचिदेव नर्तकोऽर्थपतिर्विटीत्यादौ। एवं चोपदेश्यत्वे स्थपतिमात्ताकारप्रकृ-
ति विश्वमपीहोपदेश्यं स्यादित्युक्तमनेन] यथातत्त्वमिति नात्र क्रमं प्रतिभरो
अस्माकं नापीयत्तां प्रति अज्ञा हि वयमत्र प्रष्टारः, अत एवोपेयपरत्वेनैव
मुख्यतया प्रश्नो यथा बालक आह दुःखं मे शमयेति। तद्वदुपायं प्रश्नयति
कुतोऽस्मत्कं लभ्यतइति। तेनोपेयमुखेन प्रवृत्तमिदं शास्त्रं उत्तरदानोपनिरत-
वस्तूपेयप्रश्नक्रमेण तदुपेयोपायादि प्रबन्धेन स्थितमिति मन्तव्यम्। तेन
यादृशाक्रमेण ...... रूपयोग्यं तथापि अप्रश्नितमपि यदि किञ्चिदस्ति
तदपि स्वयमेव निरूपयेति तत्त्वानतिक्रमेण तत्त्वयोग्यं तत्त्वं च निरूपणीय-
मिति एतदिति [लक्षणपरीक्षापर्यन्तमेतत्। यदि त एवं पप्रच्छुः॥

भरतोमुनिः किमकार्षीदित्याह=

(मू) तेषान्तद्वचनं श्रुत्वा मुनीनां भरतो मुनिः।
प्रत्युवाच ततो वाक्यं नाट्यवेदकथां प्रति॥

तुरवधारणे॥ श्रुत्वैव न तु विलम्ब्येति, न तु पौर्वकाल्यमात्रं लक्ष्य-
तेर्विधानात्। तत इति यतः स तत्त्वविन्मुनिस्ते च तदुपदेशयोग्याः, तस्माच्छ्रोतो
कथाग्रहणं यथा तत्त्वमित्येकस्यैवार्थं स्फुटीकरोति। प्रयोगप्रश्ने प्रत्यक्षेण
प्रयोगप्रश्नेन प्रत्यक्षेण प्रयोगप्रकटनमुत्तरं स्यादित्याशङ्कां परिहर्तुं, कथा-
ग्रहणमिति त्वसत्। वक्तुमर्हसीत्युक्ते तस्याः कोऽवसरः। एवं भरतमुनिः पर-
वदात्मानमप्रकल्पयन्तं ग्रन्थमभिहितवान्। अन्ये त्वियन्तं ग्रन्थं कश्चि-
च्छिष्यो व्यरीरचत्। तत्र ब्रह्मणेति भरतमुनिः प्रथमश्लोके निर्दिष्टः कथं

ब्रह्मण्युत्पन्न इत्येतच्चैवमेव वाक्यत्वेन निर्वहति तदनन्तरन्तु भवद्भिः शुचि-
भिरित्यादिर्भरतमुनिरचितो ग्रन्थो मध्येऽत्र षट्त्रिंशदध्यायानि प्रश्नप्रतिवच-
नयोजनवचनानि तानि तच्छिष्यवचनान्येवेत्याहुः। तच्चासत्॥ एकस्यग्रन्थ-
स्यानेकवक्तृवचनसन्दर्भमयत्वे प्रमाणाभावात् स्वपरव्यवहारेण पूर्वपक्षोत्तर-
पक्षादीनां श्रुतिस्मृतिव्याकरणतर्कादिशास्त्रेष्वेकविरचितेष्वपि दर्शनात् [एतेन
सदाशिवब्रह्मभरतमतत्रयविवेचनेन ब्रह्ममतसारताः प्रतिपादनायामत्र त्रयी-
सारासारविवेचनं तद्ग्रन्थखण्डखण्डप्रक्षेपेण विहितमिदं शास्त्रं न तु मुनि-
विरचितमिति यदाहुर्नास्तिकधुर्या ननु मुनिविरचितमिति यदाहुर्नास्तिकधुर्यो-
पाध्यायाः, तत्प्रत्युक्तम्। सर्वानपह्नवनीयाबाधितशाब्दलोकप्रसिद्धिविरोधाच्च॥]
अत्र केचिदाहुः। प्रश्नपञ्चकमत्रैवाध्याये तावन्निर्णीयते। उद्देशस्थित्या तद्वि-
भागलक्षणपरीक्षापराणि चाध्यायान्तराणीति॥ अन्ये त्वाहुः। पञ्चभिरध्यायैः
पूर्वरङ्गविधानपर्यन्तैः प्रश्नद्वयं निर्णीतम्। सामान्याभिनयचित्राभिनयान्तैः
शिष्टैस्तु प्रश्नत्रयमिति॥

वयन्तु ब्रूमः= नात्र क्रमः कश्चित्। अपि तु यथा-
वसरं मुहुः वाक्यात्मना षट्सहस्रीरूपेण प्रधानतया प्रश्नपञ्चकनिरूपणपरेण
शास्त्रेण तत्त्वं निर्णीयते। न तु क्रमः कश्चित्। एतच्च ग्रन्थव्याख्यानप्रसङ्ग एव
स्फुटीकरिष्यामः। तत्र कथं कस्य वेत्यमुमर्थं निर्णिनीषुराह =

(भवद्भिः शुचिभिर्भूत्वा तथावहितमानसैः।
श्रूयतां नाट्यवेदस्य संक्षेपो ब्रह्मनिर्मितः॥

घटादीनामुत्पत्तिर्व्यवहारसिद्ध्यैव। कुलालादिभिरनुगम्यतइति

(ज्ञाते) तस्य

घटः कियद्युक्तं नत्वेवं नाट्यस्य तदुत्पत्तिरेव विरिञ्चोपज्ञतया स्थितेति संभ-
वो ब्रह्मनिर्मित इत्युक्तम्। केचिदत्रानादित्वं वेदवन्नाट्यस्याचक्षाणाः उत्पत्त्यादि-
शब्दान् स्मरणाभिव्यञ्जनादावुपचरन्ति। तत्र संभूते कारणमुखेनाभिधाने
कर्तव्ये कालस्य सर्वत्र पूर्वकारणत्वात् उचितकालपरिग्रहेण तद्विधाधिकारि-
विषयतान्दर्शयितुमाह-

(मू) पूर्वं कृतयुगे विप्रा वृत्ते स्वायम्भुवेऽन्तरे ॥
त्रेतायुगे संप्रवृत्ते मनोर्वैवस्वतस्य च ॥
ग्राम्यधर्मे प्रवृत्ते तु कामलोभवशं गते।
ईर्ष्याक्रोधादिसंमूढे लोके सुखितदुःखिते ॥
देवदानवगान्धर्वैः रक्षोयक्षमहोरगैः।
जम्बुद्वीपे समाक्रान्ते लोकपालप्रतिष्ठिते ॥
महेन्द्रप्रमुखैर्देवैः उक्तः किल पितामहः।
क्रीडनीयकमिच्छामो दृश्यं श्राव्यं च यद्भवेत् ॥
न वेदव्यवहारोऽयं संश्राव्यः शूद्रजातिषु।
तस्मात्सृजापरं वेदं पञ्चमं सार्ववर्णिकम् ॥)

पूर्वं कृतयुग इत्यादि श्लोकपञ्चकं अस्मिन्नवसरे पितामहो
देवैरिदमुक्त इति महावाक्यस्य सङ्गतिः। कस्मिन्नवसरे पूर्वमिति नास्मिन्नेव कल्पे
अपितु पूर्वकल्पेष्वपीत्यर्थः। मन्वन्तराणि चतुर्दश तावत् कल्पोऽयं तद्ब्राह्मं दिनम्।
तत्र स्वायंभुवं नाम यत्कल्पस्य प्रथममन्वन्तरं वैवस्वतमन्वन्तरन्तु सप्तमं यत्र
अद्य वर्तामहे तत्र सर्वेष्वेव मन्वन्तरेषु त्रेतावसरे ब्रह्मणा नाट्यवेदः प्रवर्तितः।

कृतयुगे तु नेति तात्पर्यम्। योजनान्तु स्वायम्भुवे आद्ये मन्वन्तरे यत्कृतयुग-
न्तस्मिन् विवृत्ते त्रेतायुगन्तस्मिन् स्फुटतरे प्रवृत्तेन केवलं
तत्रैव मन्वन्तरे, तुशब्दो यावच्छब्दार्थे यावद्वैवस्वतस्य मनोः अन्तरे समये य-
त्त्रेतायुगं तस्मिन्प्रवृत्तेऽपि तेन आद्यान्तनिरूपणेन सर्वेषामुभयमन्वन्तराणां सङ्ग्र-
हः। तेन सर्वेषु त्रेतायुगेषु नाट्यप्रवृत्तिरित्युक्तं भवति। अस्मिन्नवसरे किमसा-
वुक्तः आह- जम्बुद्वीपे कर्मभूमिस्थाने यो लोकः सुखितो दुःखितश्च तद्विष-
यं क्रीडनीयकं क्रीड्यते चित्तं विक्षिप्यते विनीयते येन तदिच्छामः। करणीकृत्यो
बाहुलकात् चित्तं च इतोऽमुतश्च नीयमानमार्गेऽपि नियोज्यते। यदिवा क्रीडनाय
हितं क्रीडनीयम्। उभयत्राज्ञातार्थे कः इदमस्माकं गुडप्रच्छन्नकं औषधकल्पं
चित्तविक्षेपमात्रफलमिति यन्न ज्ञायते तच्च क्रीडनीयकम्। सुखितदुःखित एकान्ति।
न ह्येकान्तसुखिते काले देवो वा क्रीडया किंचिन्नाप्येकान्तदुःखिते तेन कृतयुगे
प्रान्ते इलावृतादिनिवासिनि जने नारके वा न क्रीडोपपत्तिः। उत्तरपदार्थप्रधाने
नरनात्पुरुषो दुःखस्य बाहुल्यमाह- कथं ज्ञायते सुखितदुःखितो लोक इति यतईर्ष्या-
क्रोधादिभिः संमूढेऽधिवासितहृदये। आदिग्रहणादनुरागतृष्णादिभिः। तत्र
क्रमेण कारणमाह- कामवशागतत्वादीर्ष्यादयो राज्यलोभादिना क्रोधादयः। हेतुग्राम्यधर्म प्रवर्तकत्वम्।
किमित्यधिकेन कामलोभौ यतो ग्राम्योऽश्रुतवास्त्वार्थजनाकीर्णदेशोचितो
धर्मः स्वधर्माननुपालनलक्षणस्तद्विषये यतोऽसौ लोकः प्रवृत्तः। नन्वेवं
स्वधर्मबाहुल्यात् सुखमेषां कुत इत्याह- दैवैः श्रीमद्विजयाविमुक्तादिरुद्रावता-
रैः तथा राजसतामसहृदयजनकल्प्यमानसपर्याकैः दानवादिभिः आक्रान्ते
जम्बुद्वीपे देवादिभिस्त्वाक्रान्ते स्वस्ववीर्यक्रियमाणेन सत्त्वविशुद्ध्यामिश्र-

धर्मसाधनेषु कथं धर्मस्तेषां तत्र प्रवर्तमानत्वात् सत्यम् । किन्तु लोकपालैः
लोकपालांशसंभूत विभाग समुत्पादितै र्नरपतिभिः प्रतिष्ठिते स्वधर्मसाधनेप्रति
नियोजिते लोके दृश्यं श्रव्यं चेति दृष्टुं श्रोतुं चार्हं पाधर्मसाधनं शास्त्रं च न तु सुखि
दुःखप्रायं लोक इत्येकवचनेन सर्वसाधारणतयैव लोगं तच्च स्पृश्यादिरूपं
न भवति । दृश्यश्रव्ययोस्तु बहुतरसाधारण्योपपत्तिः असाधारणे चेष्टाक्रिया-
दय एव प्रवर्तन्ते । एतदुक्तं भवति । कृतयुगे सत्त्वप्रधाने स्वधर्ममात्रनिष्ठा लोका
न सुखदुःखे प्रतिहेयोपादेयधिया प्रयास्यति । त्रेतायान्तु रजः सत्वात् दुःखं
जिहासति । सुखं च प्रेप्सते रजसश्चलत्वात् तदासौ शास्त्रेषु रजसिय-
त्नणया प्रवर्तते । तत्र च तादृगुपायो निरूप्यो येन स्वयमेषां भवति प्रवृत्तिः ।
तच्च नाट्यमेवेति चकारेणेदमाह । तादृशा केन चिदुपायेन संबन्धसात्कृते
येन भिन्नेन्द्रियग्राह्ये अपि दृश्यश्रव्ये एकानुसन्धानविषयत्वं न विभिद्येत इति
सामान्याभिनयकालप्राणत्वं प्रयोगस्य सूचितं दृश्यमिति हृद्यं श्रव्यमिति व्युत्पत्ति-
प्रदमिति प्रीतिव्युत्पत्तिदमित्यर्थः । इत्यनेन तिलकादीनां क एतावता स्वार्थः
इत्यत आह लोकपालानां प्रतिष्ठितं यतो जम्बूद्वीपगतात् लोकात् तेहि स्वधर्मावस्थ-
नादस्थादिना साकमाप्याययन्ति । अत एव कुहामइति सर्वेषामेकमत्यमाह - अन्यो-
न्योपकारवृत्त्या च देवमानुषसर्गौ चित्यनुरूपितो विन्ध्यवासिप्रभृतिभिः अन्तो
नुस्व प्रयोजनमेव क्रीडामहेन्द्रादीनामित्याहुः त्रेतायुगे प्रवृत्ते एवंभूतेच लोके
इत्यनेनेदमुक्तम् । सर्गोऽपिहि मानुषगताराजसधर्माभिसंबन्धचित्रितयागादि-
योगसरजसीकृतहृदयवादिवाविक्रीडनीयकर्माभिलाषुमिति एवं शास्त्राद्बहि-
तोऽपिजनो नाट्येन सुखं विनीयत इति प्रयोजनप्रयोजनमुक्तं प्रयोजनान्तर-

मप्याह - नवेदव्यवहार इत्यादिना । कृतयुगे सत्त्वोत्कर्षबलादेव स्वधर्ममनुपाल-
यति । अन्यत्वे तु राजसत्वात् शूद्रप्रकाराः करणादिजातीयाः सर्वे स्वगर्वा-
क्रान्ता वर्णत्रयानुवृत्तिं न विदधति शास्त्रं भवद्भ एकमादिशतीति च ते
वचनमात्रेण नादीयन्ते न च ते विदशास्त्रोपदेशयोग्याः । अत एवाह साम्य-
गिहस्थाने भुत्वा भवतामेतदुपदिष्टमिति न श्राव्याः सर्वे वर्णाः प्रयोजनं
विनेयत्वेन यस्येत्यनेन पूर्वोक्तस्याधुनोक्तस्य च समस्तस्योपसंहारः । अ-
न्येतु पौनरुक्त्यं परिहर्तुमाहुः । सर्वेषां वर्णानां सरससुकुमारेण नयेन
स्वकर्तव्यनिरूपणं यत्र काव्ये तस्मिन् भवता दाश्रितं येन सर्वो जनः सर-
ससुकुमारानुरज्यदाशयस्तदुपभोगनान्तरीयकतयैव कार्याकार्यज्ञानमप्यु-
पयुङ्क्ते क्षीरमध्यावस्थितौषधोपयोगवत् तेनानधिकृतानामपि सुकुमाराणां
व्युत्पत्तिदायिनाट्यमश्रुतशास्त्राणामपि संवादादविकलकार्यविवेकसिद्धि-
रिति ॥

(मूलम्) एवमस्त्विति तानुक्त्वा देवराजं विसृज्य च ।
सस्मार चतुरो वेदान् योगमास्थाय तत्त्ववित् ॥

एवमस्त्विति तानिति । देवराजमिति तानुक्त्वा तान्विसृज्य देवराजं
विसृज्येति प्राधान्यादुपादानम् । योगमिति । येन सर्ववेदानां युगपदवभासो
भवति तत्त्वविदिति ॥

ततः किं चकारेत्याह श्लोकत्रयेण =

(मूलम्) धर्म्यमर्थ्यं यशस्यं च सोपदेशं ससङ्ग्रहम्
भविष्यतश्च लोकस्य सर्वकर्मानुदर्शकम् ॥

[illegible] तन्नादर्हि प्रधानतया स्वकण्ठेन [illegible]

सर्वशास्त्रार्थसंपन्नं सर्वशिष्यप्रवर्तकम् ।
नाट्याख्यं पञ्चमं वेदं सेतिहासं करोम्यहम् ॥
सङ्कल्प्य भगवानेवं सर्वान्वेदाननुस्मरन् ।
नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसंभवम् ॥

एवमिति धर्म्यमित्यादियुगलकोक्तमर्थं सङ्कल्प्य चतुर्वेदस्मरणेन हेतुना तत इति चतुर्थ्या नाट्यवेदं चक्रे हेतौ शताधर्म्यमिति धर्मे साधूप देशाय एवमर्थे [illegible] अन्येतु धर्मार्थाभ्यामनपेतं यशः प्रयोजनमस्येति। अत्र व्याख्यानद्वये परपुरुषार्थासङ्ग्रहः स्यात्। नाट्योत्पत्तिगर्भाधानकल्पे चास्मिन् सङ्कल्प [illegible] कल्पक्रमेव यशसश्च धर्मफलत्वात् पृथगुपादानं किमर्थं सोपदेशमित्यादिकञ्च पौनरुक्त्यं तस्मादयमत्रार्थः। धर्मशब्देन चत्वारोऽपि पुरुषार्थास्तेषु साधु साधकम्। ननु किं साक्षान्नेत्याह सोपदेशं सहोपदिश्यमानैरुपायैः यद्वर्तते चतुर्वर्गोपायप्रदर्शकमित्यर्थः। ननु पादादयोऽप्येवं नैतत्सम्यग्ग्रहणं यतः परन्निर्विशङ्कप्रतीत्यर्थः प्रमाणान्तरं नाकाङ्क्षते तच्च साक्षात्काररूपमेवं यदाहुः- सर्वा च प्रमा प्रत्यक्षपरेति तेन संहेति सङ्ग्रहं एवमपि प्रत्यक्षेण सदाचारयशादिदर्शनात् कोऽस्य भेदः आह सर्वेषां कर्मणां क्रियमाणानां अनु पश्चादचिरेणैव कालेन दर्शकं पञ्चषादिभिर्वदिवसैः शुभाशुभक्रमकमेतत् फलसंबन्धसाक्षात्कारो यत्रेत्यर्थः। एष कस्येत्याह- यो यः कश्चिदस्मात् क्षणादूर्ध्वं भविष्यति। लोकस्तस्योपदिश्यस्येत्यर्थः। अनुकार्याणामिप्रायेणात्र भविष्यत इति व्याख्यातमित्याह- अर्थ्य दृश्यतया सर्वजनानां विनानधिकारत्वेनाभिलक्षणीयमित्यर्थः। ननु प्रथममज्ञातपरमार्थो

कथमभिलक्षणं, आह, यशस्यं सर्वत्र दृश्यतया प्रथितं न केवलं प्रधानपुरुषार्थोपायदर्शकं यावत्सर्वेषां शास्त्राणां कलाप्रधानानां यथार्थो गीतनृत्तवाद्यादयस्तैः संपन्नं युक्तं तथा सर्वाणि शिल्पानि चित्रपुस्तादीनि प्रवर्तयति स्वोपयोगित्वेन आक्षिपतीत्येवं एकेन यत्नेन समस्तवस्तुसिद्धिर्यतो भवति नाट्यमित्युक्तं भवति तच्च सेतिहास इतिहासोपदेशरूपं सप्रभेदमिति एवमर्थे प्रत्यक्षनिर्देशं दर्शयति इह शब्द आगमः आसन्नमासः एवंप्रकाराः प्रत्यक्षपरिदृश्यमाना आगमिकार्थाः कर्मफलसंबन्धस्वभावा यत्रासते तेनेतिहासेन सहेति पाठे त्वर्थ [illegible] इति शानं तस्य हासो हर्षपूर्वको विकासो यत इति केचित् इतिहासश्च तल्लक्षणं इत्येकिल आम्नयत्र रूपकभेदानां दृश्यते। उपदेशशब्देन च दर्शरूपक तदुपयोगावदेव [illegible] हस्तादिलक्षणनाट्यवेदशास्त्रे तात्राहितस्यैव करणीयत्वेन सङ्कल्पोऽन्यथा बुद्ध्या कलितस्यापि नाट्यस्य कथमन्यत्र सङ्क्रमणं तेन च विना कथं प्रयोगः पञ्चममिति य एकोऽपि चतुरो वेदानतिशेत इत्यर्थः। अहमिति। यस्य सर्वलोककृत्योद्वहनमेव परं कृत्यम्। एवं सङ्कल्प्येति सङ्कल्पव्यापार एवायं बुद्ध्या वेदाङ्गीकारलक्षणो ब्रह्मणो नाट्यवेदोत्पादनं, ननु वेदस्मरणेन तत्र कथं हेतुता लभ्या आह- चत्वारो वेदाः अङ्गानां पाठ्यादीनां संभवो यस्य भवन्त्यस्मादिति संभवः अत एव वेदचतुष्टयमपि यत्राङ्गानि प्रत्युपकरणीभूतमिति कुत्राङ्गे कस्य वेदस्योपयोग इति दर्शयति।

= मूलम् =

जग्राह पाठ्यमृग्वेदात्सामभ्यो गीतमेव च ॥
यजुर्वेदादभिनयान् रसानाथर्वणादपि ॥

इह पाठ्यकायां वाचीत्युक्तम्। यत्त्वं विकल्पविशिष्टस्वार्थार्पणक्ष-
मत्वं तच्च काव्यध्याय वक्ष्यमाणस्वरालङ्कारादिसामग्रीयोजनेति भवतीति तयो-
पस्कृतं पाठ्यमुच्यते। तच्च प्राधान्यात् प्रथममुपात्तम्। तथा हि वक्ष्यति मुनि

सत्त वाचि यत्नस्तु कर्तव्यो नाट्यस्यैषा तनुः स्मृता।
अङ्गनैपथ्यसत्त्वानि वाक्यार्थं व्यञ्जयन्ति हीति ॥

अत एवाभिनयान्तर्भूतत्वेऽपि पृथगुपात्तं तदृग्वेदाद्गृहीतम्। तस्यैव त्रैस्वर्यप्र-
धानस्य स्तोत्रशब्दद्वारेण योगोपकारित्वात् पाठ्यमपि च त्रैस्वर्यार्पितमेकस्वर्यैका-
न्त्यावाक्यां च स्वस्यादौ गीतरूपापत्तेरिति हि वक्ष्यामः। पाठ्यगतस्वरप्रस-
ङ्गात् तदनन्तरं सामभ्यो गीतं जग्राहेत्युक्तम्। उपरञ्जकत्वेन हि पश्चान्त-
स्याभिधानं न्याय्यमिति केचित्। गीतं प्राणाः प्रयोगस्येति वक्ष्यमाणत्वात्। तथा-
यत्तत्वाद्रसचर्वणायाः समुचितमस्यात्रैवाभिधानमित्यस्मदुपाध्यायाः। चकारे-
णैकतुल्यकक्ष्यतामाह- एवकारेण गीतमात्रं ततो गृहीतं/गीतिषु सामाख्येति ॥
न्यायात्तदाधारध्रुवापदयोजनं ऋग्वेदादेवेति दर्शयति। तत एव ध्रुवाध्याये
वचनादेव सङ्गृहीतम्। घनावनद्धरूपि सामगानक्रियाप्राणभूतकालसाध्या-त्म्या
त्मकतालसामान्यस्वीकृतमत्रैव प्रविष्टं आध्वर्यवकर्मप्रधाने तु यजुर्वेदेऽङ्गक-
र्मणां प्रदक्षिणगमनादिक्रम एव प्रथमे परिस्थिति यात्रचः पाणिका इत्यादि, ततः
सुषिरात्मकं चापि कोऽन्यः स्वरप्राधान्यात् आथर्वणवेदे तु शान्तिकमारणादिक-
र्मसु नटस्येव तस्य ऋत्विजः प्राप्तुदवैवर्ण्याद्यनुभावानां प्रजाशान्तिप्रभृति
सावधानग्रहणादिना लोहितोष्णीषादेः नेपथ्यस्य तेषु तेषु च कर्मसु विशिष्टप्र-
यत्नपुरुषसंपाद्यमनोऽवष्टम्भात्मनः सत्त्वस्य संभवात्ततोऽभिनयानामग्रहणम्।

वाचि जस्त्व अभिनयः पूर्वमेवोक्तः प्राधान्येन भावानां धृतिप्रमोदादिव्यभिचारिणां च
परमार्थसतां समाहरणं प्रधानमिति विभावादिसामग्रीरूपरसात्मकचर्वणासंभ-
व इति ततस्तद्ग्रहणमुक्तमिति न तस्या एवैतोऽत एव रस्यन्ते तत्रैव च रस्यन्त इति
हि वक्ष्यामः। तदेवं नाट्यादिरूपकोपक्रमं गीतातोद्यप्राणाभिनयवर्गपरिपुष्टाभि-
सचर्वणात्मकं परिमितिमयमेव नाट्यं ततस्तद्व्युत्पत्तिरिति नाट्यमेव वेद इति
क्रमेण प्रदर्शितं तेनाक्रम्य योजनात्मकत्रियोगात्मकशासनप्राणशास्त्रैवैल-
क्षण्येन स्वयमुपारूढशानाभिधानमपि विदुःप्राणवेदरूपका नाट्यवेदस्यैव
वेति सिद्धम्। स्थितम्

एतदुपसंहरति =

(मू.) वेदोपवेदैः संबद्धो नाट्यवेदो महात्मना ।
येन नारद संयुक्तो वेदवेदाङ्गकारणम् ॥

वेदा व्याख्याताः। वेदार्थानामुपकारकोऽर्थो वेद्यते येन स वेदात्मा. तद्य-
था= ऋग्वेदाख्यमन्त्रार्थपादादिव्याख्यानोपनयनप्रजारक्षणप्रदर्शक आयु-
र्वेदः यतो महात्मा ततः सर्ववेदी सर्वविक्त्वाच्च। तथाविधसृष्टिशक्त एवमित्युप-
संहरन् प्रबन्धत्रयं कृतोत्तरमिति दर्शयति प्रयोजनस्याङ्गीकारिणामङ्गानां
अङ्गाङ्गिभावस्य च निर्णीतत्वात्। एवं पितामहसदृशेन सर्वदा नाट्यवेदवारी
रूपकनिर्माणे कविना भाव्यमिति प्रदर्श्य तत्र विभवयुक्तो विधेयनटजनश्च
राजा प्रयोजयिता भरतमुनिसदृशश्च संपन्नपरिवारसर्ववित्प्रयोक्ता प्रयोजन-
महोत्सवप्रायप्रयोगकालक्रीडाप्रस्तावव्याजोपदेशको विगतरागद्वेषामध्यस्त
हृत्तयनिर्मण्डलहृदयदक्षिरे सति तन्मयीभवनयोग्यता . . तेरसास्वादः

सामाजिका इत्येतत् पुराकल्पमुखेन दर्शयत्यध्याय . . नगन्येन [illegible] एवेदं
[illegible] राजेव प्रयोजयितुं शक्त इति तु शब्दः इति हास्ये दशरूपकं कुशलाः
ग्रहणे धारणयोग्या विदग्धा ऊहापोहसमर्थाः प्रगल्भाः परिषद्भिरवाजित-
श्रमा योग्यासमुचितदेहा अखिन्नकायाश्च, ग्रहण इति पूर्वं गुरुमुखात् ग्रहणं
कस्यापि स्मरणं धारणं ज्ञानमूहापोह विचारः प्रयोगः वर्षति प्रकटीकरणं चका-
रेण च तदुपयोगी गुणनिकाख्यायां अभ्यासादिः देवादिमुखान्नयिष्ठतात्
साम्यादेशात्कथमपि यदि प्रवर्तेरन् तत्पूर्णपर्यवसानत्वं दुर्लभमेतैरित्यर्थः"
तर्हि किं क्रियतामित्याह- य इम इति । वेदज्ञा इति ग्रहणधारणसामर्थ्य गुह्य-
त्वेनाध्यात्मोपनिषदर्थवेदनधारणकौशलेन रसाद्युपयोगिसात्त्विकसंपादित-
सामर्थ्यं यद्वक्ष्यति सत्वं [illegible] न: प्रयत्ननिर्वर्त्यमित्यादि, तेन न्यस्य त्राणं
भुवो मध्ये स्तम्भो बाष्पश्च चक्षुषोः स्वेदो हृदि गुदे कम्पः पुलकोद्गमो वक्र-
तः वैवर्ण्यं स्वरतिं भ्रूकुण्ठे प्रवयो नासिकान्तर इत्यादियोग्यत्वं तेषां अत एवा-
नुषङ्गतो नरस्यापि परपुरुषार्थत्वाभ्यो धारणादिवशात्, ऋषय इति दर्शा-
दृषिरिति ऊहापोहयोग्यः सङ्गीतव्रता इति त्वं शंसे शक्ताः तथेति दर्शनाद्दर्श-
नामार्थक्रम प्रदर्शनीय इत्यर्थः' इम इति प्रत्यक्षेणैव दृष्टमेषान्तीदिति दर्श-
यति. कुतास्विति, यान्विति तु शब्देन ऋषिभ्योऽप्यन्येभ्योऽस्य विशेषमाह- ब्रह्मैव
मामाहेत्यादरातिशयः' पुत्रगतयोगाद्यन्योन्यप्रवर्तितपरिवारयोगः अन्वे-
त्यन्वेषणायासोत्साहपरिषदा कृतसन्मानस्य सम्यक्प्रयोगनिष्पत्तिरिति सूचि-
तम् । आज्ञापित इति. अनल्लङ्घनीयतास्योक्ता । पिता महादिव्यनाचार्यदर्शितत्व-
शङ्कां व्युदस्यति. प्रयुज्यत इति प्रयोगो दशरूपकम्. प्रयुज्यतेऽनेनेति प्रयोगः।

नाट्यलक्षणशास्त्रं तदहं पुत्रान् पाठयाञ्चकार. प्रयुक्तिश्च प्रयोगः तमध्य-
वसायपर्यन्तमहं पुत्रानध्यापयामास, तथाहं चकार. यथा प्रयुक्तिं ते पुत्राः सम्यक्
प्राप्तवन्त इत्यर्थः' चापि शब्दाभ्यां सूचिते द्वे आवृत्तिमुनिसमुचितकर्तव्या-
न्तरन्यासङ्गोऽपि लिङ्गात्सूचितः ॥ तत्त्वत इति नाट्याचार्यस्य सम्यग्गम्य-
त्वं गम्यते.

पुत्राणामभिन्दर्शयति शाण्डिल्यमित्यादिना "अत्र प्र-
सिद्धत्वं नटानां आदरकरणमिति तावन्मुख्यं नामग्रहणे प्रयोजनम्. आनुष-
ङ्गिकन्त्वन्यदपि । तद्यथा- विदूषकतापसादिना मात्त लोकमीनान्निर्वचन-
लब्धार्थी युक्ताभूमिका विशेषेऽयोग इति. अन्यस्त्वाह- शातमेवेहपतिं कश्या-
भिनियानां स्थाय्युत्पादनरसनवक तद्भूतव्यभिचारित्रयस्त्रिंशत्सात्त्विकाष्टकान-
रूपाणां पञ्चाशतोऽर्थो नान्याख्याख्यायभेदेन नायकप्रतिनायकविषयतया
प्राधान्याभिप्रायेणेति, तत्र तु कैशिक्यपि प्रयुक्ता स्यादित्युत्तरग्रन्थावकाशा
भाव इत्यल्पमासदृदयाभिः शैलूषाख्याभिर्यस्मिन्निति उत्तमप्रकृतिविचेष्टिता
शी यथेति कश्चित् । तदर्थं हर्षप्रदर्शनेन प्रकारेण योग्योऽन्यस्तदीयश्लोक-
प्रकटीकरणेनेति,

अथ सकलप्रयोगप्राणभूतकैशिक्युपयुज्यमानोपकर-
णान्तरसंहरणायोपक्रमं दर्शयति. भारतीमित्यादि. वृत्तमिति धर्मादिपुरुषार्थ
चतुष्टये साध्ये वागङ्गसत्त्वचेष्टासामान्यन्तत्र संक्षिप्तेनावान्तरभेदेन चतुर्धा
यत्किल कर्मारभ्यते तत्र वाङ्मनःकायव्यापारस्ताव दस्ति तत्र कस्यचित् ला-
लित्यवैचित्र्यक्रमस्यानुप्रवेशो यत उत्तमप्रकृतीनां सौष्ठवमय एव सर्वव्यापार

तदेव तद्वृत्तिचतुष्टयं भारतीवाग्वृत्तिः मनोव्यापाररूपा सात्त्विकी सदिति
प्रख्यारूपं संवेदनं तत् यत्रास्ति तत्सत्त्वं मनस्स्थैर्यमिति इयतीत्यारभटीः
सोत्साहा अनल्पसास्तेषामियमारभटीकाचन वृत्तिः। केशाः किंचिदप्यर्थक्रि-
याजातमकुर्वन्तो देहशोभोपयोगिनः तद्वत्सौन्दर्योपयोगी व्यापारः कैशिकी वृत्ति-
रिति तावन्मुख्यक्रमः। अन्यस्य तु यस्तद्व्यपदेशः तत्प्राधानत्वादेनकरस प्रधानं
पानकरीत्या कैशिकीत्यादि मधुरव्यपदेशवत्। एतच्च प्राग्वेवितनिष्यामः। एवं
यत्किंचिल्लालित्यं तत्सर्वं कैशिकीविजृंभितं सापि तैः प्रयोक्तुमशक्येति तुशब्दे-
नोक्तम्। तेषु न दशरूपं सर्वं वैचित्र्यशून्यत्वात् प्रमितियोजितं अतएव तादृशे
प्रयोगेऽवश्यं वेशत्वेन द्योतयति प्रयुक्तवदिति। तेषामभ्यासभूमौ योजित इत्यर्थः।
क्षममिति प्रयोगसमर्हं सादिरपि चितां प्रयुक्तकुलत एवाह द्रव्यं सुन्दरं यतः
सौन्दर्यप्राणैव सा एवमिति। बुद्धिकौशलं मदीयं ज्ञातुं तेनाहमेतत् दृष्टः।
चकारेण प्रत्युत्पन्नप्रतिभानत्वं दर्शयति। अनेन झटिति कविहृदयग्रहण-
योग्यत्वं नाट्याचार्यगुण इति सूचयति नचात्यन्तापरिदृष्टवस्तुनि उपकरण-
मुन्नेतुं शक्यम्। ब्रह्मणात्वपदेशसमये वचनमात्रेणोक्तम्। एतन्मध्ये हृदयहारि
वैचित्र्यं योजनीयमिति। अनेनाभिप्रायेण कैशिकी साक्षात्करणं वर्णयति। नृत्ता-
ङ्गहारैरित्यादिना युगलकेनानर्तनं नाट्यान्तं गात्राणां अङ्गोपाङ्गानां विलासेन
क्षेपो न तु केनचित् कर्तव्यांशेन लोकोऽप्येवंविधो विषय एवमेवाह। नृत्यतीव
गच्छतीत्यादि। तत्र येऽङ्गहाराः अङ्गानां हरणानिति। अत्रुटितरूपतया
समुचितस्थानप्राप्तैः संपन्नाशङ्करस्यैव भगवतः परिपूर्णानन्दनिर्भरीभूत-
देहोच्छलदान्तरनिर्वारसुन्दराकारस्य अतएव नृत्यत इति कर्तव्यान्तरैवकल्यानन्द-

वृत्तमात्रस्थितस्य प्रयोज्यत्वेन मया दृष्टा। ननु सा नाट्योपयोगिनी कथं आह
सैव यदि श्लक्ष्णेन श्लिष्यता उचितेन नेपथ्येन सहिता भवति यद्वक्ष्यति
शृङ्गार उज्ज्वलवेषात्मक इति तन्नाट्योक्तशृङ्गाररसं भवति नान्यथा नेपथ्यग्रह-
णं सुकुमारस्याङ्गिकादेरप्युपलक्षणम्। तेन शृङ्गाराभिव्यक्तिहेतौ सुकुमारे
चतुर्विधेऽप्यभिनये योजिते मधुरमन्थरवल्गनावर्तनाकुञ्चपकटाक्षादिना
विना शृङ्गाररसास्वादस्य नामापि न भवति॥

किमत्रैव सोपयोगेत्याह रसानां भावाभावना।

कविनटसामाजिकहृदयव्याप्तिस्तस्यां या क्रियेतिकर्तव्यता सैवात्मा स्वभावो
यस्याः। एतदुक्तं भवति। रौद्रादिरसाभिव्यक्तावपि कर्तव्यायां योऽभिनयोऽभि-
धीयते सोऽप्यनुप्रासवल्गनावर्तनाद्यात्मकसुन्दरवैचित्र्यस्याभिगणया दुश्लि-
ष्टोऽश्लिष्ट एव वा न रसाभिव्यक्तिहेतुर्भवतीति सर्वत्रैव कैशिकी प्राणा यद्व-
क्ष्यति अस्य शास्त्रस्य च नृत्तं वस्तुन्यभिनयस्येति। शृङ्गाररसस्य तु नामग्रह-
णमपि तया विना न शक्यं स्त्रीजनादृते इति॥ अयं भावः॥ यावन्निजहृद-
यासवित्तसद्विकस्वरनिर्विकारचमत्कारपवित्रता न जाता भवत इव तावच्छि-
क्षादातैरपि वैचित्र्यमनाहार्यं मुनीनां च निसर्गविषयविमुखचित्तवृत्तीनां कौनि-
वृतिचमत्कारो येन योऽपि वा समाधिजः सोऽपि देहपर्यन्ततां न भजति प्रत्युत
ततः पलायमानाः। अतः स्त्रीणां तादृशास्त्रीवैचित्र्यं ततोऽर्कसंभवात् आर्द्रभावा-
स्तु कदाचित् शक्नुयुरपि। ये त्वाहुर्न भगवतः कैशिकीप्रयोगसामर्थ्यं तेन दृ-
ष्टामयेति पाठः।

उमया सह नृत्यतो भगवतो नृत्तमप्यनादृत्य भगवत्या

प्रयुज्यमाना मया दृष्टेति ते उक्तनीत्या पराकृता ः। तथापि चित्रैरङ्गहारैस्तु

विचित्रैरङ्गहारैस्तु देवो लीलासमन्वितः।

बबन्ध यः शिखापाशं कैशिकी तत्र निर्मिता ॥

इति भगवतो विष्णोः कैशिकीनिर्माणमनुचितं स्यादित्यलं बहुना जनश-

ङ्केऽनुरागिताशङ्कां परिहरति। ततोऽसृजदिति, मनसेति यथारुचि विनिर्मि-

ता इत्यर्थः। नाट्यस्य योऽलङ्कारो वैचित्र्यहेतुः कैशिकी तत्र चतुराः अन्ये तु

नाट्यालङ्काराः सामान्याभिनये वक्ष्यमाणाः स्वभावजा लीलाविलासा इत्याद्या

दश शोभाकान्तिरित्याद्याश्च सप्त यत्नजाः अनेन मुनिकन्यानां अत्राप्रयो-

ज्यत्वं तावदुक्तम्। तासां नामग्रहणे पूर्ववत् प्रयोजनन्निरूप्यं, मेददाविति

नाट्याचार्यपरवशत्वं उपकरणसंभारस्य दर्शयति। कदाचित्त्विति ॥ तच्च

मया यथोचितं शिक्षादानेन प्रतिगृहीता इति सूचयन् कैशिकीमप्यहं योजि-

तवानिति दर्शयति ॥ एवं वृत्तिचतुष्टयसंपूर्णं नाट्यं गुणनिकायामभ्यस्तमिति

प्रदर्श्य गीतातोताभ्यां उपरञ्जकाभ्यां योगं दर्शयति स्वातीत्यादि ॥ येन जल-

धरसमयनिपतत्सलिलधारावैचित्र्याभिहन्यमानपुष्करदलसलिलविलसित-

रचितविचित्रवर्णानुहरणयोजनया स्वयं वृत्तिर्येन यमेन पुष्करवाद्यनिर्माणं कृत-

मित्यर्थः। सहशिष्यैरिति त्रिपुष्करस्य वाद्यस्यापुरकपणवमृदङ्गझल्लर्याद्युपयो-

गेन पक्षातोद्यपरिग्रह उक्तः। भाण्डस्यात्र पूर्वमुपादानं वृत्तियेन तस्यैव परिक्र-

मणान्धीरति सोपयोगात् कैशिकी चात्र मध्ये नियोजितेत्युक्तम्। न तत्प्रधा-

नमेतत्, गानयोग इति। गानशब्देन ततसुषिरपरिग्रहः।

गानशब्देन गान्धर्वस्यात्रानुपयोगमाह-नियुक्तो नियोजित

इत्यनेन ॥ वादकगायनादीनां नाट्याचार्यायत्ततां दर्शयति। नृत्तगीताद्यभिनया-

नां साम्यसिद्ध्यर्थमेकीभावेन संमतत्वे प्रकृत्या प्रयोगः कार्य इति दर्शयति ॥

श्लोकद्वयेन नाट्यमित्यादिना ॥ एवं मेलनिकायां नाट्यमिदमित्येकबुद्धिग्राह्यं

संमिलितं सम्यक्संपन्नमिति बुद्ध्या ज्ञात्वा पुत्रैः समायाम्या सह ब्रह्माणमुपस्थितः

उपनिमन्त्रणार्थं ब्रह्मणोऽग्रे स्थित इत्यर्थः। उपनिमन्त्रणं दर्शयति नाट्यस्येति ॥

ग्रहणमिति ॥ गृहीतं शिक्षितं तावन्नाट्यमित्यर्थः। ग्रहणं तत् अवलोकनन्तत् प्रे-

क्षायोग्यं जातमित्यर्थः। एतत्त्विति तुशब्द एवकारार्थे श्रुत्वैव अत एव प्रत्युप-

स्थितः। अयत्नादेवाभिमुख्येनोपस्थितो देवसंघटित इत्यर्थः। ध्वजस्येन्द्रार्थस्य

महनं पूजनं यत्र स ध्वजमहः। ध्वजमहस्य विशेषणद्वारेण संभवं दर्शयति।

निहतासुरदानव इत्यादिना =

तत्र प्रयोगे क्रमन्दर्शयति =

(मूलम्) पूर्वं कृता मया नान्दी आशीर्वचनसंयुता ॥

अष्टाङ्गपदसंयुक्ता विचित्रवेदनिर्मिता ॥

नान्द्याख्यमुख्यमङ्गलसकलपूर्वरङ्गाङ्गोपलक्षणमिति केचित् पूर्वरङ्गाङ्ग-

नां मध्या नान्द्यपि केवला प्रयोज्येत्येवं परमेतदित्यन्ये। अस्मदुपाध्यायास्तु

यावद्वृत्तैस्तत्र विघ्नाद्याचरणन्तावत् कृतन्तावत् पूर्वरङ्गस्य शेषपूर्वकस्य कोऽव-

काशः स हि विघ्नरक्षाकरणेन मण्डपभोगनिर्वेशात् देवतापरितोषहेतुः प्राधा-

न्येन नान्तरीयकतया च दैत्यपरितोषकारणं। विघ्नास्तु यदा ज्ञातास्ततः प्र-

भृति पूर्वरङ्गस्तथा चतुर्थेऽध्याये वक्ष्यति ॥ पूर्वरङ्गे कृते

मया भगवते शिवभगनारकाय दर्शित इति यथा तथा तया कृतमपार्वन्याश्च

सादिना न पूर्वरङ्गशब्दवाच्यः तस्मान्नान्दीमात्रस्य प्रयोगः किमर्थमसावि-
त्याह- वेदनिर्मिता, तत्राशिषमाशास्त इति हि श्रुतिभिः। सर्वकर्मस्वाशीःपूर्वक-
त्वमाह यत्ततो नान्दीप्रयोगो न तु पूर्वरङ्गाङ्ग, तेन अष्टौ यान्यङ्गभूतानि
पदानि वाक्यं प्रति महावाक्यं प्रति वा तानि सुप्तिङन्तान्यवान्तरवाक्यानि वेत्युभय-
था। अत एव विचित्रेत्युक्तम्। तेन ~~जितमुडुपतिना~~

जितमुडुपतिना नमस्सुरेभ्यो
द्विजवृषभा निरुपद्रवा भवन्तु।
जयतु च पृथिवीं समृद्धसस्यां
प्रतिपच्चन्द्रवपुर्नरेन्द्रचन्द्रः॥

इत्येषापि भारतीयत्वेन प्रसिद्धा कोहलप्रदर्शिता नान्द्युपपन्ना भवति। अन्यतु
पक्षे नान्दीपदान्तरेष्वेषु ह्येवमस्त्विति नित्यशः। देवतां सम्यगुप्ताभिः वाग्भि-
र्नो पारिपार्श्विकावितिश्लोके अन्तरशब्दो अवान्तरवाक्यविच्छेदवाची द्रष्टव्यः इति
चकारस्त्वाहुः। अङ्गग्रहणादत्रावान्तरवाक्यान्येव, तावन्त्व उत्पादानि। तत्र च
अष्टद्वादश संख्या चतुरश्रत्र्यश्रकालानुसारी। पूर्वं रङ्गद्वयाभिप्रायेण तत्र नान्दी
पदैर्द्वादशभिरष्टाभिर्वाप्यलङ्कृतामित्यत्र अपिशब्दाच्चतुष्पदत्वं षोडशपदत्व-
मपि तत्
चतुरश्रकं लभ्यते। त्र्यश्रगतं च त्रिपदत्वं षट्पदत्वं चेत्येवं अत्र [illegible]दिन
तिस्रस्तिस्रो नान्द्यः। ततः परमभिभूयस्त्वात् तेन जितमुडुपतिनेति चतुष्पदं
पदान्तु जयति भुवनकारणमित्यादि॥

(मू) तदन्तेऽनुकृतिर्बद्धा यथा दैत्याः सुरैर्जिताः।
संफेटविद्रवकृतां छेद्यभेद्याहवात्मिकां॥

नान्द्यन्ते परिसमाप्तौ अनुकृतिरिति नाट्यं च तत्र बद्धेति
गुणनिका योजिता, न तु प्रयोग इत्येतच्चासत् तत्पूर्वोत्तरव्याख्यातात् पूर्वं ह्युक्तम्
एवं नाट्यमिदमित्यादि नान्दीकृते त्यगं वक्ष्यते च ब्रह्मादयः प्रयोगपरितोषि-
ताइति, तस्माद्बद्धेति प्रस्ताविता न तु निष्पादिता प्रस्तावना तावत्प्रयु-
क्तेत्यर्थः। अन्ये त्वनुकृतिरिति च पठन्ति। एतदुपजीवनेनैव चिरन्तनाः क-
यो नान्द्यन्ते सूत्रधार इति पुस्तके लिखन्ति स्म। किं प्रस्तावितमित्याह- यथा
दैत्या इति। डिमसमवाकारेहामृगादीनामन्यतमः प्रयोगः प्रास्तावीत्यर्थः। यद्यपि
भरतपुत्रैर्दशरूपकमभ्यस्तं तथापि न युगपत् सर्वं प्रयोक्तुं पार्यन्त इत्येवमुक्तम्
तेन यत्केचिदचूचुरन् समवाकारे कः कैशिकीयोजनावसर इति पूर्वग्रन्थोऽस-
ङ्गत इति तन्निरवकाश एव। समवकारादावपि च सौन्दर्यात्मकं वैचित्र्यं कैशिकी
कृत्स्नमिवेत्युक्तम्। शेषग्रथितवाक्यस्तु संफेटः शङ्काभयत्रासकृतो विद्रवः
छेदमर्हतीति छेद्यं शस्त्राहवः भेदमर्हतीति भेद्यं मल्लयुद्धात्मकं नियुद्धम्॥

(मू) ततो ब्रह्मादयो देवाः प्रयोगपरितोषिताः।
प्रददुर्हृष्टमनसः सर्वे

प्रभुपरितोषाय प्रभुचरितं कदाचिन्नाट्ये वर्णनीयमिति यथा दैत्याः
सुरैर्जिता इत्येतस्मात् लभ्यत इति केचिदाहुः। तदसद्दशरूपकलक्षणयुक्तिविरो-
धात्। अत्र हि किंचित् प्रसिद्धचरितं किंचिदुत्पाद्यचरितमिति वक्ष्यते। न च वर्त-
मानचरितानुकारो युक्तो विनेयानां तत्र रागद्वेषमध्यस्थतादिना तन्मयी-
भावाभावे प्रीत्यभावे व्युत्पत्तेरप्यभावात् मानचरिते च धर्मादिकर्मफलसंबन्ध-
स्य प्रत्यक्षत्वे प्रयोगे वैयर्थ्यम्। प्रत्यक्षत्वे भविष्यति प्रमाणाभावादित्यन्यायेन

व्युत्पत्तेः संभवात् नायिका एतच्च दशरूपकाध्याये वितनिष्याम इत्यास्तां तावत्।
देवानां त्वच प्रसिद्धवर्णनीयासंभवात् पूर्वकल्पमन्वन्तरादिगतदेवासुरचरित-
कीर्तनमादित्वात् संसारस्य श्रुतिस्मृत्यनुमतदेवासुरकीर्तनविदिति, तत्र वर्तिनो-
पवर्णनतज्जातीयानामथ चरित्रभ्रमविप्रलब्धास्त्वसुराः चुक्षुभिरिति वक्ष्यामः
न च स्वचरितन्यावर्णनाद्देवानां परितोष इह यत आह- प्रयोगपरितोषिता इति॥
ध्वजमिति यस्य विघ्नशान्त्यै पूजार्थमुपयोगो भावी कुटिलकमिति वक्रदण्डको
विदूषकोपयोगी ब्रह्मायुधात्मा दण्डोपकामत्वेन भीषणत्वाबात्यादपीत्यर्थः।
भृङ्गारः पारिपार्श्विकोपयोगी छत्रमत्र पितानोजलादनां तुर्योद्भवत्वात् तत्प्रतीमः
यदाहुः कृतवे वर्षोऽन्ते महतो मेघसंप्लवानिति भगवदायत्ता दैवी मानुषी च
सिद्धिरिति मध्ये तदुपादानं सर्वव्यापकत्वं मैदेन्याः सिद्धेः प्रतिपादयितुं व्यजनं
चर्मापनुत्तये सिंहासनादिराजभूमिकायामुपयोगि यज्ञदादयो तत्त्वज्ञा नाट्यस्य
भाषितमिति तत्तद्भूमिकोपयोगी वाचके शिक्षा भावानीति विभावादिषु तथाहि-
रक्तमांसादीनि भयजुगुप्साविभावरूपाणि यक्षराक्षसाः हर्षोत्साहविभावतां या-
नीति तदुपदेशादेव तद्वयः, रसानीति॥ स्वोचितस्थायिभावसमस्यमानं तत्त-
द्रसोपयोगिनोऽनुभावव्यभिचारिवर्गस्य शिक्षा दर्शिता। रूपमिति मुखरागस्य
फलमित्याङ्गिकस्य प्रतिभूमिकं परितुष्टेनान्ततोऽत्र शिष्टापि काचिद्दया सामाजि-
केभ्यश्च धनविज्ञानमित्याहरणीयतोऽद्यजिहीर्षता च तत्परितोषाय यतितव्य-
मित्येतदनेन दर्शितम्।

अथ विघ्नोपशमनाय जर्जरपूजा कार्येति दर्शयितु-
मितिहासेनोपक्रमते॥

([illegible]) एवं प्रयोगे प्रारब्धे दैत्यदानवनाशने॥
अभवन्क्षुभितास्सर्वे दैत्या ये तत्र सङ्गताः॥

दैत्यादीनां विनाशनं यत्र प्रयोज्यतया आगम्यतामिति अवधार्यताम
यदिवा संभूयास्यतां मायामिति अदृश्यत्वमित्यर्थः। चेष्टा इत्याङ्गिकी यद्यपि स्मृ
तिस्तम्भनेन सर्वं स्तम्भितं भवति, तथापि तदभिनेय प्राधान्ये तदेव स्तम्भि
तमित्युक्तम्। सूत्रधारस्येति सपरिवारस्येति प्रस्तावना प्रयोगमध्य एवायं
घ्न इति यावद्ध्यानमिति यत्रप्रयोगः क्रियते सीदत्यस्मिन्निति जीर्यत्यतिशा
नेति पचाद्यचि रूपम्। अतिशयेन जीर्णीकृतो देहो येषान्ते तथा जर्जरेणेति,
यङ्लुगन्तात्ण्णिचि पुनः पचाद्यचि रूपम्। एवं राज्ञा सिद्धिविघातका दण्डा इ
दर्शितम्। यदिवामूलत एव तत्परीक्षार्थेमण्डपः कार्यः। येन च दण्डस्याविषये बा
तपवर्षादयश्च तत्कृतो हि सिद्धिविघातो मण्डपे सति न भवति। एतेनैवाभिप्र
येण पुराकल्पमाह- प्रयोग इत्यादि॥ शेषा इति। जर्जरीकृतशरीरशेषा अपीत
थः यद्वक्ष्यति निक्षिपता भगवन्विघ्ना इति। तथास्मिन्जर्जरीकरणकाले एतेच
असन्निहिता अद्रवन्त्रासादिति॥ सर्वदा तु न शक्या नाशयितुमिति जर्जर
प्रभावो गमिष्यत्येवमेवेति य उक्तः सोऽङ्गः सतः विश्वकर्मेति वास्तुविद्यातत्त्ववि
दो, नाट्यमण्डपे स्थपतित्वं सूचयति द्रुहिण इति ब्रह्मा। इतरे विद्याधरगन्ध
र्वाद्याः अंशीयानि भजनानि अधिष्ठानानि तैः मण्डपस्यांशेषु वाहवत्तां, येऽत्र
यच्चतुर्थादयो भागास्तैः अंशविभागमेवाह-

([illegible]) रक्षणे मण्डपस्यास्य विनियुक्तस्तु चन्द्रमाः।
यथा दिग्लोकपालाश्च विदिक्ष्वपि च मारुताः॥

अनेन चैतत्तुल्या एव मण्डपभागभिरक्षकाश्चिन्नियोज्या इति
दर्शयते ॥ मण्डपस्य सर्वस्याधिष्ठाता हि सौम्यप्रकृतिः सोमप्रधानो योज्य
इति दर्शयति चन्द्रमा इति ॥ अपि चेति ॥ न केवलं पश्चिमोत्तरकुपेस्वकोणे
यावदन्यास्वपि विदिक्षु चकाराद्दिक्ष्वपि हि धर्मदोषपराकत्वादत्यन्तोपकारिणः
अनेन गवाक्षकरणं सूच्यत इत्येके । अदित्ये मित्रशब्दः पुंलिङ्ग इति, तेन यद्वा
र्तिककारी तदुपलक्षितो नर्तकीहिकी लज्जापरिहारहेतोः नपुंसको नेपथ्यग-
ह इति तद्दयरा द्रष्टाभिधानं मित्र इति । तेजस्विता आहार्योपयोगी रत्नादि
रुक्मवेदिका रङ्गवेदिका तत्र तीक्ष्णोऽधिष्ठातेत्यर्थः । भाण्ड इति ॥ त्रिपुष्करे सोपकर-
णे दिवौकसो मेघा मृदि . . वरीशीरशब्दः सिद्धय इत्येवं सर्वत्र दृष्टमपि सद्भो
पलक्षणान्तं प्रयोजनमुत्प्रेक्ष्यम् । सर्वथा तदनुलाभे नियमादृष्टमेव वर्णा
इति तदधिष्ठितारो देवताविशेषाः स्तम्भान्तरेष्विति वर्णस्तम्भचतुष्कादि-
रित्येष नान्येषु स्तम्भेष्वित्यर्थः । शान्तास्थितिस्तम्भद्वयमष्ट वेश्मनि गवाक्षनेपथ्ये
गृहद्वितीयभूमिसन्निवेशादिति । नागमुख्याविति ॥ अनन्तगुलिकौ द्वारपत्र
क्रवाटात्मकं द्वारबहुत्वाच्च बहुवचनम् । देहं देहल्यामिति द्वाराधस्तनकाष्ठेत-
स्येति । अङ्कुल इत्येतेन प्रक्रान्तद्वारमेव परामृष्टम् । तेनोर्ध्वकाष्ठे उत्सङ्गशब्दवा
च्ये निखन्नमित्यर्थः ।

पार्श्वे स्वयमिति । राजादिस्तत्स्थानमित्युक्तम् । चकारात्
स्वदिशि अंशेनावस्थानमनुस्मृतम् । विद्यादिति ॥ वज्रायुधरूपस्तम्भेष्वपि चतुर्षु
यथाक्रमं तद्भूतादयस्ते च नाट्यतत्त्वविदो एतएव विघ्नैः सह येन येन मिलिता
इति द्रष्टव्यम् । एतेन सिद्धिविघातका येदारम्येनाप्युपायेन दुर्बलीकर्तव्या इति

सूचितम् । प्रतिष्ठित इति ॥ सदैव सन्निहितो वास्तुमध्य इत्यर्थः । कवेश्च
सन्निधानं सूचितम् । अधस्तादिति । येन सुरुङ्गाखननादिविघ्नकरणं निवार्य-
त इत्यर्थः ।

प्रधानपात्राणि पृथग्लक्षणीयानीत्याह नायकमिति ॥
हास्यशृङ्गारांशत्वात् विदूषकमित्युक्तम् । अत एव दशरूपकप्रयोगसूचनमेतत् ।
समवकारे विदूषकाभावात् + हर इति बहुमूर्तिप्रथमत्वाद्दैवत एव दैवतम् । अथ
नाट्यतत्त्वघाते तन्निरूपणार्थमुपक्रमते । एतस्मिन्निति ॥ अशक्रस्य सामाङ्गी
करोति । दुर्जन इति ॥ पूर्वं रक्षाकरण इत्युक्तद्वय इति कविरनुविधेयवचनो भवती-
ति दर्शयति- सामादिप्रयोगे तावच्छब्दसूचितं क्रमं स्फुटयति । पूर्वं सामेत्यादि ।
तत इति ॥ सर्वोपायप्रतिहताविति यावत् । तत्र ज्ञाताभिप्रायः प्रतिसमाधातुं
सुशाक इत्यभिप्रायेणाह देवानामिति ॥ सुरार्थमित्यस्यैव दार्ढ्यायोक्तम् । सुरे-
च्छुन्न इति । प्रत्यादेश इति खलीकार इत्यर्थः । भवतेति ॥ यस्यानुचितमित्यर्थः
मेतदित्यर्थः ।

अनौचित्यमेव लोकपितामहेत्यामन्त्रणेनाह । देवं पिता-
महत्वं दर्शयति । यथेति ॥ आ . . तांवा देवा दैत्याश्चेत्याह सर्व इति ॥ वच-
नमिति सुपरिहरमेतत् । नात्र प्रयास इति एकवचनेन दर्शयति अत एव
अलम्ब इति ॥ मिथ्याज्ञानगृहीतः सर्वत्रासवधो भ्रान्तिमात्रकृत इत्यर्थः । दैत्यानाम-
शुभकारिता लोकप्रसिद्धा । तुरुंरुख क्रियागर्भेषां चेष्टितमस्तु देवानां तद्विपर्य-
य इति नाट्यस्य न तात्पर्यं येन भवतामृत्युः किं तर्हीत्याह भवतान्देवतानां च
शुभाशुभविकल्पतः कर्मभावान्वयापेक्षी

(मू) भवतां देवतानां च शुभाशुभविकल्पतः॥
कर्मभावान्वयापेक्षी नाट्यवेदो मयाकृतः।

शुभकारिणः शुभं अशुभकारिणोऽशुभं फलमित्येतावदस्माकं प्रति
साक्षात्कारकल्पे नाट्ये प्रदर्शनीयम्। तत्र देवेषु दैत्येषु वा कश्चित् हरः। अत
एव भवतामपि धर्मादीयस्तदुपायासीऽपि शुभविपाकत्वेनैव दर्शितः। अतएव
शुभग्रहणं एकपक्षकरशैथिल्यदर्शनाय दैत्यसंबन्धनार्थं प्रथममुपात्तम्। शुभम
शुभं च धर्माधर्मरूपं सुखदुःखफलत्वेन विभेदेन कल्पयत्यध्यवसाययति
नाट्यवेदः कीदृक्कर्म, तद्यथा धर्मो दानं स्नानमित्यादि, अधर्मो हिंसास्तेयमि
त्यादि भाव आशयः त्रिप्रसङ्गोदिता स्वार्थता परार्थता यदिसन्धिरित्यादि। अन्व
योऽभिजनः आर्यावर्तादि ब्राह्मण्यादिश्चेति तानपेक्षते, सहकारितया एत
दुक्तं भवति। अस्मिन्देशे अस्मिन्काले ईदृशेन कर्मणा यः शुभमशुभं चार्जयति
स एवंविधफलभागी भवतीति न तावदिहोपदिश्यते, विकल्पक इति॥ द्वौनौ
ननु चैवमप्यस्मिन् विसृष्टे किमेतद्योजितमित्याह

(मू) नैकान्ततोऽत्र भवतां देवानां चानुभावनम्॥
त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनः॥

अयं भावो न युष्मत्सृष्टे केनचिदेतद्योजितं देवासुरस्य बहिर्यथास्वस्थमवस्था
नं अत्रेति नाट्यवेदेन देवासुराणामेकान्तेनानुभावनं, नैव ते अनुभाव्यन्ते, केन
चित्प्रकारेण। तथाहि- तेषु न तत्त्वेन धीर्नसादृश्येन यमलकवत् नान्तत्वेन
रूपस्मृतिपूर्वकशुक्तिरूप्यवत् नारोपेण सम्यक् ज्ञानबाधानन्तरं मिथ्याज्ञान
रूपं न तदध्यवसायेन गौर्वाहीकइतिवत् नोत्प्रेक्षमाणत्वेन मुखचन्द्रवत्

न तत्प्रतिकृतित्वेन चित्रपुस्तवत् न तदनुकारेण गुरुशिष्यव्याख्याहिवाकवत्
तात्कालिकनिर्माणेनेन्द्रजालवन्न युक्तिविरचिततदाभासतया मुख्यदृष्टौ प्र
हस्तलाघवादिमायावत्। सर्वेष्वेतेषु पक्षेषु साधारणतया द्रष्टुरौ
दासीन्ये रसास्वादायोगात् केवलं नियतवर्णनीयनिश्चितत्वे काव्यस्येवासंपत्ते
रनौचित्यावर्जनयोगाल्लौकिकमिथुनदर्शीव सांसारिकहर्षक्रोधान्वितयापत्ते
रुभयरूपयदर्शनकूलतया मुख्यदृष्टौ प्रयोक्तृदृष्टौ रसनिष्पत्त्यभावात् कि
न्तर्हि तदाह- त्रैलोक्यस्येति॥ एतदुक्तं भवति॥ एते ह्यते रामादयो न कदाचन
प्रमाणपथमवतारयस्ते यदा आगमेन वर्ण्यन्ते। तदा तद्विशेषसिद्धिर्यद्यपि
रामायणप्रायादिकस्मात् महावाक्यादुल्लसन्ति। यथापि वर्तमानतयैव विशेषाणां
संभाव्यमानार्थसामर्थ्यात्मकस्य लक्षण्यपर्यवसानात्, न चैतेषां वर्तमानतेत्यकात
द्विशेषबुद्धिः काव्येऽर्थ विदधयदेवतावत्साधारणीभावो विभावादीनां जात
त्रापि कथामात्रे साधारणीभावः संभवति॥ यद्यपि॥ तथाप्येवं ये कुर्वन्ति ते
षामेतद्भवतीति वाक्यवदण्डनादिकीर्तिशयाभावात् न चित्तवृत्तेर्निर्णीयगता भवति
काव्ये तु गुणालङ्कारमनोहरशब्दार्थशरीरे लोकोत्तररसे प्राणते। हृदयसंवादवशात्
निमग्नाकारतान्तावत् भवति चित्तवृत्तिः। किन्तु सर्वस्य प्रत्यक्षसाक्षात्कारकल्पा
तत्र न धीरुदयति। नाट्ये तु पारमार्थिकं किंचिदद्यमेकृत्यं भविष्यतीत्येवंभूता
भिसन्धिसंस्काराभावात् सर्वपरिषत्साधारणप्रमोदसारापर्यन्तविरसा नादरणीय
लोकोत्तरदर्शनश्रवणयोगी भविष्यतीत्यभिसन्धिसंस्कारादुचितगीतातोद्यवर्णनाश्र
विस्तृतसांसारिकभावतया विमलमुकुरकल्पीभूतनिजहृदयः सूच्याद्यभिनयाव
लोकनोद्भिन्नप्रमोदशोकादितन्मयीभावः वाद्याकर्णनपात्रान्तरप्रवेशावशात्समुत्पन्ने

देशकालविशेषवशात् नालिङ्गीति सम्यङ् मिथ्यासंशयभावनादिज्ञानविज्ञेयत्व-
परामर्शनास्पदे रामरावणादिविषयाध्यवसाये तत्संस्कारानुवृत्तिकारणभूत त-
त्सहचरहृद्यवस्तुरूपगीतातोद्यप्रमदानुभवसंस्कारसूचितसमनुगततदुक्त-
रूपरामाध्यवसायसंस्कार एव भक्त पञ्चषैर्दिवसैः सचमत्कारतदीयचरित-
मध्यप्रविष्टस्वात्मरूपमतिस्वात्मद्वारेण विश्वं तथा पश्यत् प्रत्येकं सामाजिकोद्दे-
शकालविशेषणापरमर्शेनैवं कारणमिदमिति लीढात्मकाधिसमर्पकं संवि-
ज्जातीयमेव संविद्विशेषरञ्जकप्राणवल्लभाप्रतिमास्वादे सहचररम्यगीताद्यातो-
द्यादिसंस्कारसा ... वशेन हृदयान्तरनिखातं तत एवोत्तुंसनशीतैरपि मत्ता-
निमात्रमप्यभजमानं भजंस्तत्तच्छुभाशुभप्रेप्साजिहासा सततस्तत्कषवृत्तित्वादेव
शुभमाचरत्यशुभं संवेदनात्मा त । तस्मिन्ननुकीर्तनमनुव्यवसायविशेषो नाट्याप-
रपर्यायो नानुकार इति भ्रमितव्यम् । अनेन भाण्डेन राजपुत्रस्य न्यायस्य वाग-
नुकृतोऽन्यादिबुद्धेरभावात् तद्धि कारणमिति प्रसिद्धं हासमात्रफलं मध्यस्थानां
यदभिप्रायेण वक्ष्यति । परवेषानुकरणाद्धासस्समुपजायत इति न त्वद्वेषणात्तु
तदेव द्वेषासूयानिवृत्त्यादिफलं तद्बुध्यैव हि दैवानां दुश्चक्रेभ एवं भूताचेयमु-
पहासभाजनमिति उपहास्यताभीरवश्च निर्वर्तन्ते ततो न रूपदेशेन ॥

नन्वेतावता नियतानुकारो मा भूत् अनुकारेण

तु किमपराद्धं न किंचिदसंभवात् इति अनुकार इति हि सदृशाकरणं तत् कस्य न
तावद्रामादेः तस्याननुकार्यत्वात् । एतेन प्रमादादिविभावानां अनुकरणं पराकृ-
तं न चित्तवृत्तीनां शोकक्रोधादिरूपाणां नहि नटो रामसदृशं स्वात्मनः शोकं
करोति । सर्वथैव तस्य तत्राभावात् भावेनाननुकारत्वात् न चान्यद्वस्तु यच्छोकेन

सदृशं स्यात् अनुभावांस्तु करोति किन्तु जातीयानेव न कृतसदृशान् साधारण-
रूपस्य कः केन सादृश्यार्थः त्रैलोक्यवर्तिनः सदृशत्वन्तु न विशेषात्मना यौगपद्ये
नोपपद्यते कदाचित्क्रमेण नियत एवानुकृतः स्यात् सामान्यात्मकत्वे कोऽनु-
कारार्थः । तस्याप्यतानुकारो नाट्यमित्यपि न भ्रमितव्यम् । अस्मदुपाध्यायकृ-
ते काव्यकौतुकेऽप्ययमेवाभिप्रायो मन्तव्यो न त्वनियताकारोऽपि, तेनानुव्यव-
सायावद्विशेषविषयीकार्यं नाट्यम् । तथा ह्याहार्यविशेषादिना हि वृत्ते तद्देश-
कालचैत्रमैत्रादिनटविशेषप्रत्यक्षाभिमाने विशेषस्तेशोपक्रमेण च विना
प्रत्यक्षाप्रवृत्तेः आयाते रामादिशब्दस्यात्रोपयोगात् प्रसिद्धतदर्थतयादर-
णीयादरणीयचरितवाचकस्यासंभावनामात्रनिराकरणेन अनुव्यवसायस्य
प्रत्यक्षकल्पना हृद्यगीताद्यनुस्मृततया चमत्कारस्थानत्वाद्धृदयानुप्रवेश-
योग्यत्वमभिनयचतुष्टयेन स्वरूपप्रच्छादनं प्रस्तावनादिना नटज्ञानजसं-
स्कारस्याभिन्यं, तेन रञ्जकसामग्रीमध्यानुप्रविष्टेन प्रच्छादितस्वस्वभावेन
प्राक्प्रवृत्तलौकिकप्रत्यक्षानुमानादिजनितसंस्कारसहायेन नटज्ञानसंस्कार-
सचिवेन हृदयसंवादतन्मयीभावनासहकारिणा प्रयोक्त्रा दृश्यमानेन योऽनुव्यव-
सायो जन्यते सुखदुःखाद्याकारतत्तच्चित्तवृत्तिरूपरूपितनिजसंविदानन्दप्रका-
शमयोऽत एव विचित्रो रसनास्वादनचमत्कारचर्वणनिर्वेशभोगाद्यपरपर्याय-
स्तत्र यदवभासते तत्तु नाट्यम् । तत्र ज्ञानाकारमात्रमारोपितं स्वरूपं . . . .
सामान्यात्मकन्तत् काल्पनिर्मितरूपं चान्यथा किंचिदस्तु । नात्राप्रस्तुतत्वस्व-
नेनात्मनो दर्शनन्तरकथापरिचयप्रकटनफलेन प्रकृतवस्तुनिरूपणविघ्नमाचरन्तः
सहृदयान् खेदयामः । तस्मादनुव्यवसायात्मकं कीर्तनं रूषितविकल्पसंवेदनं

नाट्यं तद्वेदनवेद्यत्वात् न त्वनुकरणरूपं यदि त्वेवं मुख्यत्तौ किंकरणानुसादित-
यानुकरणमित्युच्यते। तन्न कश्चिद्दोषः। स्थिते वस्तुताभेदे शब्दप्रवृत्तेरविवादा-
स्पदत्वात्। एतच्च यथावसरं वितनिष्यत इत्यास्तां तावत्। यतश्चेदं नानुकरणं
ततो यत्कैश्चिच्चोदितं तदनवकाशं। नच गीतवाद्ययुक्तः सर्वावस्थासु कश्चिद-
नुकार्य इति न त्वनुकार्यत्वेन गीतादय इत्युक्तम्। परिहारोऽपि यउक्तः आसनग-
मनस्नानस्वापप्रतिबोधभोजनाद्यासु वस्तु मासु गीतवाद्यं लोके चेष्टास्वतिप्राथ-
तमित्यादि, तदप्यनुपपन्नम्। नहि गमनादौ तद्रूपतालादिरूपेण गीतादिलो-
केऽस्ति मङ्गलमात्रत्वाद् तेशायनवादनादिष्वपि चानुकारबुध्यापत्तेरियं॥

ननु त्रैलोक्यस्य ये भावास्तेषां यद्यनुकीर्तनं
नाट्यं तदेकत्रैव रूपके एकत्रैव चाङ्कादौ सर्वमेव दृश्येतेत्याशङ्कानिराकर-
णपूर्वकं पूर्वप्रयोजनेन सप्रयोजनत्वमुपसंहरति क्वचिद्धर्म इत्यादि" नालो-
कोपदेशजननं नाट्यमेतत् भविष्यतीत्यन्तेन श्लोकाष्टकेन" एतच्च कैश्चित्
भिन्नवाक्यतया प्रतिश्लोकं व्याख्यातम्। तच्च पौनरुक्त्याध्याहारपरस्परासङ्ग-
त्यादि दोषोपहते स्यादित्युपेक्ष्यमेव। तस्मादित्थमत्र योजना नानाप्रकारैर्भावैः
स्थायिव्यभिचारिविभावादिभिरुपसंपन्नं सर्वतो व्याप्तं तेषां च भावादीनां
देशकालप्रकृत्यवस्थान्तरं भिन्नस्वभावात्तदपि नानावस्थात्मकं। अत एवाहो-
त्तमाधमेति" एवंभूतमेतद्भविष्यति काले विश्रान्तिजननं गीतोपदेशजननं च
भविष्यतीति संबन्धः।

केके नानाप्रकारा भावा इत्याह- क्वचिद्धर्म इत्यादि"
यथायोगं धर्मादयः शब्दास्तदुचितस्थायिव्यभिचार्यादिसूचकाः तेन धर्मोऽर्थ

इत्युत्साहादिः। क्रीडेति" विस्मयादिशम इति। निर्वेदादिहास्यमिति हासादियुद्ध
मिति] रौद्रादिः काम इति रत्यादिः वध इति। क्रोधभयजुगुप्साशोकादिः अ
भीभिश्च समुचितव्यभिचार्यनुभावविभावाः स्वीकृताः। क्वचिदिति" शब्देन दशा
पकान्यतममुच्यते। तथा नाटकाद्येकरूपगतो विशेषस्तथैकं नाटकादिविशे
को विभागः। एतदुक्तं भवति" किंचिद्धर्मप्रधानं रूपकं यथा नाटकं प्रकरणं
क्रीडाप्रधानस्तथा भाणः। अर्थप्रधानत्वं प्रकरणादावेवं दशरूपकलक्षणानुस
रेण सर्वमनुसरणीयम्। तथा क्वचिन्नाटके धर्मः प्रधानं यथा छलितकरामेराम
स्याश्वमेधयागः क्वचित् क्रीडा यथास्वप्नवासवदत्तायाम्। एवमन्यत्राप्यनुसरणीयम्
तथा एकत्रापि नाटके क्वचिद्धि धर्मो यथाभिज्ञानशाकुन्तले- अपि नाम कुलपते
रियं असवर्णगोत्रसंभवा स्यात् एवं प्रतिनाटकं एकदेशेषु मुलद्या एव क्रीडादय
इति" ग्रन्थविस्तरभीरुभिरस्माभिः न परिवर्तितानामवस्थादेशकालप्रकृति
विशेषसमुचितभावानुकीर्तनमात्रमेव कर्तव्यम्। किं रामाय रावणेत्यादि समाश्रये
त्याशंक्याह- धर्म इति। चो हेतौ" च यस्माल्लोकवृत्तानुसारेण करणं प्रयोगरूपं
नाट्यं मयाकृतमेतादित्यस्मात् कारणाद्धर्मप्रवृत्तानां रामयुधिष्ठिरादीनां संबन्धि
त्वेन धर्म उक्तः। निग्रह इति वधः। विनीतानां जितेन्द्रियाणां संबन्धित्वेन दमस्य
शमस्य क्रियायोजना विनयो हीन्द्रियजयः।

एवं क्लीबानामुपहास्यानां धार्ष्ट्यजननमिति विभाव
हासोऽत्रोक्तः। धार्ष्ट्यात् जननं जन्म यस्य हास्यवस्तुनः यद्वक्ष्यति विकृतपरिवे
लङ्कारधार्ष्ट्यादिभिरित्यादि विबोध इति ण्यन्तस्य रूपम्। बुद्धत्वेन प्रसिद्धानां
संबन्धित्वेन बोधनं उपायोपदेशेन व्युत्पाद्यत्वं विदुषां भीष्मादीनामुपायव्युत्पाद

त्वेन वैदुष्यम् ॥

अजेन स्मृतिमन्त्रप्रभृतीनां निरूपणं विलास इति क्रीडा-

स्थैर्यमिति व्यवसाया . . . मुत्साहरूपमेव । चशब्द एवकारार्थः । दुःखार्दितत्वे-

नयः प्रसिद्धं तस्यैव संबन्धित्वेनेत्यर्थः । धृतिर्धैर्यम् ॥

एतदुक्तं भवति । लोकवृत्तानुसारेण यतइयं नाट्यक्रिया

लोके च धर्मादयो नाश्रयाः । नसंवेदनयोग्यास्तेन धर्मादिविषये यो यथा प्रसिद्धो

रामादिः स शब्दमात्रोपयोगित्वेन दुःखमात्रो प्रणालिकया गृहीतः । एवंभूतं च नाट्यं

यत्प्रेक्षकाणां मुखेन व्याध्यास्वादिकृतेन क्रमेणाश्वत्थकशादिजेन शोकेन बन्धुमरणा-

दिकृतेनार्तानां पीडितानां तथा तपस्विनामनवरतकृच्छ्रचान्द्रायणाद्याचरणकलित-

दौर्बल्यातिशयपरिखिन्नहृदयानां विश्रान्तिजननं दुःखप्रसरणविघातकं प्रतिहत-

दुःखानां च ह्लादात्मकधृत्यादिकारणं यथायोगं तद्यथा शोकार्तस्य धृतिर्व्याध्यार्तस्य

श्रमार्तस्य क्रीडा श्रमान्तस्य सुखं आदिग्रहणेन तपस्विनो मतिविबोधादय इति

मन्तव्यम् । नचैतावदेव यावत्कालान्तरे विपरीतपाकः सुखमुपदेशं जनयतीत्येवं

दुःखितानां तत्प्रशमसुखोचितकारकालान्तरसुखलोभाः प्रयोजनं येनादुःखिताः सुख-

भूयिष्ठवृत्तय एव राजपुत्राद्यास्तेषां लोकवृत्ते धर्माद्युपायवर्गे उपदेशकार्यं तन्ना-

ट्यम् । लोकशब्देन लोकवृत्तम् ॥

ननु किं गुरुवदुपदेशं करोति नेत्याह किन्तु बुद्धिं

विवर्धयति स्वप्रतिभामिवन्तात्वृशीं वितरतीत्यर्थः । नचसा दुष्टा प्रतिभेत्याह हितं

हितप्रतिभाजनकत्वात् अत्र हेतुमाह यतो धर्मादनपेतं यशःशब्देन लोकप्रसि-

द्धिहेतुभूतं अनुत्कारिवक्ष्यते यथा रामस्य सप्ततालव्यथनादि तदुपदेशे ।

साधु . आयुर्वृद्धिहेतवः आचाराः आयुस्तेषु साधु एवं दुःखितानामदुःखितानां च सु-

खदिर्यमित्युक्तं दुःखं च शारीरं मानसं वा शारीरमपि दैवकृतं स्वयं कृतमपि दृष्टम-

फलोद्देशेनान्येन चेत्येतावानेव दुःखितवर्गः इति दुःखार्तानामित्यादि भेदोपादानस्य

फलम् ।

केचित्तु धर्मो धर्मप्रवृत्तानामित्यादि सामाजिकविषयत्वेन

व्याचक्षते . हृदयसंवादयोग्यता तात्पर्येण । अन्ये त्वकारप्रश्लेषादि व्याख्याप्रकारे-

णाधर्मप्रवृत्तानामित्यादि विपरीतत्वेन व्याचक्षते । उपदेश्यत्वाभिप्रायेण उभयमपि

चैतद्धर्म्यं यशस्यमित्यादिभिः पौनरुक्त्यात् चानेन प्रवर्तनमात्र एवोपदेशः कृतः ।

पुरुषार्थोपायमात्रे यावत्तदुपायोपायादिष्वपि इति दर्शयति ~~नतद्ज्ञानं~~

न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला ।

नासौ योगो न तत्कर्म नाट्येऽस्मिन्यन्न दृश्यते ॥

अस्मिन्निति । सप्तद्वीपगतभावानुकीर्तनरूपे नाट्ये दृश्यमाने यन्न दृश्यते

न हृदयगोचरमेति तादृग्ज्ञानाकरं नास्तीति शेषः ज्ञानमित्युपादेयमात्मज्ञानादि यथा

वेणीसंहारे । आत्मारामा विहितरतयो निर्विकल्पे समाधौ ॥ इत्यादि शिल्पमिति मा-

लाचित्रपुस्तादियोजनं यथावेष्टितग्रथितगुम्फसंहतैरानतैस्तवपल्लवैरित्यादौ

विद्यामृण्डनीत्यादि यथागमन्यायामाभ्यां प्रतिविहिततन्त्रस्य भूपतेरित्यादौ कला

गीतवाद्यादिकाः यथा यत्किल्व्यञ्जन स्तु नेत्यादौ योगेन न्यञ्जनं तेषामेव

तालादीनां कलान्तानां स्वभेदैः अन्योन्यस्वभेदैः यथा ~~मेघाशाङ्किशिखण्डिताण्ड~~

~~वविधावाचार्यकं कल्पयन्~~

मेघाशाङ्किशिखण्डिताण्डवविधावाचार्यकं कल्पयन्

निर्ह्रादोऽकरजस्य मूर्छतितरां वेणुस्वनापूरितः॥
वीणायां कलयन् लयेन गमकानुग्राहिणीं मूर्छनां
कर्षत्येष कालकूटितकला रम्यश्रुतिं षाडवे॥

इत्यादौ तत्र इहातोद्यनियगीतयोः जनाकृता अन्योन्यं यथा =

आविलपयोधराग्रं
लवलीदलपाण्डुकोमलच्छायम्। इत्यादौ।

अत्र हि शृङ्गाराङ्गस्य वैराग्यविषयया योजना कर्मेति॥ युद्धानि युद्धादिव्यापारः यथा =

आलीढस्थितटङ्कितस्य निमितौ दृष्टिं त्रयीं तन्वतः
पुंखाग्रक्रमसर्पणेन विशिखप्रान्तादथोच्चैस्तमाम्।
चक्रीभूतशरासनस्य जमनाल्लक्ष्याद्मी वियुतः
चित्रं चित्रमिमाधवस्य युगपत्सर्वे सुरेन्दुद्विषः इति।

एवं सप्रयोजनमभिधाय प्रकृतमेव पुराकल्पमनुबध्नाति। तन्नेति। तदिति।
तस्मादत्र नाट्येऽमरान् प्रति न मन्युः कार्यः। तेऽपि तत्र नकेचित्। एतदेवाह सप्त-
द्वीपानुकरणमयी हि क्रियारङ्गे दृश्यते, न च सागरद्वीपादीनां कश्चित्तत्र संभाव इति
भावः।

ननु किमर्थमेषां नामानि गृहीतानीत्याशङ्क्याह- देवानामि-
त्यादि॥ एतेषामेवाधिकारिपुरुषत्वान्निराधारस्य वृत्तस्य दर्शयितुमशक्यत्वात्
एतच्च उक्तपूर्वः। अत एव यत्र निर्व्याजसहजौदार्यधर्मादिविषये बलिप्रह्लादप्रभृ-
तेः प्रशंसास्तत्र सोऽप्युदीरितः आश्रयत्वेन तदाह सुराणामिति न च ब्रवैदैरिण
एवात्र वर्णिताः अपि तु ब्रह्मर्षयोऽपि अनेन प्रत्यादेशोऽयमस्माकं सुरार्थमित्या-

शङ्काद्वयमपि परिहृतम्। एतत्तात्पर्येणोपसंहरति।

योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।
सोऽङ्गाद्यभिनयोपेतो नाट्यमित्यभिधीयते॥

अयमिति। प्रत्यक्षकल्पानुव्यवसायविषयो लोकप्रसिद्धसत्यासत्यादिविलक्षण-
त्वात् यच्छब्दवाच्यो लोकस्य सर्वस्य साधारणतया स्वत्वेन भाव्यमानश्चर्व्य-
माणोऽर्थो नाट्यं सुखदुःखरूपेण विचित्रेण समनुगतो न तु तदेकात्मा, तथाहि-
रतिहासोत्साहविस्मयानां सुखस्वभावत्वं तत्र तु चिरकालव्यापि ~~सुखसमीहि-~~
~~कीर्षात्मना सुखरूपता विस्मयस्य निरनुसन्धानतोऽतितुल्यसुखरूपता क्रोधभ-~~
~~यशोकजुगुप्सानां तु दुःखरूपता तत्र चिरकालदुःखानुसन्धि~~ सुखानुसन्धा-
नत्वेन विषयोन्मुख्यप्राणतया तद्विषयाशंसाबाहुल्येन अल्पाय भीरुत्वात् दुः-
खांशानुवेधो रतेः हासस्य सानुसन्धानस्य वियुताद्वशा तात्कालिको . . रूप
. ~~वगतामनितिकानां भावनाकांक्षाप्राणतया सुखदुःखानुवेधवान् क्रोधः निर-~~
~~नुसन्धित्वात् कालिकदुःखप्राणतदपगमात्~~ सुखानुगतावुत्साहस्य तात्कालिकदुः-
खायासरूपनिमज्जनानुसन्धिना यदि भाविबहुजनोपकारिचिरतरकालभावि समी-
चिकीर्षात्मना सुखरूपता विस्मयस्य निरनुसन्धानतोऽतितुल्यसुखरूपता क्रोध-
भयशोकजुगुप्सानां तु दुःखरूपता तत्र चिरकालदुःखानुसन्धिप्राणो विषयगता-
भिमानिकानां भावनाकांक्षाप्राणतया सुखदुःखानुवेधवान् क्रोधः निरनुसन्धित्वात्त-
त्कालिकदुःखप्राणतदपगमात् कांक्षोत्प्रेक्षित सुखानुसंभिन्नं भयं द्वैकालिक-
स्वभीष्टविषयनाशजः प्राक्तनसुखस्मरणानुविद्धः सर्वथैव दुःखरूपः शोकः
उत्पाद्यमानसुखानुसन्धानजीविकाविषयात् पलायनपरायणरूपात् निषिध्यमान

शाङ्कतसुखानुविद्धा जुगुप्सा समस्तमतुर्वदुःखसंचयसंस्मरणप्राणितः संभावितं
तदुपरमबहुलसुखमयो निर्वेदः। एवं व्यभिचारिप्रकृतिष्वपि वाच्यः। संवित्तव्या
वाः सुखादय इति चदर्शनेन तत्त्वत्र्यादतं

अन्ये त्वत्र तद्वेदनरूपत्वमेव तेषां मन्यन्ते।

एवमलौकिका ये सुखदुःखात्मानो भावाः तत्सदृशास्तत्संस्कारानुविद्धो नाट्यलक्ष-
णोऽर्थः समुदायरूपस्तस्यैव भागानुसारमयः एवंभूतो नाट्यलक्षणोऽर्थः कथं
प्रतीतिगोचरीभवतीत्याह अङ्गादीति॥ येऽभिनयाः आङ्गिकादयो न चते
लिङ्गसङ्केतादिरूपा अपितु प्रत्यक्षसाक्षात्कारकल्पलौकिकसम्यङ्मिथ्या
ज्ञानादिरूपस्तस्यैव भावः शृङ्गारादयो रत्यादिविलक्षणास्वादपर्यायप्रतीत्युपयो-
गिनोऽत एवाभिमुख्यनयनहेतुत्वादन्यलोकशास्त्राप्रसिद्धेनाभिनयशब्देन
व्यपदेश्याः। तथाङ्गानि शाखानृत्तगीतानि आदयः प्रधाना येषान्तेऽङ्गादयः
तथाङ्गानि व्यभिचारिणो भावादयो हेतुरूपा विभावादयोऽभिनय ... नुभावाः
तएते रसाभिमुख्यनयनहेतवो यद्वक्ष्यते। तर्हि भावानुभावव्यभिचारिसंयोगाद्र
सनिष्पत्तिः तैरुपेत उपसमीपमिति संविदर्पणमभिसंक्रान्तः एवंभूतोऽर्थो नाट्यं
नाम गीयमनर्तनीयं नर्तनं तथा गमनीयं यत्नेन स्वरूपतो हृदयेनानुप्रवेष्टव्यम्।
तथा नाटकानां पारम्पर्यात्मकं वृत्तं नाट्यं धर्माम्नायरूपं च तच्च सुखदुःखाद्वा फल-
रूपाद्वा सम्यगन्वितं तेषां पश्चादभावित्वात् तेन हेयोपादेयव्युत्पत्तिफलं एतच्च
वितत्यागे भावस्वरूपं निरूपयिष्यामः।

एवं सान्त्वेनापसारितेष्वपि विघ्नेषु दिव्यनि-
देशानां अमोघत्वं ... नियुक्ते देवताङ्गानां तत्र तत्र सन्निधानाय जनमवश्य

कार्यमिति प्रदर्शयितुं उक्रमेवेतिहासमनुसन्दधन् निरूपयति एतस्मिन्निति।
अन्तर इति। समये विधिवदिति व्याचष्टे बलिप्रदानैरित्यादि बल्यन्ते आ-
प्याय्यन्ते देवता अनेनेति बलिः विविचित्रवर्णतण्डुलादिरचनाविशेषः। तिलादयश्चाग्नौ
हूयन्त इति होमः। उभयत्र विशेषणमन्त्रौषधीति मन्त्रा वक्ष्यमाणाः ओषधयो
वचाजमोदप्रभृतयः। प्रशस्तानि धान्यानि च स्वरविशदं शाल्मलीमोदकादि भोज्यं
भक्ष्यमुदीरभक्षणीयन्तु भक्ष्यं पायसं कृसरादि पातादिक्षीरिक्षु द्राक्षारसादि बलि
पूर्वोक्तो रचनाविशेषः। एते विच्छित्तियोजितैः विविधतया कल्पिता शोभाप्रधा-
नं हि नाट्ये सर्वम्॥

ननु देवानां देवपूजाकरणे किं फलमित्याह-
मर्त्यलोकगता इत्यादि॥ यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः प्रवर्तयेदिति। देवानुष्ठिताचारा
नुवर्तित्वात् लोक इति शेषः। ननु यदि लोकः सदाचारं नानुवर्तेत ततः किमित्या-
ह अपूजयित्वेति॥ निष्फलमिति ... तस्येति नाट्याचार्यस्य पात्रैर्लो-
किकमपि प्रत्यवायमाह- तिर्यग्योनिरूपेति॥

ननु यद्यपूजने प्रत्यवायस्तर्हि पूजने किन्निवृत्तिमात्रं फलं नेत्याह यथा विधीति॥ यथा दैवैर्विहिता। कथमेतत् ज्ञायत इ-
त्याह- यथादृष्टमिति॥ शास्त्रदृष्टोऽसौ विधिरित्यर्थः। अर्थान् ज्ञानित्येह
लौकिक धनमानप्रसिद्धिलाभ उक्तः।

एवं मर्त्यान्प्रत्यभिधाय प्रकृतमेव पुराकल्पम-
नुसन्धत्ते। एवमुक्त्वेति॥ नाट्याचार्यस्यैव देवयजनेऽधिकारस्तस्यैव फललाभः
कवेः प्रेक्षाप्रवर्तयितुश्च तत्प्रयोक्तृत्वमित्यनेनोक्तम्। रज्यतेऽनेनेति रङ्गो नाट्यम

तदाधारत्वात् मण्डपः तदधिष्ठातृत्वाच्च देवता अपीति मण्डपाध्यायस्य द्विती-
यस्य उपोद्घातं करोतीति विशिष्टम् ॥

त्रिनेत्रपादाब्जसदास्तवोल्लस-
प्रसादभावस्फुटमिह नाट्यशासने ।
प्रवर्तितेयं हृदये महाधियां
प्रकाशतामभिनवगुप्तभारती ॥

इति महामाहेश्वराभिनवगुप्ताचार्यरचितायां
अभिनवभारत्यां भारतीयनाट्यशास्त्र-
विवृतौ नाट्योत्पत्तिः प्रथमो-
ऽध्यायः ॥

॥ कृष्णार्पणमस्तु ॥

6th chapter begins.

षष्ठाध्यायप्रारम्भः

अन्ये मन्यन्ते आवर्त्यासात्त्विकीकैशिकीमित्रेति

सासूत्रधारस्य पाञ्चालमध्यभू . . . . तथापि नाट्यतत्त्व

सम्यङ्निर्णीतं सम्यक्‌निर्णीतं भवति। ननु वचनमात्रात् अनेनैवाशिप्रायेण दशरूपकनिरूपणे

प्रथमप्रश्नार्थो निगमयिष्यते। "भविष्यति युगे प्रायो भविष्यन्त्यल्पबुद्धयो नराः"

इत्यादि। तथा बुद्धयः कर्मशिल्पानि वैलक्षण्यं कलासु चेत्यादिसिद्ध्यध्याये च

द्वितीयप्रश्नार्थविषये निर्णेष्यन्ते। तुष्यन्ति करुणाः काम इत्यादिना। एवमन्य-

त्रापि तत्रतत्रेत्येतच्च तद्व्याख्यानप्रसङ्ग एव दर्शयिष्यामः। तेन पूर्वप्रश्नितवस्तु-

तत्त्वनिर्णय एवं क्रियतामिति तात्पर्यम्। प्रश्नात्पञ्चेति येरस्मा इत्यादि तु यत्र-

तन्त्र्यै तत्रायं भावः इहाङ्गगणनया जग्राह पाठ्यमित्यादौ पाठ्यगीतयोस्तावत्

सुप्रसिद्धं रूपं अभिनयानामपि महागीतेषु चैवार्थात्सम्यग्येनाभिनेष्यतीति यदा

प्राप्तार्थमर्थानां तद्वैरभिनयः कृतकृत्यादिवचनकत्वाच्च सुरूपान्तान्नातिनीयद्वद-

यङ्गमाः।

येतु रसानाथर्वणादिति रसा उक्तास्तेतावत्प्रसि-

द्धाः षाडबादयो न प्रकृतौ न विकृतौ युक्ताः। येत्वन्ये शृङ्गारादयः केचन रसशब्देन

सह प्रयुक्ताः शृङ्गाररससंभवेति। ततो रौद्ररसं श्लोकामिति। तत्रापि शृङ्गारादिषु कथं

रसशब्दवाच्यत्वम्। वैशब्दोऽरसायां रसनेन्द्रियग्राह्ये हि रसशब्दः प्रसिद्धः।

नचायमनादरस्थानच्युतोऽर्थो येनाविचारित एवोपद्यते। खिन्नानां रसभावेष्वित्यादौ

आदरातिशयप्रतीतेः अत एव शब्दप्रादुर्भाव इति शब्दो रस इति पठ्यन्त इति

तेन प्राधान्यादङ्गाभिनय प्रश्नान्तर्भूतमप्येतत् पुनः प्रश्नितमित्यर्थः। पुनः प्रश्ना-

भिप्रायेणैवाख्यातुमर्हसीत्युपपन्नम्। पूर्वाख्यानेषु तु पुनरुक्तमभिधत्स्वेत्युक्तत्वात्

भावश्चेति चशब्दस्तुशब्दार्थे। भावास्त्वपरे ते अपि कथं प्रोक्ताः अथ पाठ्यादयश्च
भावास्तत्किमेषां रूपं तेनादाय विषयत्वात् रसे प्रश्नान्तरे भूतावृत्त्या विस्मय-
स्थानत्वात् भावेषु प्रश्नचतुष्कं तथाहि। रससहभाविनभावाः केचन प्रोक्ताः।
भिन्नानामित्यत्र ते च केन प्रकारेणोक्ताः जयाहेत्यादौ हि तेषां नामापि न श्रुतम्।
अर्थे तेष्वेव भावशब्दः प्रवर्तितः तत्रापि भवन्तीति व्युत्पत्तिर्भावयन्तीति किमेत-
त्किमुत्पादयति। अथ भावानुवन्ति द्वयोः कर्म किं स्यादितिवाशब्देन चशब्देनापि वा-
शब्देन च चत्वारो भावेषु प्रश्नाः एवं प्राधान्यात् प्रश्नपञ्चकान्तरं वस्तुतः पुनः
पञ्च प्रश्नो पूर्वोद्दिष्टेयं विषणायते संग्रहादिति चाभिधत्स्व।

ननु तैरिह किं प्रयोजनम्। आहत तत्तातुक्तो
हेतौ तदित्याख्याने परामृष्टं यतस्तदाख्यानं अत एवाभ्यः [संग्रहादिभ्यः] उद्दे-
शलक्षणपरीक्षादिषु प्राधान्यात्तदुपक्रमे च सर्वमभिधेयम्। तदाह निखिलेन संग्र-
हलक्षणीय निर्वचनीयात्मनोपलक्षितं संग्रहादित्रयमेव वक्ष्यामीति त्रयप्रकाररूपे-
भ्यस्तदुपायेभ्यः तस्मान्न्यभिधत्स्वेति पुनश्शब्दो भिन्नक्रमः। भरतमुनिः पुनः
रसभावविकल्पान्ते निश्चीयन्ते ... चन तादृग्वाक्यावुवाच न तु तदीयक्रम-
मुक्तं तदानं समावृ्णोति पुनश्शब्दार्थः। मुनेश्चायं भावः रसादिषु समुच्चयार्थे च
तदभिधानेऽन्यन्न किंचित् अभिधेयमत्र विशिष्यत इत्येवं शब्दः यथाक्रममिति
पूर्वं संग्रह उद्देशप्रकारत्वादित्यादिक्रमेण स्वबुद्धिविषयं बहुमाने गृहीतां अभी-
षामित्यभिप्रायेण भवद्भिर्युक्तमेतदुक्तं संग्रहमित्यादीन्निदर्शयन् मुनिराह
न वाक्यमस्येति। शक्यमिति सामान्योपक्रममाध्यस्थ्य विवक्षागन्तुमिति प्राप्तम्
अन्तो निश्चयः कथं चनेत्यमुं संग्रहादिप्रकारं वर्जयित्वान्येन प्रतिपदनिरूपणादि-

नेत्यर्थः। यत्किल प्रतिपदं निरूपयितुं न शक्यं तल्लक्षणद्वारेणोच्यते लक्षणस्यैवा-
ङ्गमुद्देशपरीक्षकस्य विषयप्रदर्शनो परिकल्प्यौ च तयोर्व्यापारात् न चात्र प्रतिपदं
निरूपणं युक्तमिति।]

अत्र हेतुमाह। बहुत्वादिति। ज्ञानानि व्याकरणादीनि
शास्त्राणि शिल्पानि चित्रपुस्तादिकर्माणि तेषामनन्तादनन्त्याभावात् एतदेवोपपाद-
यति एकस्येति। नाट्याङ्गभूतस्य कस्य चिदिति शेषः। अर्थस्याभिधेयस्य
तत्वतः तनने विस्तारस्तेन अन्येषामिति अङ्गभूतस्यापि यान्यङ्गत्वेनायान्तीत्य-
र्थः। सङ्ग्रहादयस्त्वत्र समुपाय इति दर्शयति किंचिदिति। नाट्यस्य नाट्यविषयस्या-
र्थस्य सङ्ग्रहं संक्षिप्य गृह्यतेऽनेनेति तमुद्देशं वक्ष्यामीति कथं रसभावादिकृता
प्राधान्यात् तदुपक्रममित्यर्थः।

किं तेनेत्याह। अनुमाने लक्षणं तद्धि केवलव्यतिरेकि
हेतुरूपं तस्य चोद्देशधर्मिणं प्रकल्पयन् प्रकृष्टः साधक आश्रयासिद्धत्वशङ्का-
शमनेन पक्षधर्मत्वमूलाङ्गपोषकत्वात्। तस्य सङ्ग्रहस्य स्वरूपमाह। सूत्रग्रन्थ-
योर्लक्षणपरीक्षयोः योऽर्थो लक्ष्यपरीक्षितव्य लक्षणस्तस्य योऽल्पः राङ्क्षिप्तो नाम स्तोऽर्थः
मात्रेणोद्देश्यतया यत्र अन्येऽप्येवमेव मन्यन्त इति दर्शयति विस्तरेणेति। सूत्रल-
क्षणं भाष्यं तद्व्यक्तीकरणरूपा परीक्षा अल्पौ सूत्रग्रन्थौ यत्रार्थे सेष्टौ येत्यति तु
व्याख्यानमनेन श्लोकेन न संवदते।

संग्रहं दर्शयति रसाभावा इत्यादिना। चशब्दश्चेति
शब्दार्थे। अनेन यत्त्रयं गीतातोद्यं पश्चाङ्ग नाट्यं नटस्य हि रसभावयोगमर-
णादौ तत्त्वावेशो लयादिभङ्गश्च स्यात्। दृष्टस्तु तत्प्रत्ययो नाग्रे भ्रमः। अनेन तु

श्लोकेन कोहलमतेन एकादशाङ्गत्वमुच्यते। नतु हरते तत्संगृहीतस्यापि पुन-
रत्रोद्देशो निर्देशो चैतत् क्रमन्यत्यासनादित्यौद्भटाः। नैतदिति भट्टलोल्लटादयस्स
भावानामपि भावनाविशावशेन नटे संभवादनुबन्धित्वलातेश्च लयाद्यनुसारेणा-
दन्तर्भूतस्यापि प्रयोजनवशेन पुनरुद्देशदर्शनात् क्रमस्य चाविवक्षितत्वादिति
वयन्त्वत्र तत्त्वभङ्गे वितनिष्याम इत्यास्तां तावत्।

अथ कारिकां लक्षयति। अल्पाभिधानेनेति।

अनेनार्थस्य कारिकात्वं लक्षणरूपस्य दर्शयति। तद्वाचकस्य सूत्रस्य तत्संक्षि-
प्तार्थविवरणात्मकस्य च श्लोकस्यानेन लक्षणवाक्यविधेयेति तात्पर्यम्। योऽर्थो-
ऽल्पैः शब्दैः समासेन बहुतरलक्ष्यसंग्रहेण सूत्रे वाक्यमाश्रित्योच्यते। सोऽर्थः
कारिकाज्ञप्तिसाधकत्वात्तदर्थिनी विकारिका सूत्रतः सूत्रेणैतेन सूत्रमपि कारिका
तत्सूत्रमपेक्ष्य या अनुपश्चात् पता श्लोकरूपा सापि कारिका। तथाहि। सूचना-
त्मकत्वात् सूत्राल्लब्धो योऽर्थः लक्षणात्मकः स एव सम्यगिति श्रूयतया वर्णा-
न्यनेनेति वृत्तबन्धेनोच्यमानोऽल्पैश्च शब्दैर्निरूप्यमाणोऽर्थस्य लक्षणीयस्य प्रकर्षे-
धर्म्यन्तराद्यवच्छेदं दर्शयन् धर्मः कारिका क्रियतेऽनेन ज्ञप्तिरिति कारिका लक्षण-
मिति यावत्तदर्थप्रकाशकत्वात्तु श्लोकोऽप्युपचारात्कारिका॥

एतदुक्तं भवति। उद्दिष्टस्य धर्म्यन्तरे व्यवच्छेदकं
लक्षणं वक्तव्यम्। तच्च पूर्वसूत्रेण ततोऽप्युक्ताक्षेपोत्तरप्रपञ्चेन तद्विवरणमात्रशेण
सुखग्राह्येण श्लोकेन उभयोरपि हि लक्षणमेव प्रतिपाद्यं। तदेव कारिकोच्यते।
सूत्रश्लोकावुपचारादिति॥

अथ परीक्षात्मकं निरुक्तं लक्षयति श्लोक-

द्वयेन॥ नानानामेत्यादिना समासेन संक्षेपेणानेकव्यक्तिभेदभिन्नस्यार्थस्य लक्षणीय-
स्य यः सूचकोऽर्थः लक्षणात्मकः स यत्राक्षेपप्रतिसमाधानलक्षणे वस्तुनि सति स्था-
पितो भवति तत्परीक्षारूपं निरुक्तं नचैवं परिभाषा किन्त्वर्थमितं निर्गज्याक्षेपप्रति-
समाधानाभ्यां लक्षणस्य वचनमिति॥

एतदाह। धात्वर्थवचनेनेति। कथं तल्लक्षणं स्था-
प्यत इत्याशंक्य क्रियाविशेषणाभिधानद्वारेणाक्षेपप्रतिसमाधानप्रकारं दर्शयति।
नानेत्यादिना॥ नानाप्रकाराणि यानि नामानि लक्षणवाक्येऽर्थप्रतिपादकाः सुबन्त-
शब्दाः तानाश्रित्योत्पन्न उत्पादः आक्षेपप्रतिसमाधानयोर्यत्र। ननु नामपदेषु कथ-
माक्षेपप्रतिसमाधाने। आह। निघण्टुनाभिधानवशेन रूढिष्वन्येषु प्रकृतिप्रत्यय-
विभागनिगमनयान्वितं अन्वयो यत्रोत्पादे यानि लक्षणवाक्ये तिङन्तानि पदा-
नि तेषु प्रकारमाह। धात्वर्थस्य क्रियाया हेतूनां च क्रियानिमित्तानां कारकाणां
संयोजनं विचारो यत्र स्थापने इयता लक्षणवाक्ये पूर्वं शब्दपरीक्षा दर्शिता। अयं
शब्दः कथमत्रार्थे वर्तत इत्याक्षेपः। इत्थमिति च प्रकृतिसमाधानमेतत् प्रदर्शित-
वस्तुप्रणीतमेव। अर्थपरीक्षामपि दर्शयति। नानाप्रकारैः सर्वतन्त्रप्रतितन्त्रादिभिः
सिद्धान्तैः प्रमाणमूलैरर्थैः साधितमाक्षेपोत्तरयोः साधना यत्र स्थापने। एवं पर-
ज्ञानेन दर्शिता। तन्त्रादिन्यायास्तु तदङ्गं निरुक्तमपि तच्चतुर्धा नाम्ना वा ऊर्ध्वे
समस्योल्लसन्तः धातुना वा रस्यत इति रसः द्वाभ्यां वा पिशितमश्नातीति पिशाच-
समयेन च सोऽपि त्रिधा लौकिको यथा भ्रूसन्नायां वैदिको यथा। दीधीङ् दीप्तिके-
शयोः ते दीदिनात्तुल्ये प्रतिज्ञा स्तपार्षदः यथा गान्धर्ववेदे गीतकविशेषे द्वैणकादि-
शब्दः तदेतदुक्तं नानेत्यादिना। निरुक्तस्य तु प्रयोजनं संक्षेपेणार्थावधारणं

तदुक्तं स्थापित इति ।

अथोद्दिष्टानां विभागं सूचयति। संग्रहो यो मयोक्त इति।
तस्येति संग्रहस्य संग्रह एव विस्तारितो विभाग इत्यर्थः। किं तदुक्तावेव सर्वं संपन्नं
नेत्याह सन्निरुक्तं परीक्षापर्यन्तमित्यर्थः। अन्तवचनेऽन्ययोगाभावः। नचाल्लक्षितस्य परी-
क्षेत्याह- साकारिकैः कारिकासंपदोपेतं संपत्तौ समासः। तत्र तत्र विभागं तावदाह-
शृङ्गारहास्येत्यादिना 'नाट्यसंग्रह इत्यन्तेन' तत्र नाट्यं नाम नटगतोऽभिनयप्रभाव-
साक्षात्कारायमाणैकघनमानससंनिवेशाध्यवसेयः समस्तनाटकार्थकल्पनान्यतमकाव्य-
विशेषाच्च द्योतनीयोऽर्थः। स च यद्यप्यनन्तविभावाद्यात्मा, तथापि सर्वेषां जनानां सं-
विदितस्याऽस्य भोक्तरि भोक्तृवर्गस्य च प्रधाने भोक्तरि पर्यवसानात् नायकाभिधाल-
भोक्तृविशेषस्थायिचित्तवृत्तिस्वभावः स्याच्चैकस्य चित्तवृत्तिस्वपरनियममिति मतान्त-
रचित्तवृत्त्यन्तरगतविशेषितालौकिकोत्तंगयपदादिलास्याङ्गदशकोपजीवनस्वीकृ-
तलक्षणगुणालङ्कारगीतातोद्यादिसम्यक्सुन्दरीभूतकाव्यमहिमप्रयोगमात्राभ्यां
विशेषाश्रयत्वात् प्रख्यापिताद्भुत एव साधारणीभूततया सामाजिकैर्विस्वात्मस-
म्भावेन समावेशयन्ती तादात्म्यादेव चानुमानागमयोगिप्रत्यक्षादिकरणकतट-
स्थप्रमातृप्रमेयपरकीयलौकिकचित्तवृत्तिविलक्षणतया निर्भासमानापरिमित
स्वात्मन्याश्रयतानिर्भासनाविरहाच्च लौकिकप्रमादिजनितनिजरतिशोकादिकृत
षड्जहानादिचित्तवृत्त्यन्तरजननाक्षमा तत एव निर्विघ्नस्वसंवेदनात्मकविश्रान्ति-
लक्षणेन रसनापरपर्यायेण व्यापारेण गृह्यमाणत्वाद्रसशब्देनाभिधीयते। तेन
रस एव नाट्यं यस्य व्युत्पत्तिः फलमित्युच्यते तथा च रसावृत इत्यत्र एकवचनोपप-
त्तिः। ततश्च मुख्यभूतान्महारसात् स्फुटद्वीवा सत्यानि[का]वान्विताभिधान-

दृशीवोपायात्मकानि सत्यानि वाभिहितान्वयदृशीव तत्समुदायरूपाणि वा रसा-
न्तराणि भागाभिनिवेशादृष्टानि रूप्यन्ते तद्वक्ष्यन्ते काव्यार्थात् भावयतीति तेन प्रथ-
मं रसास्ते च वशान्तापलापिनस्तु अष्टाविति तत्र पठन्ति ॥

तत्र कामस्य सकलजातिसुलभतयात्यन्तपरि-
चितत्वेन सर्वान्प्रतिहृद्यतेति पूर्वं शृङ्गारः तदनुगामी च हास्यः निरपेक्षभावत्वात् तद्वि-
परीतस्ततः करुणस्ततस्तन्निमित्तं रौद्रः स चार्थप्रधानः ततः कामार्थयोर्धर्ममूल-
त्वात् वीरः स हि धर्मप्रधानः तस्य च भीताभयप्रदानसारत्वात् तदनन्तरं
भयानकः तद्विभावसाधारण्यसंभावनात्ततो बीभत्स इति यद्वीरेणाक्षिप्तं वीरस्य
पर्यन्तेऽद्भुतः फलमित्यनन्तरं तदुपादानं तथा च वक्ष्यते पर्यन्ते कर्तव्यो नित्यं हि
रसोऽद्भुत इति तत्र त्रिवर्गात्मकप्रवृत्तधर्मविपरीतनिवृत्तधर्मात्मको मोक्षफलकः
शान्तः तत्र स्वात्मावेशेन रसचर्वणेत्युक्तम्। स च विभावादिबलादिति भावावकल्या-
तत्र नाशात्तल्लौकिकरत्यादिचित्तवृत्तेः कवेर्नटस्य वा तद्विषयविशिष्टविभावाद्याह-
रणं आवश्यमिति स्थायिन उद्दिष्टाः। तत्र शान्तस्य स्थायी विस्मयशमा इति केचित्-
पठितः। उत्साह एवास्य स्थायीत्यन्ये। जुगुप्सेति केचित्, सर्व इत्येके। तत्त्वज्ञान-
जो निर्वेदोऽस्य स्थायी। एतदर्थमेवाशुभधर्मोपजीवित्वख्यापनाय अमङ्गलभू-
तोऽप्यसौ पूर्वं निर्दिष्टो व्यभिचारित्वाभिनयत्वोपजीवकथ इति। सात्त्विकाव-
स्थायिषु च संख्या नोक्तेत्यपरे। अत एव स्थायिन एते तु व्यभिचारिणोऽपि भवन्ति।
एतच्चाग्रे वितनिष्यामः। व्यभिचारिण एत इत्युभयतो नियमार्थं संख्योपादानम्। सात्त्वि-
काव्यभिचारिवृत्तमभिनयवृत्तं चोपजीवन्तीति पृथगभिनयादिभ्यो गणिताः चत्वार
इत्याहार्यस्यापि धनुःप्रतिशीर्षकमुकुटादेः प्रत्यक्षत्वेनावुपयोगोऽत्तरङ्गत्वं सूचयति

नाट्यसंश्रया इति" लोके तु कदाचिन्न भवत्यपि गृहीतत्वान्नाट्येतु तएवजीवि-
तमत एव रसभावानन्तरमभिनया उद्दिष्टाः' अभिनयाश्च लौकिकं धर्मं तन्मूल-
मेव तदुपजीविनं सामयिकं वानुवर्तन्त इत्यतः तदनन्तरं धर्मी। नचाभिनयोऽभि-
नेतव्यमन्तरेणास्तीति दशरूपकयोगद्वारेण तदुपकारिण्यो वृत्तयः द्वैतिसः पञ्चेति
निराकरणाय चतस्र इत्युक्तम्' ता अपि देशावशात् भूयसा भवन्तीति तदनन्तरं
प्रवृत्तयः सर्वमेतत् सिद्धिपर्यवसानमिति ततो द्विविधा सिद्धिस्स्वरागपाद्यं गानसंगृ-
हीता अपि पृथगुपास्याः' केवलानामपि प्रयोगोपरञ्जकत्वं यत्तद्धये दृश्यते यत्रालाप
इति प्रसिद्धिस्तदभ्युपगमार्थं लक्षणान्वितमिति"

अन्यत्तु मल्लकपटफलकज्वालामुखपक्षवाद्या-
दिलौकिकं नैतत्संगृहीतं बाह्यत्वादित्यर्थः' एतच्चान्ते वक्ष्यते। यदपि चतुर्विधञ्च
सर्वमि· बहुचर्मकारादिवाद्यमपि च वक्ष्यमाणलक्षणान्वितं आतुद्यते त्वेतदभि-
हन्यत इत्यर्थः" पुष्करशब्दश्रवणादागतं पुष्करवर्तकदेवताधिष्ठितं पद्मप-
त्राकारं चर्मपुटभाषं चेति पौष्करं हन्यते कलासाम्यार्थमिति घनः· अत एव
तालैकप्रमाणत्वात् स्वरवर्णसंभवात्ताल इत्युक्तः" कांस्यतालादिः एवकारः कोह-
लादिव्युदासाय। पात्रस्य प्रवेशे भावप्रकृत्यवस्थादिसूचकं यत् गीयते तत्प्रवेशा-
गानम्' प्रविष्टस्यान्तर्गतां चित्तवृत्तिं सामाजिकान्प्रति प्रसादयितुं प्रथयितुं
प्रासादगानम्' रसान्तरापक्षेपार्थमाक्षेपगानं अन्तरमिति गतिपरिक्रमणनिरू-
पणादिस्वसरः तत्र यत् गीयते तदान्तरं गानम्' पात्रस्य निष्क्रमणे तु निष्क्रामगानम्'
प्रवेशादय उपचाराद्गाने प्रसादोऽस्य प्रयोजनं प्रासादिकम्"

अन्ये तु समासान्मत्वर्थीयं ठनं कृत्वा प्रासादिकमि-

ति ध्रुवागीत्याधारो नियतः पदसमूहः तत्प्रयोगेन युज्यमानतयां समन्वितं तदर्थ
प्राधान्येन नियतरूपत्वादिति गानस्य गान्धर्वाद्भेदः सूचितः' कक्ष्याविभागेन
गत्युपकारेण सर्वाभिनयानुभावोपकारि गानं तोद्योपकारी च मण्डपो यथोक्तं च
व्यास्य गतो भाव इति तथा गम्भीरस्वरता येन कृतपस्येत्यादि रङ्गेणैव च कक्ष्यावि
भागः संगृहीत इति नानुदृष्टं कक्ष्यायाः"

एतदुपसंहरति। एवमित्यादिना। एवमुद्दे
विभागभेदेन द्विधा संग्रहमभिधाय लक्षणं परीक्षे वक्तुं प्रतिजानीते। अतः पर
मिति" सूत्रं सूत्रकं लक्षणं वक्ष्यामि। तेनैव च कारिकासंगृहीता ग्रन्थो भाष्यं तत
तं च विकल्पनमाक्षेपप्रतिसमाधानात्मकमिति परीक्षा निरुक्तशब्दवाच्या प्रति-
ज्ञाता सूत्रविवरणस्वभावात्तु कारिकासूत्रमपि प्रकाशयन्ति बहुतराक्षेपसमाधा
नव्याकुलशिष्यजनस्थितपक्षनिरूपणेन उपकरोतीति भाष्यस्य पश्चादस्या
पाठः। एवं सूत्रं भाष्यं परीक्षां च प्रवक्ष्यामीति प्रतिज्ञाय रसविषयमेव सूत्रप्र
ति प्रथमं वक्तव्यमित्यत्र परिकरबन्धं घटयितुमाह- तत्रेति" तेषां रसादीनां
मध्ये एवकारोऽवधारणे। तावदिति क्रमे उषितः सूत्रग्रन्थपरीक्षाक्रमेण वि
व्याख्यास्यामः'

उद्देशक्रमस्यैव पर्यनुयोज्यतामाशंक्यापरं क्रम
हेतुमाह- नहीति" हि यस्मात् रसं विनापि भावादिरर्थो बुद्धौ व्याख्येयतया न
प्रवर्तते। यतश्च तं विना अर्थः प्रयोजनं प्रीतिपुरस्सरव्युत्पत्तिमयं न प्रवर्तते यतश्च
रसं प्रति आहृते रसतात्मकप्रतीत्येकघनविश्रान्ते सामाजिकलोके अन्यो भाव
दिरर्थः प्रविभागेन बुद्धौ न वर्तते सर्वस्य जडस्य चित्तवृत्त्यन्तरोपकृतप्रधान

स्थायिनामधेयचित्तवृत्तिमग्नत्वेन विभावानुभावादिवर्गस्यावभासादेतान्याख्या-
तृनटसामाजिकाभिप्रायेण तस्यैव प्राधान्यमिति रस एव तावत्पूर्वमुद्दिष्ट इति
तस्यैव लक्षणादि कर्तव्यमिति तात्पर्यम्"

पूर्वत्र बहुवचनमत्र चैकवचनं प्रयुञ्जान-
स्यायमाशयः। एक एव तावत्परमार्थतो रसः सूत्रस्थानीयत्वेन रूपके प्रतिभाति।
तस्यैव पुनर्भागदृशा विभागः सोऽपि च न तदेकमुख्यप्रेक्षकतामतिवर्तते। एतच्चोद्दिष्ट
एवास्माभिः अभिहितचरम्। अभिधास्यते चाग्रे।

एवं क्रमं हेतुमभिधाय रसविषयलक्षण-
सूत्रमाह- विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः। अत्र भट्टलोल्लटप्रभृ-
तयस्तावदेवं व्याचख्युः। विभावादिभिः संयोगोऽर्थात् स्थायिनस्ततो रसनि-
ष्पत्तिः" तत्र विभावैश्चित्तवृत्तेः स्थाय्यात्मिकाया उत्पत्तौ कारणमनुभावाश्च
न रसजन्याः अत्र विवक्षिताः तेषां रसकारणत्वेन गणनार्हत्वात्। अपि तु भा-
वानामेव येऽनुभावाः व्यभिचारिणश्च चित्तवृत्त्यात्मकत्वाद्यद्यपि न सहभाविनः
स्थायिना" तथापि वासनात्मकेह तस्य विवक्षिता दृष्टान्तेऽपि व्यञ्जनादिमध्ये
कस्यचित् वासनात्मकता स्थायिवदन्यस्योद्भूतता व्यभिचारिवत् तेन स्थाय्येव वि-
भावानुभावादिभिः उपचितो रसः स्थायी भवत्वनुपचितः स चोभयोऽप्यनुका-
र्येऽनुकर्तर्यपि चानुसन्धानबलादिति। चिरन्तनानां चायमेव पक्षः। तथाहि दण्डि-
ना स्वालङ्कारलक्षणेऽभ्यधायि रतिः शृङ्गारतां गता रूपबाहुल्ययोगेनेति अधिरुह्य
परां कोटिं कोपो रौद्रात्मतां गतः इत्यादि च। एतन्नेति श्रीशङ्कुकः। विभावादियोगे
स्थायिनः लिङ्गाभावेनावगत्यनुपपत्तेः भावानां पूर्वमभिधेयताप्रसङ्गात्"

स्थितदशायां लक्षणान्तरवैयर्थ्यात् मन्दतरतममाध्यस्थ्याद्यानन्त्यापत्तेः हास्य-
रसे षोढात्वाभावप्राप्तेः कामावस्थासु दशस्वसंख्यरसभावादिप्रसङ्गात् शोक-
स्य प्रथमं तीव्रत्वं कालात्तु मान्द्यदर्शनं क्रोधोत्साहरतीनाममर्षस्थैर्यसेवाविप-
र्यये ह्रासदर्शनमिति विपर्ययस्य दृश्यमानत्वाच्च तस्माद्धेतुभिः विभावाख्यैः
कार्यैश्चानुभावात्मभिः सहचारिरूपैश्च व्यभिचारिभिः प्रयत्नार्जिततया कृत्रि-
मैरपि तथानभिमन्यमानैः अनुकर्तृस्थत्वेन लिङ्गबलतः प्रतीयमानः स्था-
यीभावो मुख्यरामादिगतस्थाय्यनुकरणरूपत्वादेव च नामान्तरेण व्यपदिष्टो
रसः विभावा हि काव्यबलानुसन्धेयाः अनुभावाः शिक्षातः व्यभिचारिणः कृत्रि-
मनिजानुभावार्जनबलात् स्थायी तु काव्यबलादपि नानुसन्धेयः। रतिः शोक
इत्यादयो हि शब्दा रत्यादिकमभिधेयीकुर्वन्ति अभिधानत्वेन तु वाचिकाभि-
नयरूपतयावगमयन्ति। न हि वागेव वाचिकम्। अपि तु तया निर्वृत्तमङ्गै-
रिवाङ्गिकः तेन वाडवेनेव जलधिः शोकः क्रोधेन पीयत इति तथा शोकेन
कृतः स्तम्भः तथास्थितो योऽवस्थितस्ताकन्दैरित्येवमादौ न शोकोऽभिनेयोऽपि त्वभि-
धेयः भातिपतितो लिखन्त्या इत्यनेन न तु वाक्येन स्वार्थमभिदधता उदयन-
गतः सुखात्मा रतिः स्थायीभावोऽभिनीयते न तूच्यते। अवगमनशक्तिर्ह्यभिनयन-
वाचकत्वादन्या। अत एव स्थायिपदं सूत्रे भिन्नविभक्तिकमपि नोक्तम्। तेन रति-
रनुक्रियमाणा शृङ्गार इति तदात्मकत्वं तत्प्रभवत्वं च युक्तम्। अर्थक्रियापि मिथ्या-
ज्ञानाद्दृष्टा। न चात्र नर्तक एव सुखीति प्रतिपत्तिः। नाप्ययमेव राम इति न चाप्य-
यं न सुखीति न चापि तत्सदृश इति। किन्तु यः सुखी रामः असावयमिति
प्रतीतिरस्तीति तदाह-

प्रतिभाति न सन्देहो न तत्त्वं न विपर्ययः।
धीरसावयमित्यस्ति नासावेवायमित्यपि॥
विरुद्धबुद्धिसंभेदादविवेचितसंप्लवः॥
युक्त्या पर्यनुयुज्येत स्फुरन्ननुभवः कयेति॥

तदिदमप्यन्तस्तत्त्वशून्यं न विमर्दक्षममिति उपाध्यायः॥ तथा ह्यनुकरणरूपो रस इति यदुच्यते तत्किं सामाजिकप्रतीत्यभिप्रायेणोत नटाभिप्रायेण किं वा वस्तुवृत्तविवेचकव्याख्यातृबुद्धिसमवलम्बनेन यथाहुर्व्याख्यातारः खल्वेवं विवेचयन्तीति॥

अथ भरतमुनिवचनानुसारेण तत्राद्यः पक्षोऽसङ्गतः। इह किंचिद्धि प्रमाणेनोपलब्धं तदनुकरणमिति शक्यं वक्तुं यथैवमसौ सुरां पिबतीति सुरापानानुकरणत्वेन पयःपानं प्रत्यक्षावलोकितं प्रतिभाति। इह च नटगतं किन्तदुपलब्धं सदनुकरणतया भातीति चिन्त्यम्। तच्छरीरं तन्निष्ठं प्रतिशीर्षकादि रोमाञ्चकगद्गदिकादि भुजाक्षेपवल्गनप्रभृति भ्रूक्षेपकटाक्षादिकं च न रतेः चित्तवृत्तिरूपतया अनुकारत्वेन कस्यचित्प्रतिभाति। जडत्वेन [भिन्नेन्द्रियग्राह्यत्वेन] भिन्नाधिकरणत्वेन च ततोऽतिवैलक्षण्यात्। मुख्या[मुख्या]वलोकिनां च तदनुकरणप्रतिभासो न च रामगतां रतिमुपलब्धपूर्विणः केचित्।

एतेन रामानुकारो नट इत्यपि निरस्तः॥

प्रवादः। अथ नटगता चित्तवृत्तिरेव प्रतिपन्ना सती रत्यनुकारः शृङ्गार इत्युच्यते तत्रापि किमात्मतत्त्वेन सा प्रतीयत इति चिन्त्यम्॥

ननु प्रमदादिभिः कारणैः कटाक्षादिभिः कार्यैः

धृत्यादिभिश्च सहचारिभिः लिङ्गभूतैर्या लौकिकी कार्यरूपा कारणरूपा सहचारिरूपा च चित्तवृत्तिः प्रतीतियोग्या, तदात्मकत्वेन सा नटचित्तवृत्तिः प्रतिभाति॥ हन्त तर्हि रत्याकारेणैव सा प्रतिपन्नेति दूरे रत्यनुकारणा[त्मता]वाचो युक्तिः

ननु ते विभावादयोऽनुकार्ये पारमार्थिका इह त्वनुकर्तरि न तथेति विशेषः। अस्त्वेवं किन्तु तेऽपि विभावादयोऽन्तत्कारणा-तत्कार्य-सहचाररूपा अपि काव्यशिक्षादिबलोपकल्पिताः कृत्रिमास्सन्तः किं कृत्रिमत्वेन सामाजिकैः गृह्यन्ते नवा यदि गृह्यन्ते तदा तैः कथं रतेरवगतिः

नन्वत एवं तत्प्रतीयमानं रत्यनुकरणबुद्धेः कारणं कारणान्तरप्रभवेषु हि कार्येषु शिक्षितेन न तथाज्ञाने वस्त्वन्तरस्यानुमानं तावद्युक्तम्। अस्तु शिक्षितेन तु तस्यैव प्रसिद्धस्य कारणस्य तथा वृश्चिकविशेषात् गोमयस्येवानुमानं वृश्चिकज्ञैरेव तत्परं मिथ्याज्ञानं यत्रापि लिङ्गज्ञानं मिथ्या तत्रापि न तदभ्यासानुमानं युक्तम्। न हि बाष्पादिधूमत्वेन ज्ञातादनुकारप्रतिभासमानादपि लिङ्गात्तदनुकारानुमानं युक्तम्। धूमानुकारत्वेन हि ज्ञायमानान्नीहारात् नाग्नेः अनुकारं जपापुष्पप्रतीतिः दृष्टा॥

नन्वकृद्धोऽपि नटः क्रुद्ध इव भाति। सत्यम् क्रुद्धेन सादृश्यः सादृश्यं च भ्रुकुट्यादिभिः गौरिव गवयेन मुखादिभिरिति नैतावता अनुकारः किञ्चित्। न चापि सामाजिकानां सादृश्यमतिरस्ति सामाजिकानां च नभावज्ञन्या नर्तके प्रतिपत्तिरित्युच्यते।

अथ च तदनुकारप्रतिभास इति रिक्ता वाचो युक्तिः यच्चोक्तम्। रामोऽयमित्यस्ति प्रतिपत्तिस्तदपि यदि तदात्वेऽतिनिश्चितं

तदुत्तरकालभाविबाधकवैधुर्याभावे कथं न तत्त्वज्ञानं स्यात् बाधकसद्भावे वा
कथं न मिथ्याज्ञानं वास्तवेन च वृत्ते बाधकानुदयेऽपि मिथ्याज्ञानमेव स्यात्तेन
विरुद्धबुद्धिसंभेदादित्यसत्। नर्तकान्तरेऽपि च रामोऽयमिति प्रतिपत्तिरस्ति।
ततश्च रामत्वं सामान्यरूपमित्यायातम्।

यच्चोच्यते विभावाः काव्यादनुसन्धीयन्ते काव्याद
तदपि न विद्मः। न हि ममेयं सीता काचिदिति स्वात्मीयत्वेन प्रतिपत्तिर्नटस्य
अथ सामाजिकस्य तथा प्रतीतियोग्याः क्रियन्त इत्येतदेव अनुसन्धानमुच्य-
ते तर्हि स्थायिनि सुतरामनुसन्धानं स्यात्। तस्यैव मुख्यत्वेन अस्मिन्नय-
मिति सामाजिकानां प्रतिपत्तिः।

यत्तु वाचिकमित्यादिना भेदाभि-
धानं यं रम्भागर्भमहीयान् अभिनयरूपताविवेकः कृतः स उत्तरत्र स्वावसरे
चर्चयिष्यते। तस्मात् सामाजिकप्रतीत्यनुसारेण स्थाय्यनुकरणं रस इत्यसत्।
न चापि नटस्येत्थं प्रतिपत्तिः रामं तच्चित्तवृत्तिं वानुकरोमीति सदृशाकरणं हि
तावदनुकरणमनुपलब्धप्रकृतीनां न शक्यं कर्तुम्।

अथ पश्चात्करणमनुकरणं तल्लोकेऽप्यनु-
करणात्मताप्रसक्ता। अथ न नियतस्य कस्यचित् अनुकारोऽपि तूत्तमप्रकृतेः
शोकमनुकरोति तर्हि तेनेति चिन्त्यम्। न तावच्छोकेन तस्य तदभावात्। न चा-
श्रुपातादिना शोकस्य अनुकारस्तैर्हि तद्वैलक्षण्यादित्युक्तं इयत्तु स्यात्। उत्तमप्र-
कृतेर्ये शोकानुभावाः ताननुकरोमीति तत्रापि कस्योत्तमप्रकृतेर्यस्य कस्य
चिदिति चेत्सोऽपि विशिष्टतां विना कथं बुद्धावारोपयितुं शक्यः। य एवं

शेदितीति चेत् स्वात्मापि मध्ये नटस्यानुप्रविष्ट इति गलितोऽनुकार्यानुकर्तृ-
भेदः। भावः।

किं च नटशिक्षावशात् स्वविभावस्मरणात् चित्तवृ-
त्तिसाधारणीभावेन हृदयसंवादात् केवलमनुभावान् प्रदर्शयन् काव्यमुचितकाकु-
रूपाद्युपस्कारेण पठंश्चेष्टत इत्येतावन्मात्रास्य प्रतीतिं न त्वनुकारं वेदयते। कान्त-
वेषानुकारवर्धितरामचेष्टितस्यानुकारः। एतच्च प्रथमाध्यायेऽपि दर्शितमस्माभिः।
नापि वस्तुवृत्तानुसारेण तदनुकारत्वमनुसंवेद्यमानस्य वस्तुवृत्तत्वानुपपत्तेः।
यच्च वस्तुवृत्तं दर्शयिष्यामः। न च मुनिवचनमेवंविधमस्ति। क्वचित् स्थाय्यनुक-
रणं रसा इति। नापि लिङ्गमात्रार्थं मुनेः उपलभ्यते। प्रत्युत ध्रुवागानतालवै-
चित्र्यलास्याङ्गोपजीवनं निरूपणाद्विपर्यये लिङ्गमिति सन्ध्यङ्गाध्याये
वितनिष्यामः। सप्तद्वीपानुकरणमित्यादि अन्यथापि शक्यगमनिकमिति
तदनुकारे विपचक नामान्तरं कालवेषगत्यनुकरणादौ।

यच्चोच्यते वर्णकैर्हरितालादिभिः संयुज्यमा-
न एव गौरित्यादि। तत्र यदभिव्यज्यमान इत्यर्थोऽभिप्रेतस्तदसत्। न हि सिन्दू-
रादिभिः पारमार्थिको गौरभिव्यज्यते प्रदीपादिभिरिव किन्तु तत्सदृशः समूह-
विशेषो निर्वर्त्यते। अत एव हि सिन्दूरादयो गवावयवसन्निवेशसदृशेन सन्निवेश-
विशेषेणावस्थिता गोसदृशीति प्रतिभासस्य विषयो नैवं विभावादिसमूहो रति-
सदृशतात्प्रतिपत्तिग्राह्यः। तस्मात् भावानुकरणं रसा इत्यसत्। येन त्वभ्यधायि
सुखदुःखजननशक्तियुक्ता विषयसामग्री बाह्यैव। सौख्यदृष्ट्या सुखदुःखस्वभावो
रसः तस्यां च सामग्र्यां वर्णस्थानीया विभावाः संस्कारकाः अनुभावव्यभिचारिणः

स्थायिनस्तु [तत्सामग्री] तत्सामग्रीजन्याः आन्तराः सुखदुःखस्वभावा इति ते न
स्वरस
स्थायिभावानुसरत्वमित्यादावुपचारमङ्गीकुर्वता ग्रन्थविरोधं स्वयमेव बुध्यमा-
नेन दूषणाविष्करणमौर्ख्यात् प्रामाणिको जनः परिरक्षित इति किमस्योच्यते।
कृतिः
यत्त्वत्युक्तं नः प्रतीतिवैषम्यप्रसङ्गादिति तत् किमयदन्योच्यतां/ भट्टनायकस्त्वाह
रसो न प्रतीयते नोत्पद्यते नाभिव्यज्यते स्वगतत्वेन हि प्रतीतौ करुणे दुःखित्वं
स्यात्। न च सा प्रतीतिर्युक्ता। सीतादेरविभावत्वात् स्वकान्तास्मृत्यसंवेदनात्[
[न] रणी
देवतादौ साधारणीकरणायोग्यत्वात्। समुद्रलङ्घनादेरसाधारण्यात्। न च तद्वतो
रामस्य स्मृतिरनुपलब्धत्वात्। न च शब्दानुमानादिभ्यः तत्प्रतीतौ लोकस्य सरस-
ता युक्ता प्रत्यक्षादिव। नायकयुगलकावभासे हि प्रत्युत लज्जाजुगुप्सास्पृहादि-
स्वोचितचित्तवृत्त्यन्तरोदयव्यग्रतया का सरसत्वकथापि स्यात्तन्न। प्रतीतिरनुभ-
वस्मृत्यादिरूपा रसस्य युक्ता। उत्पत्तावपि तुल्यमेतद्दूषणम्। शक्तिरूपत्वेन
पूर्वं स्थितस्य पश्चादभिव्यक्तौ विषयार्जनतारतम्यापत्तिः। स्वगतत्वपरगतत्वादि
च पूर्ववद्विकल्प्यम्। तस्मात् काव्ये दोषाभावगुणालङ्कारमयत्वलक्षणेन नाट्ये
चतुर्विधाभिनयरूपेण निबिडनिजमोहसङ्कटकारिणा विभावादिसाधारणीकर-
णात्मनाभिधातो द्वितीयेनांशेन भावकत्वव्यापारेण भाव्यमानो रसोऽनुभव-
स्मृत्यादिविलक्षणेन रजस्तमोऽनुवेधवैचित्र्यबलाद्द्रुतिविस्तारविकासलक्षणेन
सत्त्वोद्रेकप्रकाशानन्दमयनिजसंविद्विश्रान्तिलक्षणेन परब्रह्मास्वादसविधेन
भोगेन परं भुज्यत इति तत्र पूर्वपक्षोऽयं भट्टलोल्लटपक्षानभ्युपगमादेव नाभ्यु-
पगत इति तद्दूषणं अनुत्थानोपहतमेव। प्रतीत्यादिव्यतिरिक्तश्च संसारे को
भोग इति न विद्मः। रसनेति चेत् सापि प्रतिपत्तिरेव केवलमुपायवैलक्षण्यात्

भा
नामान्तरं प्रतिपद्यतां दर्शनानुमितिश्रुत्युपमितिप्रतिभानादिनामान्तरवत्
निष्पादनाभिव्यक्तिद्वयानभ्युपगमे च नित्यो वासद्वा रस इति न तृतीया दिग्गति-
मस्यां न चाप्रतीतं वस्त्वस्ति व्यवहारयोग्यम्।
अथोच्यते प्रतीतिरिति रसस्य भोगीकरणं
तच्च भुक्त्यादिस्वरूपम्। तदस्तु तथापि न तावन्मात्रं यावन्तो हि रसास्तावन्त एव
रसनात्मानः प्रतीतयो भोगीकरणस्वभावाः गुणानां चाङ्गाङ्गिवैचित्र्यमनन्तं क-
ल्प्यमिति का द्रुतित्वेन यत्नाभावनाभाव्य एषोऽपि शृङ्गारादिगणो यदीति यत्तु
काव्येन भाव्यन्ते रसाः इत्युच्यन्ते तत्र विभावादिजनितचर्वणात्मकास्वादरूपप्रत्य-
यगोचरतापादनमेव यदि भावनं तदभ्युपगम्यत एव।
यच्चोक्तं संवेदनात्मकस्य व्यङ्ग्यपरसंवित्तिगो-
चरः आस्वादनात्मानुभवो रसः काव्यार्थ उच्यत इति तत्र व्यज्यमानतया व्यङ्ग्यो
लभ्यते। अनुभवेन च तद्विषय इति मन्तव्यम्।
नन्वेवं कथं रसतत्त्वमास्तां किं कुर्मः॥ आ-
म्नायसिद्धे किमपूर्वमेतत्। संविद्विकासेऽधिगतागमित्वं। ~~इत्थं स्वयंग्राह्यमहार्हहेतु-~~
~~द्वन्द्वेन किं दूषयिता न लोकः~~

इत्थं स्वयंग्राह्यमहार्हहेतु
द्वन्द्वेन किन्दूषयिता न लोकः।
ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं
धीः पश्यति श्रान्तिमवेदयन्ती॥
फ
अलं तदाद्यैः परिकल्पितानां

विवेकसोपानपरम्पराणाम्।

चित्रं निरालम्बनमेव मन्ये
प्रमेयसिद्धौ प्रथमावतारम्।
तन्मार्गलाभे सति सेतुबन्ध-
पुरप्रतिष्ठादि न विस्मयाय॥
तस्मात्सतामत्र न दूषितानि
मतानि तान्येव तु शोधितानि॥
पूर्वप्रतिष्ठापितयोजनासु
मूलप्रतिष्ठाफलमामनन्ति॥

तदुच्यतां परिशुद्धतत्त्वं उक्तमेव मुनिना नत्वपूर्वं किंचित्। तथाह्याह। काव्या-
र्थान् भावयन्तीति तत्काव्यार्थो रसः। यथा हि रात्रिरासते तामजौ प्रावादिन्यायो
अर्थितादिलक्षितस्याधिकारिणः प्रतिपत्तिमात्रादितीव्रपरोचितान् प्रथमप्रवृ-
त्तादनन्तरं अधिकैवापान्तकाल तिरस्कारिणैवास्ते। प्रदर्शनीत्यादिरूपा संक्रम-
णादिस्वभावा यथादर्शनं प्रतिभाकुलादिविध्युद्योगाद्विभाषाभिर्न्यवहृता प्रति-
पत्तिस्तथैव काव्यात्मकादथशब्दात् अधिकारिणोऽर्थिकास्ति प्रतिपत्तिः अधि-
कारी चात्र विमलप्रतिभानशालिहृदयः। तस्य च ग्रीवाभङ्गाभिराममिति
उमापि नीलालकेति हरस्तु किंचिदित्यादिवाक्येभ्यो वाक्यार्थप्रतिपत्तेरन-
न्तरं मानसी साक्षात्कारात्मिका अपहस्तिततत्तद्वाक्योपात्तकालादिविभागा [प्र]
तावत् प्रतीतिरुपजायते तस्याश्च यो मृगपोतकादिर्भाति तस्य विशेषरूप-
त्वाभावात् भीत इति त्रासकस्यापारमार्थिकत्वात् भयमेव परं देशकालाद्यना-

लिङ्गितं तत एव भीतोऽहं भीतोऽयं शत्रुर्वयस्यो मध्यस्थोऽन्येति त्यादि प्रत्ययेभ्यो
दुःखसुखादिकृतहानादिबुद्ध्यन्तरोदयविघ्नवत्तया नियमवत्तया विघ्नबहुले-
भ्यो विलक्षणं निर्विघ्नप्रतीतिग्राह्यं साक्षादिव हृदये निवेश्यमानं चक्षुषोरिव
विपरिवर्तमानं भयानको रसः। तथाविधे हि भये नात्यन्ततिरस्कृतो न वि-
शेषत उल्लिखितः एवं परोऽपि तत एव न परिमितमेव साधारण्यमपि तु विततं
व्याप्तिग्रह इव धूमाग्न्योः भयकम्पयोरेव वा तदत्र साक्षात्कारायमाणत्वे परि-
पोषिका नटादिसामग्री यस्यां वस्तु सतां काव्यार्पितानां च देशकालप्रमात्रा-
दीनां नियमहेतूनामन्योन्यप्रतिबन्धबलादत्यन्तमपसरणे स एव साधारणी-
भावः सुतरां पुष्यन्ति। अत एव सर्वसामाजिकानामेकघनतैव प्रतिपत्तेः सुतरां
रसपरितोषाय सर्वेषामनादिवासनाचित्रीकृतचेतसां वासनासंवादात् सचा-
विघ्नासंविच्चमत्कारः तद्वैरपि कम्पपुलकोल्लुकसनादिर्विकारश्चमत्कारः
यथा: अङ्गविहरी चमं कइकह विण मन्दरेण दक्कि आ कुंचदकका दकसंचिआ
इक इं शिइ अंगाइ। तथाहि सचातृप्तिव्यतिरेकेणाच्छिन्नो भोगावेश इत्युच्यते
भुञ्जानस्याद्भुतभोगस्पन्दाविष्टस्य च मनःकरणं चमत्कार इति सच साक्षात्कार-
स्वभावो मानसो ध्यवसायो वा सङ्कल्पो वा स्मृतिर्वा तथात्वेनास्फुरत्यस्तु
यदाह—

रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुकी भवति यत्सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

इत्यादि सर्वथाख्याताद्देषास्ति प्रतीतिरास्वादात्मा यस्यां रतिरेव भाति ततएव
विशेषान्तरानुपहितत्वात् सा रसनीया सती न लौकिकीति मिथ्यानां निर्व्या-
ख्याना लौकिकं तुल्या न तदारोपादिरूपा यथैव चोपचयावस्थासु देशाद्यनि-
यन्त्रणात् अनुकार्योऽप्यभावानुगामितया करणात् विषयसामग्र्यामपि भवत्
विज्ञानवादावलम्बनात् सर्वथा रसनात्मकवीतविघ्नप्रतीतिग्राह्यो भाव एव र-
सस्तत्र विघ्नापसारका विभावप्रभृतयः।

तथा हि। लोके सकलविघ्नविनिर्मुक्ता संवित्तिः एव
[एवं] चमत्कारनिर्वेशरसनास्वादनभोगसमापत्तिलयविश्रान्त्यादिशब्दैरभि-
धीयते। विघ्नाश्चास्यां प्रतिपत्तावयोग्यतासंभावनाविरहो नाम स्वगतत्वपर-
गतत्वनियमेन देशकालविशेषावेशो निजसुखादिविवशीभावः प्रतीत्युपायवै-
कल्यं स्फुटत्वाभावोऽप्रधानता संशययोगश्च।

तथाहि संवेद्यमसंभावयमानः संवेद्ये सं-
विदं निवेशयितुमेव न शक्नोति। का तत्र विश्रान्तिरिति प्रथमो विघ्नः तदप-
सारणे हृदयसंवादो लोकसामान्यवस्तुविषयः आलोकसामान्येषु चेष्टितेषु
अखण्डितप्रसिद्धिजनितगाढारूढप्रत्ययप्रसरकारी प्रख्यातरामादिनामधेय-
परिग्रहः अतएव निस्सामान्योत्कर्षोपदेशव्युत्पत्तिप्रयोजने नाट-
कादौ प्रख्यातवस्तुविषयत्वादिनियमेन निरूपयिष्यते। न तु प्रहसनादौ।
तच्च स्वावसर एव वक्ष्याम इत्यास्तां तावत्। स्वैकगतानां च सुखदुःखसंविदामा-
स्वादयथासंभवं तदपगमभीरुतया वा तत्परिरिरक्षाद्यागततया वा तत्सदृशार्जि-
जीषया वा तज्जिहासया वा तत्प्रचिख्यापयिषया वा तद्गोपनेच्छया वा

प्रकारान्तरेण वा संवेदनान्तरसमुद्गम एव परमो विघ्नः परगतत्वनियमभा-
जामपि सुखदुःखानां संवेदने नियमेन स्वात्मनि सुखदुःखमोहमाध्यस्थ्या-
दिसंविदन्तरोद्गमनसंभावनादवश्यंभावी विघ्नः तदपाकरणे कार्यो नातिप्रस-
ङ्गोऽत्रेत्यादिना पूर्वरङ्गनिरूहणेन प्रस्तावनावलोकनेन च यो नटरूपतापरि-
गमः तत्पुरस्सरः प्रतिशीर्षकादिना तत्प्रच्छादनप्रकारोऽभ्युपायः अलौकिकभा-
षादिभेदलास्याङ्गरङ्गपीठमण्डपगतकक्ष्यादिपरिग्रहनाट्यधर्मिसहितः तस्मिन्
हि तस्यैव अत्रैव एतस्यैव च सुखं दुःखं चेति न भवति प्रतीतिः स्वरूपस्य निह्नवा-
द्रूपान्तरस्य चारोपितस्य प्रतिभाससन्धौ विश्रान्तिवैकल्येन स्वरूपे विश्रान्त्यभा-
वात् सत्यम्। तदीयरूपनिह्नवमात्र एव पर्यवसानात्।"

तथा हि। आसीनपाठ्यपुष्पगण्डिकादि
लोके न दृष्टम्। नत्र च तन्न किंचित् कथंचित् संभाव्यत्वादिति स एष सर्वो मुनिना
साधारणीभावसिद्ध्या रसचर्वणोपयोगित्वेन परिकरबन्धं समाश्रित इति तत्रैव
स्फुटीभविष्यतीति। तदिह तावन्नोपनमनीयम्। ततः स एष स्वपरनियतता-
विघ्नापसारणप्रकारो व्याख्यातः। निजसुखादिविवशीभूतश्च कथं वस्त्वन्तरे
संविदं विश्रामयेदिति तत्प्रत्यूहव्यपोहनाय प्रतिपदार्थनिष्ठैः साधारण्यम-
हिम्ना सकलभोग्यत्वसहिष्णुभिः शब्दादिविषयमयैः आतोद्यगानविचित्र-
मण्डपपदविदग्धगणिकादिभिः उपरञ्जनं समाश्रितम्। येनाहृदयोऽपि हृदय-
वैमल्यप्राप्त्या सहृदयी क्रियते। उक्तं हि दृश्यं श्राव्यं चेति। I/XI

किंच प्रतीत्युपायानामभावे कथं प्रतीतिं स्फुट-
यतीति कश्चिच्छब्दलिङ्गसंभवेऽपि न प्रतीतिर्विश्राम्यति स्फुटप्रतीतिरूप-

प्रत्यक्षोचितप्रत्ययसाकांक्षत्वात् ॥

यथाहुः सर्वा चेयं प्रमितिः प्रत्यक्षपरेति ॥

स्वसाक्षात्कृते आगमानुमानशतैरपि अनन्यथाभावस्य स्वसंवेदनात् । अलात-
चक्रादौ सक्षात्कारान्तरेणैव ब.तुंवत्ता तदवधारणादिति लौकिकस्तावदयं
क्रमः तस्मात्तदुभयविघ्नविघातेऽभिनयबोधकधर्मिवृत्तिप्रवृत्त्युपस्कृताः सम-
भिषिच्यन्ते । अभिनयनं हि सशब्दलिङ्गव्यापारविसदृशमेव प्रत्यक्षव्यापार-
कल्पमिति निर्णेष्यामः । अप्रधाने च वस्तुनि कस्य संविद्विश्राम्यति तस्यैव
प्रत्ययस्य प्रधानान्तरं प्रत्यनुधावतः स्वात्मनि अविश्रान्तत्वात् । अतोऽप्रधानत्वं
जडे विभावानुभाववर्गे व्यभिचारिणि च ये च संविदात्मकेऽपि नियमेनान्यमुख-
प्रेक्षिणी संभवतीति तदतिरिक्तः स्थाय्येव तथा चर्वणपात्रं तत्र पुरुषार्थनिष्ठाः
काश्चित्संविद इति प्रधानं तद्यथा रतिः कामतदनुषङ्गिधर्मार्थनिष्ठा क्रोधः
तत्प्रधानेष्वर्थनिष्ठः कामधर्मपर्यवसितोऽपि उत्साहः समस्तधर्मादिपर्यवसितः
तत्त्वज्ञानजनितनिर्वेदप्रायो विभावो मोक्षोपाय इति तावदेषां प्राधान्यम् । यद्यपि
चैषामपि अन्योन्यं गुणभावोऽस्ति तथापि तत्प्रधाने रूपके तत्तत्प्रधानं भव-
तीति रूपकभेदपर्यायेण सर्वेषां [प्राधान्यमेषां] लक्ष्यते । अङ्कुरभागादिनिविष्ट-
दृशास्त्वेतस्मिन्नपि रूपके पृथक्प्राधान्यम् । तत्र सर्वेऽमी सुखप्रधानाः स्वसंवि-
च्चर्वणरूपस्य एकघनस्य प्रकाशस्यानन्दसारत्वात् ।

तथाहि एकघनशोकसंविच्चर्वणेऽपि लोकेऽस्ति
लोकस्य हृदयविश्रान्तिरन्तरायशून्यविश्रान्तिशरीरत्वात् । अविश्रान्तिरूपतैव
दुःखं तत एव कापिलैर्दुःखस्य चाञ्चल्यमेव प्राणत्वेनोक्तं रजोवृत्तितां वदद्भिरित्या-

न्दरूपता सर्वरसानाम् । किन्तु उपरञ्जकविषयवशात् तेषामपि कटु किमा-
स्ति । स्पर्धो वीरस्य स हि क्लेशासहिष्णुतादिप्राण एव ।

एवं रत्यादीनां प्राधान्यं हासादीनान्तु सातिश-
यं सकललोकसुलभविभावतयोपरञ्जकत्वमिति प्राधान्यम् । अत एवानुत्तम-
प्रकृतिषु बाहुल्येन हासादयो भवन्ति पामरप्रायः सर्वोऽपि हसति शोचति परं
निन्दात्मा म्रियते अल्पसुभाषितत्वेन च सर्वत्र विस्मयते रत्याद्यङ्गतया तु
पुमर्थोपयोगित्वमपि स्यादेषाम् । एतद्गुणप्रधानभावकृत एव च दशरूपकादि-
भेद इति वक्ष्यामः । स्थायित्वं चैतावतामेव जात एव हि जन्तुरियतीभिः संवि-
द्भिः परीतो भवति ।

तथाहि दुःखसंश्लेषविद्वेषी सुखास्वादनसादरः
इति न्यायेन सर्वो रिरंसया व्याप्तः स्वात्मन्युत्कर्षमानितया परमुपहसन्नभीष्ट-
वियोगसन्तप्तः तद्धेतुषु कोपपरवशोऽशक्तश्च ततो भीरुः किंचिदाजिषुजि-
षुरपिचितवस्तुविषयवैमुख्यात्मतयाक्रान्तः किंचिदनभीष्टतयाभिमन्यमानः
तत्तत्स्वकर्तव्यदर्शनसमुदितविस्मयः किंचिच्च जिहासुरेव जायते न ह्येतच्चि-
त्तवृत्तिवासनाशून्यः प्राणी भवति केवलं कस्यचित् काचिदधिका चित्तवृत्तिः
काचिदूना कस्यचिदुचितविषयनियन्त्रिता कस्यचिदन्यथा । तत्काचिदेव पुमर्थो-
पयोगिनीत्युपदेश्या । तद्विभावकृतश्चोत्तमप्रकृत्यादिव्यवहारः ।

ये पुनरमी ग्लानिशङ्काप्रभृतयश्चित्तवृत्तिविशे-
षाः ते समुचितविभावाभावात् जन्मध्येऽपि न भवन्त्येव । तथाहि रसायन-
मुपयुक्तवतो मुनेः ग्लान्यालस्यश्रमप्रभृतयो नोत्तिष्ठन्ति । ~~यस्यापि भवन्ति~~

यस्यापि भवन्ति विभावत्वात् कस्यापि हेतुप्रक्षये क्षीयमाणाः संस्कारशेष-
कान्तानुसन्धानावशयमनुबध्नन्ति उत्साहादयस्तु संपादितदस्वकृत्यकर्तव्यतयाप्र-
लीनकल्पा अपि संस्कारशेषतां नातिवर्तन्ते कर्तव्यान्तरविषयस्योत्साहादेः अ-
खण्डनात् यथा पातञ्जलिः नहि चैत्र एकस्यां स्त्रियां रक्त इत्यन्यासु विरक्त
इत्यादि तस्मात् स्थायिरूपचित्तवृत्तिसूत्रस्यूता एवामी व्यभिचारिणः स्वा-
त्मानमुदयास्तमयवैचित्र्यशतसहस्रधर्माणं प्रतिलभमाना रक्तनीलादिसूत्र-
स्यूतविरलभावो : भवनसंभावितभङ्गीसहस्रगर्भस्फटिककाचभ्रमकपद्म-
रागमरकतमहानीलादिमयगोलकवत्तस्मिन् सूत्रे स्वसंस्कारवैचित्र्यमनिवे-
शयन्तोऽपि तत्सूत्रकृतमुपकारसन्दर्भं विभ्रतमः स्वयं च विचित्रार्थस्थायि-
सूत्रं च विचित्रयन्तोऽन्तरान्तरा शुद्धमपि स्थायिसूत्रं प्रतिभासावकाशमुप-
हयन्तोऽपि पूर्वापरव्यभिचारिरत्नच्छायाशबलिमानमवशयमानयन्तः प्रति-
भासन्त इति व्यभिचारिण उच्यन्ते।

तथा हि ग्लानोऽयमित्युक्ते कुत इति हेतु-
प्रश्नेन स्थायी तस्य सूच्यते नतु राम उत्साहशक्तिमानित्यत्र हेतुप्रश्नमाहुः
अत एव विभावास्तत्रोद्बोधकाः सन्तः स्वरूपोपरञ्जकत्वं विदधाना रत्युत्साहादेः
उचितानुचितत्वमात्रमावहन्ति नतु तदभावे सर्वथैव ते निरुपाख्याः वासना-
त्मना सर्वजन्तूनां तन्मयत्वेनोक्तत्वात्।

व्यभिचारिणान्तु स्वविभावाभावे नामापि
नास्तीति वितनिष्यते चैतद्यथायोगं व्याख्यावसरे। एवमप्रधानं च निरासः
स्थायिनि रूपणायास्थायिभावानां सत्त्वमित्यनया सामान्यलक्षणशेषभूतया
विशेषलक्षणनिष्ठया च कृतः।

तत्रानुभावानां विभावानां व्यभिचारिणां च पृ-
थक् स्थायिनि नियमो नास्ति। बाष्पादेः आनन्दाक्षिरोगादिजत्वदर्शनात् व्या-
घ्रादेश्च क्रोधभयादिहेतुत्वात् श्रमचिन्तादेरुत्साहभयाद्यनेकसहचरत्वाव-
लोकनात् . . . व्यभिचारिणि।

तथा हि "बन्धुविनाशो यत्र विभावः परि-
देविताश्रुपातादिस्त्वनुभावः चिन्तादैन्यादिव्यभिचारिणः सोऽवश्यं शोक एवे-
त्येवं संशयोदये शङ्कात्मकविघ्नशमनाय संयोग उपात्तः। तत्र लोकव्यवहारे
कार्यकारणसहचारात्मकलिङ्गदर्शने स्थाय्यात्मपरचित्तवृत्त्यनुमानाभ्यासपाट-
वादधुनातैः अपायानकटाक्षवृक्षादिभिः लौकिकीं कारणत्वादिभुवमतिक्रान्तैः
विभावनानुभावनासमुपरञ्जकत्वमात्रप्राणैः अत एवालौकिकविभावादिव्य-
पदेशभाग्भिः प्राच्यकारणादिरूपसंस्कारोपजीविनः स्थापनाय विभावादिना-
मधेयव्यपदेश्यैः भावाध्यायेऽपि वक्ष्यमाणस्वरूपभेदैः गुणप्रधानतापर्याये-
ण सामाजिकधियि सम्यग्योगं संबन्धमैकाग्र्यं वासादितवद्भिः अलौकिक-
निर्विघ्नसंवेदनात्मकचर्वणागोचरतां नीतोऽर्थः चर्व्यमाणतैकसारो नतु सिद्धस्व-
भावः। तात्कालिक एव नतु चर्वणातिरिक्तकालावलम्बी स्थायिविलक्षण एव रसः

ननु यथा शङ्कुकादिभिरभ्यधीयत स्थाय्येव
विभावादिप्रत्ययारभ्यमाणत्वात् रस उच्यत इति। एवं हि लौकिकेऽपि किन्नरसः
असतोऽपि हि यत्र रसनीयता [स्यात्] तत्र वस्तुसतः कथं न भविष्यति तेन स्थायि-
प्रतीतिरनुमितिरूपा प्राप्या न रसः अत एव सूत्रे स्थायिग्रहणं नतु तत्तत्प्रत्युत

शल्यभूतं स्यात्। केवलमौचित्यादेवमुच्यते। स्थायी रसीभूत इति। अपितु

तत्स्थायिगतत्वेन कारणादितया प्रसिद्धानामधुना चर्वणोपयोगितया विभावा-

दित्वावलम्बनात् तर्हि हि लौकिकचित्तवृत्त्यनुमाने का रसता तेनालौकिकचम-

त्कारात्मा रसास्वादः स्मृत्यनुमानलौकिकस्वसंवेदनविलक्षण एव। तथाहि

लौकिकेनानुमानेन प्रमदादिनाताटस्थ्येन प्रतिपद्यन्ते। अपितु हृदयसंवा-

दात्मकसहृदयत्वबलात् पूर्णीभविष्यद्रसास्वादाङ्कुरीभावेनानुमानस्मृत्यादि-

सोपानमारुह्यैव तन्मयीभावोचितचर्वणाप्राणतया। नच सा चर्वणा प्राथमा-

नान्तराद्येनाधुना स्मृतिः स्यात्। नचात्र लौकिकप्रत्यक्षादिप्रमाणव्यापारः

किं च लौकिकविभावादिसंयोगेन बलोपनतैवेयं चर्वणा साच प्रत्यक्षानुमाना-

गमोपमानादिलौकिकप्रमाणजनितरत्याद्यवबोधनस्तथा योगिप्रत्यक्षजनित-

परसंवित्तिज्ञानात् सकलवैषयिकोपरागशून्यशुद्धचुरयोगिगतस्वानन्दे-

कसनानुभवाच्च विशिष्यते। एतासां यथायोगमार्जनादिविघ्नान्तरोदयात् ताट-

स्थ्येस्फुटत्व विषयावेशमिवपङ्कचकृतसौन्दर्यविरहात्।

अत्र तु स्वात्मैकगतत्वनियमासंभवात्

[स्वानुप्रवेशात् परगतत्वनियमाभावात्] तद्विभावादिसाधारण्यवशासंप्रबुद्धो-

चितनिजरत्यादिवासनावेशवशाच्च नविघ्नान्तरादीनां संभवः। इत्यवोचाम

बहुशः। अत एव विभावादयो न निष्पत्तिहेतवो रसस्य तद्बोधावगमेऽपि

रससंभवप्रसङ्गात्। नापि ज्ञप्तिहेतवो येन प्रमाणमध्ये पतेयुः। सिद्धस्य

कस्यचित्प्रमेयभूतस्य रसस्याभावात्। किन्तर्ह्येते तर्हि विभावादय इत्यलौ-

किक एवायं चर्वणोपयोगी विभावादिव्यवहारः तोऽन्यत्रत्यदृष्टमितिचेद्भूषण-

मेतत् अस्माकमलौकिकत्वसिद्धेः पानकरसास्वादोऽपि किं गुडमरिचादिषु

दृष्ट इति समानमेतत्।

नन्वेवं रसैः प्रमेयस्यादेवं युक्तं भवितुमर्हति।

रस्यतैकप्राणोऽह्यसौ न प्रमेयादिस्वभावः। तर्हि सूत्रे निष्पत्तिरिति कथन्नेयं

रसस्यापि तु तद्विषयरसनायास्तन्निष्पत्त्या तु यदि तदेकायत्तजीवितस्य

रसस्य निष्पत्तिरुच्यते नकश्चिदत्र दोषः। सा च रसना न प्रमाणं नाव्यापारो

नकारकव्यापारः स्वयन्तु नाप्रामाणिकः स्वसंवेदनसिद्धत्वात् रसनाच बोध-

रूपैव किन्तु बोधान्तरेभ्यो विलक्षणैवोपायानां विभावादीनां लौकिकवैलक्ष-

ण्यात् तेन विभावादिसंयोगात् रसना यतो निष्पद्यते ऽतस्तथाविधरसना-

गोचरो लोकोत्तरोऽर्थो रस इति तात्पर्यं। सूत्रस्य।

अयमत्र संक्षेपः। मुकुटप्रतिशीर्षकादीनां

तावत् नटबुद्धिराच्छाद्यते गाढप्राक्तनसंवित्संस्काराच्च काव्यबलानीयमाना-

पि न तत्र रामधीर्विश्राम्यति। अत एवोभयदेशकालत्यागः। रोमाञ्चादयश्चानु-

यसा रतिप्रतीतिकारितया दृष्टास्तत्रापि लौकिकत्वादेशकालानियमेन रतिं

गमयन्ति। यस्यां स्वात्मापि तद्वासनात्वादनुप्रविष्टोऽत एव तटस्थतया रत्यव-

गमः। न च नियतकारणतयार्जनादिअङ्गाकिसंभावना नच नियतपरागात्म-

कतया येन दुःखद्वेषाद्युदयः तेन साधारणीभूता सन्तानवृत्तेरेकस्या एव वा

संविदो गोचरीभूता रतिः शृङ्गारः साधारणीभावादिभिरिति तत्र विभावप्राधान्य

स्वथामणिमयाकिलोकन्दलितस्य विभ्रममथोद्धुर्यं वपुस्ते दृशोः भिङ्गीभ-

ङ्गुरकामकार्मुकमिदं भ्रूनर्मकर्मक्रमः॥ आपातेऽपि विकारकारणमहो वक्त्राम्बुज-

न्मासवः सत्यं सुन्दरि बोधशास्त्र जगतीसारत्वमेकाकृतिः। अत्र च विभावकृतं तत्सौन्दर्यं प्राधान्येन भाति॥ तदनुगतत्वेन केलीविभ्रमभङ्गुरनर्मवचोमहिम्ना चानुभाववर्गो भङ्गीक्रमविकारादिशब्दैः बलाच्च व्यभिचारिवर्गः प्रतिभातीत्यत एव नास्फुटत्वाशङ्कात्र रत्यास्वादमये शृङ्गारे विधेया अनुभावप्राधान्यं यथा शब्दसारस्वतप्रवाहपवित्रसकलवाङ्मयमहार्णवपूर्णभावसंपादनद्विजराजस्य इन्दुराजस्य। यद्विभ्रम्य लो कि केषु न दु शिशानि स्थेमुनी लोचने यद्गात्राणि दरिद्राति प्रतिदिनं लूनाब्जिनीनालवत्। दूर्वाकाण्डविडम्बकश्च निबिडो यत्पाण्डिमा गण्डयोः कृष्णे यूनि सयौवनासु वनितास्वेषैव वेषस्थितिः। अत्र विभ्राम्येति बहुशः इति प्रतिदिनमिति पदसमर्पितो व्यभिचारिणः कृष्ण इत्यादिपदार्पितश्च विभावो गुणत्वेन प्रतिभासते। विश्रान्तिलक्षणस्तम्भविलोकनवैचित्र्यगात्रता-नवतारतम्यपुलकवैवर्ण्यप्रभृतिस्त्वनुभावसञ्चयः प्रधानतया। व्यभिचारिणां तु प्राधान्यं यद्विभावानुभावप्राधान्यं कृतं तत्राद्यं यथा महाकवेः कलशकस्य—

आत्तमात्तमधिकान्तमीक्षितुं
कातरा शफरशाङ्गिनी जहौ॥
अञ्जलौ जलमधीरलोचना
लोचनप्रतिशरीरलाञ्छितम्॥

इत्यत्र सुकुमारप्रमदाजनभूषणभूतस्य व्यभिचारिवर्गस्य वितर्कत्रासशङ्कादेः प्राधान्यं तद्विभावानां प्राधान्यादिसौन्दर्यातिशयकृतादात्तमित्याद्यर्पितानुभाववर्गस्तु तदनुयायी।

एवं द्वयप्राधान्ये चोदाहार्यम्। किं तु समप्राधान्य एव रसा-

स्वादस्योत्कर्षः। तच्च प्रबन्ध एव भवति॥

वस्तुतस्तु दशरूपक एव यदाहुराम्नाः। सन्दर्भेषु दशरूपकं श्रेयः तद्धि चित्रं चित्रपटवत् विशेषसाकल्यादिति तद्रूपसमर्पणत्वात् प्रबन्धे भाषावेषप्रवृत्त्यौचित्यादिकल्पनात् तदुपजीवनेन मुक्तके। तथा च तत्र सहृदयाः पूर्वापरमुचितं परिकल्प्य ईदृगत्र वक्तास्मिन्नवसर इत्यादि बहुतरं पीठबन्धरूपं विदधते। तेन ये काव्याभ्यासप्राक्तनपुण्यादिहेतुबलादितिसहृदयाः तेषां परिमितविभावाद्युन्मीलनेऽपि परिस्फुट एव साक्षात्कारकल्पः काव्यार्थः स्फुरत्यत एव तेषां काव्यमेव प्रतीत्युत्पत्तिकृदनपेक्षितनाट्यमपि तेषामपि तु नाट्यनिपतिताः स्फुरिताः शशिरश्मय इति न्यायेन सुतरां निर्मलीकरणं अहृदयानां च तदेव नैर्मल्याधायि यत्र पतिता गीतवाद्यगणिकादयः नन्यसनितायेपर्यवस्यन्ति। नाट्योपलक्षणात् तत्र च नाट्यध्याविनामिदं ध्यानपदं न हि तत्रायमेव सिन्दूरादिमयो वासुदेवस्मरणीयप्रतिपत्तिरपि तु तदुपायद्वारेणातिस्फुटीभूत सङ्कल्पगोचरो देवताविशेषो ध्यायिनां फलकृत्। तद्वन्नाट्यप्रक्रियाद्वारकोदितातिस्फुटाध्यवसायविषयितो नियतदेशकालाद्यस्पृष्टस्तु तदिदं फलमिति विधिस्थानीयोऽर्थः व्युत्पत्तिर्विमृतरनियुते दृश्यव्यनियमादौ चित्तवृत्त्यादौ बानबोधकोदयः। सम्यग्ज्ञानभूतं होवेदं पूर्णस्तेन राम इत्येव प्रतीतिर्न त्वयं रामोऽयमिति स्फुटीकरिष्यते चैतदग्रतः तत्रालौकिकोऽयमर्थो न दृष्टान्तमन्तरेण हृदयं गमीभवेदित्याशयेनाह—दृष्टान्तः बहूनां संयोगात् अपूर्वो रस उत्पद्यमानः कटुष्ट इत्यर्थः।

अत्र प्रश्ने भाष्येण प्रतिवचनमाह—यथेत्यादिना॥

*नाट्योपलक्षणात्

आप्नुवन्तीत्युक्तेन" व्यञ्जनमुपसेचनद्रव्यं तत्र नानाम्लमधुरचुक्रादिभेदादधि-
काञ्चिकादि ओषधयः चिञ्चागोधूमदलहरिद्रादयः द्रव्यं गुडादि। एतेषां पाकक्रमेण
सम्यग्योजनारूपात् कुशलसम्पाद्यात् संयोगात् षाडवादय इति लोकप्रसिद्धेभ्यः
परस्परविविक्तेभ्यः मधुरतिक्ताम्ललवणकटुकषायेभ्यो मिश्रेभ्यश्च विलक्षणः
षाडवशब्दवाच्यः तत्प्रधाना बहुतरा रसनयोग्याः क्रियन्ते। तथैव नाट्येऽपि
विभावादिभिरुपसमीपं प्रत्यक्षकल्पतां गताल्लोकापेक्षया ये स्थायिनो भावास्ते
रस्यमानतैकजीविते सत्त्वं तत्र प्रतिपद्यते।

एतदुक्तं भवति। पाकरूपया सम्यग्योजनया
तावदलौकिको रसो जायते। तत्र च प्रधानत्वेन जलस्य रसाभिव्यञ्जकत्व-
मिति व्यञ्जनं विभावस्थानीयं चिञ्चाहरिद्राद्यनुभावप्रायं द्रव्याणि तु गुडादीनि
तदीयचुक्रादिरसविलक्षणमधुरादियोगात् व्यभिचारिकल्पं स्वात्मनि तदुपजी-
वनेन च परत्र च स्वरससंक्रमणया वैचित्र्याधायकत्वात्।

अत्र तु स्थायिकल्पः तन्मिश्रणासमयभावी
रसविशेषो विभावकल्पव्यञ्जनजन्मतो मन्तव्यः। स हि लौकिकः। अयं तु
कुशलैकनिवर्त्यः तद्विदां रसनीयो भवति तेनादस्येत्यध्याहारो न युक्तो यथा हि
दार्ष्टान्तिकस्य तत्स्थायिग्रहणं शल्यकल्पमिति त्रयमेवोपात्तम्, तथा दृष्टान्तेऽपि
त्रयस्यैवोपादानं युक्तम्।

एवं सूत्रं व्याख्याय लक्षणपदं परीक्षितुमा-
क्षिपति रस इति" कइत्यादिना मधुरादौ पारदे विषये सारे जलसंस्कारेऽभिनि-
वेशे काथे देहधातोः निर्यासे चायं प्रसिद्धो न त्वन्यत्र तेन रस इतिपदस्य

शृङ्गारादिषु प्रवर्तितस्य कोऽर्थः किं प्रवृत्तिनिमित्तं। कथ्यते। स्वाभिधेयनिय-
मायशब्देन यदिवा तत्प्रयोक्तृप्रतिपत्तिभिरित्यर्थः प्रवृत्तिनिमित्तम्। अत्रोत्त-
रम्। आस्वाद्यत्वात् प्रवृत्तिहेतोर्यतः प्रश्नः तेनोत्तरे हेतुविभक्तिरेव दत्तम्।
तेन क्रिया प्रवृत्तिनिमित्तमस्येत्युक्तं भवति।

यस्तु भेहकव्याचष्टे रस इति कोऽयं शब्दस्त-
त्रोत्तरं परमार्थ उच्यत इति तस्यानेनेत्यध्याहारं विना प्रकृतपदार्थवाचकोऽयं
शब्द इति न तात्पर्यकल्पनं विनापि नातीव सङ्गतमुत्तरं प्रश्नमन्तरेण चा-
स्वाद्यत्वादित्यल्पपदप्रायमित्यास्तामेतत्"

अथ प्रवृत्तिनिमित्तं व्याक्षिपति कथ-
मास्वाद्यत इति। आस्वादनं हि रसनेन्द्रियजज्ञानं प्रसिद्धमिति भावः। अत्रो-
पचरितक्रियाश्रयेणोत्तरमाह- यथा नामेत्यादिना" यथातथाशब्दाभ्यां सादृ-
श्यमत्रोपचारे निमित्तमिति दर्शयति। तत्र भोग्यस्य भोक्तुः फलस्य च
साम्यं दर्शयति। यथा हि व्यञ्जनसंस्कृतं ते आस्वाद्यता एकाग्रमनसि च
भोक्तर्यास्वादयितृता अन्यचित्तस्य भुञ्जानस्यापि आस्वादाभिमानाभावात्
प्रहर्षाप्यायजीवनपुष्टिबलारोग्याणां चास्वादफलता तथाभिनयाभिनयव्यञ्जि-
ते अचिन्त्या स्थायिशब्दव्यपदेश्ये रसे आस्वाद्यता एकाग्रे च सामाजिके तन्म-
यीभूते आस्वादयितृता हर्षप्रधानानां धर्मादिव्युत्पत्तिवैदग्ध्यादीनां आस्वाद-
फलत्वमिति कर्मकर्तृफलसादृश्याद्विभावादिजः प्रतीतिविशेषो रसनाक्रियेति
व्यपदिष्ट इति तात्पर्यम्। यत्नं सुमनसो भुञ्जाना हर्षादींश्चाधिगच्छन्ति। तेन रसानास्वा-
दयन्तीति अनेन शब्देन अभिहितः सर्वत्र विशेषेणान्ये भोक्तृविलक्षणतया आ

समन्तात् ख्याताः प्रसिद्धाः यथा चैते तथा प्रेक्षका अपि तेन तेऽपि स्थायिनः आस्वादयन्तीति आभिमुख्येन साक्षात्त्वेन व्याख्याता अस्माभिः व्यवहृताः अत्रोपसंहारः तस्मान्नाट्यरसाः।

अन्ये त्वादिशब्देन शोकादीनामत्र संग्रहः।

स च न युक्तः। सामाजिकानां हि हर्षैकफलं नाट्यं न शोकादिफलं तथात्वे निमित्ताभावात्। तत्परिहारप्रसङ्गाच्चेति मन्यमाना हर्षांश्चाधिगच्छन्तीति पठन्ति। एवं ग्रन्थयोजनायां स्पृष्टायां यत्कैश्चिदत्र चोदितं दृष्टान्ते आकरसमान्नामानश्चेति त्रयं प्रकृते तु रसनेति। परिहृतं च आत्मन एवात्र स्थानान्तरसङ्क्रान्तस्य मनःस्थानीयता। मनसश्च रसनास्थानीयत्वेति तत्सर्वं वृथा नाट्यमात्रमुपचारबीजस्य सादृश्यस्यात्र प्राधान्येन प्रतिपादयिषितत्वादित्यास्ताम्।

एवं रसत्वं केन तेषामिति यत्प्रश्नितं तत्प्रतिसमाहितम्। अत्रेति भाष्ये अनुवंशभवौ शिष्याचार्यपरम्परासु वर्तमानौ तस्तौ कारव्यौ वृत्तविशेषौ सूत्रार्थसंक्षेपप्रकटीकरणेन कारिकाशब्दवाच्यौ भवतः परिपठितौ यथा बहुद्रव्ययुक्तैर्व्यञ्जनैः बहुभिर्युक्तं आस्वादयन्ति तम्।

आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः।
भावाभिनयसंबन्धात् स्थायिभावास्तथा युताः।
आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः।"

मधुरादिभेदात् बहूनि द्रव्याणि गुडादीनि बहुभिरिति दधिकाञ्चिकादिभिः अनेन विभावभेदं रसभेदे हेतुत्वेन सूचयन्ति। भुञ्जाना आस्वादयन्तीति रसनाव्यापारात् भोजनादधिको यो मानसो व्यापारः स एवास्वादनमिति दर्शयन्ति।

एतदुक्तं भवति। न रसनाव्यापार आस्वादनमपि तु मानस एव स चात्रावि कलोऽस्ति। केवलं लोके रसनाव्यापारानन्तरभावी स प्रसिद्ध इत्युपचार इह दर्शित इति शुद्धतत्स्वरूपज्ञानस्वभावा अत्र विभावव्यभिचारिणः अभिनया अनुभावा एवेयं पृथग्वचनं प्राधान्यात् तैर्यैः सम्यग्बन्धा हृदयसंवादक्रमेण तन्मयीभावापन्नप्रमातृभूम्यभेदमुपसंप्राप्ताः अचिन्त्याः स्थायिनः आ समन्तात् साधारणीभावेन निर्विघ्नप्रतिपत्तिवशान्मनसा इन्द्रियान्तरविघ्नसंभावनाशून्येनास्वादयन्ति स्वपरविवेकशून्यस्वादचमत्कारपरवशतया लौकिकान्प्रत्ययानुपार्जनादिविघ्नबहुलायोगिप्रत्ययाच्च विषयास्वादशून्यता परुषादिलक्षणाकारसुखदुःखादिविचित्रवासनानुवेधोपनतहृद्यतातिशयसंविच्चर्वणात्मता भुज्यते। न च धा इति पूर्वोपयोगो लौकिकानां प्रत्यक्षादीनामत्र दर्शितः।

एतदुपसंहरति। तस्मादिति। नाट्यात्समुदायरूपाद्रसाः यदि वा नाट्यमेव रसाः रससमुदायो हि नाट्यं नाट्य एव च रसाः काव्येऽपि नाट्यायमान एव रसः काव्यार्थ[ ]विषये हि प्रत्यक्षकल्पसंवेदोदये
रसोदय इत्युपाध्याया यदाहुः काव्यकौतुके "प्रयोगत्वमनापन्ने काव्येनास्वादसंभवः" इति।
वर्णनोत्कलिताभोग प्रौढोक्त्या सम्यगर्पिताः। उद्यानकान्ताचन्द्राद्या भावाः प्रत्यक्षवत्स्फुटाः इति।

अन्ये तु काव्येऽपि गुणालङ्कारसौन्दर्यातिशयकृतं रसचर्वणमाहुः। वयं तु ब्रूमः। काव्यं तावन्मुख्यतो दशरूपकात्मकमेव। तत्र लुप्तैर्भावा वृत्तकानुनेम पथ्यप्रभृतिभिः पूर्यते [प] रसवत्ता सर्गबन्धादि x यावन्मुक्तं। यत्तु दशरूपकं तस्य योऽर्थस्तदेव नाट्यं यद्वक्ष्यते नाट्यस्यैषा तत्त्वमिति

तस्य हृदयसंवादं तारतम्योपेक्षया श्रोतृप्रतिपत्तिस्फुरणं स्फुटास्फुटत्वेनातिविचित्रं
तत्र ये स्वभावतो निर्मलमुकुरहृदयास्त एव संसारोचितक्रोधमोहाभिलाषपरवशा-
मनसो न भवन्ति । तेषां तथाविधदशरूपकाकर्णनसमये साधारणरसनात्मक-
चर्वणग्राह्यो रससञ्चयो नाट्यलक्षणस्फुट एव ये त्वतथाभूतास्तेषां प्रत्यक्षोचि-
ततथाविधचर्वणालाभाय नटादिप्रक्रिया स्वगतक्रोधशोकादिसङ्कटहृदयग्र-
न्थिभञ्जनाय गीतादिप्रक्रिया च मुनिना विरचिता । सर्वानुग्राहकं हि शास्त्रमि-
ति न्यायात् तेन नाट्य एव रसाः न लोक इत्यर्थः ॥ काव्यं च नाट्यमेव । अतएव च
नटे न रसः कुत्र तद्विस्मृतिशीलो नुबोध्यते । उक्तं हि - देशकालप्रमातृभेदान्निय-
न्त्रितो रस इति ॥

केयमाशङ्का नटे तर्हि किमास्वादनोपायः ।

अतएव च पात्रमित्युच्यते । नहि पात्रे मद्यास्वादोऽपि तु तदुपायकत्वेन प्रमुख-
मात्रे नटोपयोगमिति अलं चित्रपुरस्तराद्यपि च नाट्यस्यैवार्थभागान्निष्यन्दो
यथा सर्गबन्धादिशब्दभागादिष्यन्दः एतच्च योऽर्थो हृदयसंवादीत्यत्र वितत्य
वक्ष्यामः ॥

अन्ये त्वभिनयादिसामग्रीमयं बहिर्दृश्यमानं

नाट्यं नटधर्मकर्मरूपमित्याश्रयेन नाट्याद्रसा इत्याहुः । स्मृता इति संप्रदायावि-
च्छेदं दर्शयति । येति ॥ रत्याद्यनुकरणरूपं रसमाहुरथ चोदयन्ति शोकः कथं सुख-
हेतुरिति परिहरन्ति च अस्तिकोऽपि नाट्यगतानां विशेष इति तत्र चोद्यं ता-
वदसत् । शोको हि प्रतीयमानः किं स्वात्मनि प्रत्येतुर्दुःखं वितनोतीति नियमः
शत्रुदुःखे प्रकर्षात् । अन्यत्र च मध्यस्थत्वात् । उत्तरं तु भावानां वस्तुस्वभाव-

देतत् ।

मात्रेणेति न किंचिदत्रालम् ।

अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्य-
ते तत्र का दुःखाशङ्का । केवलं तस्यैव चित्रताकरणे रतिशोकादिवासनाव्या-
पारस्तदुद्बोधने चाभिनयादिव्यापारः यदेतदुक्तं रसतत्त्वं तदेवमुपशोधयितु-
मुपक्रमते । अत्राहेत्यादिना चोद्यमुखेन नर्तकगतेभ्यो भावा सामाजिकैर्यथा
करुणाच्छोकस्ततोऽपि भावाद्युपचितसामाजिके करुण इति रसाद्भावो भावात्
रस इति सन्देहः । अत एव परस्परमपि जन्मकालभेदेनेति तृतीयपक्षः
यद्वा नट एव राम एव चापूर्वं भावस्तत उपचये रसस्ततोऽप्युपचये भाव इत्येवं
पक्षभूतयोरर्थानाम् इदं चासत् । एवंभूतस्य रसस्वरूपस्य निराकृतत्वात् ।

श्रीशङ्कुकस्त्वाह - अनुकर्तरि रस्यानास्वा-
दयेते अनुकार्ये भावप्रतीतिःप्रयोगे लोके प्रकृतिं रसं निष्पादयतीति द्वितीय-
पक्षो नाट्याचार्याभिप्रेतशिक्षानुसारेण । अत एव च तृतीयोऽपि संभवति । एतद-
प्यसत् । नहि सामाजिकोऽनुकार्यानुकर्तृविभागमवैति । दूषितः स्वानुकरणवादः
तस्माद्वितथमेतत् । किं रसेभ्यो भावा उत विपर्ययः । आहो अन्योन्यजनके-
ति त्रयः प्रश्नाः । आहो शब्दो भिन्नक्रमः विभावादिभ्यस्तावद्रसनिष्पत्तिरु-
क्ता स एष द्वितीयः पक्षोऽभ्युपगतपूर्वमेतच्च कथं नहि लोके विभावानुभावादयः
केचन भवन्ति हेतुकार्यावस्थामात्रत्वात् लोके तेषाम् ॥

अथ तएव रसनोपयोगित्वेऽपि भावादिरू-
पतां प्रतिपद्यन्ते तर्हि रसप्रसादात् भावा विभावादयः । अथोच्यते विभावादि-
प्रसादाद्रसो यथोक्तं प्रागस प्रसवाच्च विभावादिरूपत्वे तर्हि परस्पराश्रयत्वं

इतरेतराश्रयाणि च न प्रकल्पन्त इत्याक्षेपः

अत्र सिद्धान्तमाह- दृश्यन्ते हीति" प्रमदाद्यः

प्रतीतास्सन्तः रसास्वादं विदधते: यथोक्तं प्रागतो न रसेभ्यो भावा भावशब्दार्थ-

पर्यालोचनया चैतदेवोपपन्नमिति श्लोकेनाह- नानाभिनयैः सम्यक् बन्धा

हृदयं गतान् भावयन्ति संपादयन्ति रसांस्तस्माद्भावाः

नन्वेतत् भावशब्दप्रवृत्तिनिमित्तं तत्

प्रकृतं किंचिदुक्तमित्याशंक्य प्रकृते योजयितुमाह- नानाद्रव्यैरिति: व्यज्यत

इति व्यञ्जनस्यानुपाल्लिरसोऽत्राभिप्रेतः बहुविधैरिति व्यञ्जनस्योपलक्षणं

अभिनयैरित्यस्य वा विशेषणं एवं स्थितपक्षमुपसंहरति न भावहीनोऽस्ति

रस इति

अत्र चोद्यवादी स्वाशयमुन्मीलयति:

न भावो रसवर्जित इति' लोके हि न कश्चिद्विभावादिव्यवहार इति भावः"अथ

उत्तरमाह'

परस्परकृता सिद्धिस्तयोरभिनयो भवेत्"

साक्षात्कारे संपन्ने तदुपयोगितया विभावादिव्यपदेश इत्यतो या परस्परकृता

सिद्धिः सा भद्र भवति संपाद्यते भाव्यते एवंभूतमितरेतराश्रयं दूषणमित्यर्थः'

अत्रैव दृष्टान्तमाह व्यञ्जनौषधिसंयोग इति व्यञ्जनौषधिसंयोगोऽन्नं चकर्ट

यथा परस्परमन्योन्यं कर्मभूतं स्वादुतां नयेत् तथा भावा रसाश्चान्योन्यं भावयन्ति

भावा रसान् भावयन्ति निष्पादयन्ति: रसास्तु भावान् भावयन्ति भावान्कुर्वन्ति

विभावादिव्यपदेश्यात् कुर्वन्तीत्यर्थः'

एतदुक्तं भवति: एकत्रैकदा क्रियायामन्योन्या-

श्रयत्वं दोषो न तु क्रियाभेदे यथा व्यञ्जनादिसंयोगेन... हृदि रसवत्ता क्रियते

अन्नेन वाश्रयरूपेण सता व्यञ्जनसुखभोग्यता क्रियते' एवं भावैः रस्यमानता

क्रियते रसैश्च विभावादिव्यपदेश्यता कारणादीनां यथा घटापेक्षया तन्तवः पट-

कारणमिति व्यपदेश्याः तन्त्वपेक्षया पटः कार्यो न चेतरेतराश्रयं तथा प्रकृतेऽपी-

ति"

ननु यदि भावेभ्यो रसास्तर्हि कथमुक्तम् 'न हि रसा-

दृते कश्चिदप्यर्थः प्रवर्तते: तेन पूर्वं त एवोद्देश्या इत्याशंक्याह-

यथा बीजाद्भवेद्वृक्षः वृक्षात्पुष्पं फलं यथा'

तथा मूलं रसास्सर्वे ततो भावा व्यवस्थिताः"

बीजं यथा वृक्षमूलत्वेन स्थितस्तथा रसस्तन्मूलादिप्रीतिपूर्विकाव्युत्पत्तिरिति

ततरेच व्याख्यानार्हात् कविगतसाधारणीभूतसंविन्मूलश्च काव्यपुरस्सरो

नटव्यापारः सैव च संवित्परमार्थतो रसः समाजिकस्य च तत्र नीत्या वशी-

कृतस्य पश्चादपोद्धारबुद्ध्या विभावादिप्रतीतिरिति प्रयोजनं नाट्ये काव्ये सा-

माजिकधीयि च

त एवं मूलं बीजस्थानीयात् कविगतो रसः कविर्हि

सामाजिकतुल्य एव तत एवोक्तं श्रृङ्गारी चेत्कविरित्यानन्दवर्धनाचार्येण'

ततो वृक्षस्थानीयं काव्यम्' तत्र पुष्पादिस्थानीयोऽभिनयादिनटव्यापारः' तत्र

फलस्थानीयः सामाजिकरसास्वादः' तेन रसमयमेव विश्वम्' अत्र च विज्ञान-

वादोद्विधाभिधानं स्फोटकृतत्वं सत्कार्यवाद एकत्वदर्शनमित्यादि च द्रष्टव्यम्

वयन्तु प्रकृतानुपयोगि श्रुतलवसन्दर्शनमिथ्याप्रयाससंश्रयमशिक्षितपूर्विण
इत्यास्ताम् ॥

अन्ये तु बीजादिव भावात् रसवृक्षस्ततोऽप्यभि-
नयकुसुमसुन्दरात् फलमिव भावः प्रतीत्या बुध्यत इति व्याचक्षते । तैः प्रकृतविरु-
द्धं सर्वं व्याख्यातम् । एवं हि भावस्यैवाक्रमपर्यवसानवर्तित्वमुक्तं स्यादित्या-
स्तामेतत् । एवं त्रयोऽपि पक्षाः कथंचिदुपगताः अभिप्रायवैचित्र्येणेति तात्पर्यम् ।
एवमुद्दिष्टानां विभक्तानां च रसानां सामान्यलक्षणं परीक्षापरिशुद्धमभिधाय
तदनुवादपूर्वकं विशेषलक्षणं वक्तुं पीठबन्धं दर्शयति । तदेषामित्यादिना यतः
सामान्यलक्षणमेतेषां कृतं तस्मात् विशेषलक्षणांशपूरकाण्युत्पत्त्यादीनि व्याख्या-
स्यामः । तत्रोत्पत्तिरुत्पादकानामुत्पाद्यानां च विशेषलक्षणमन्योन्यतो व्यवच्छेदात्
उत्पादकानामप्येतदुत्पादकत्वं उत्पादकान्तराद्वैलक्षण्यं उत्पाद्यकृतमेवमुत्पाद्या-
नां उत्पादककृतमिति परस्परलक्षणत्वं वर्णः श्वेतादिनु सुस्पष्टम् । विलक्षणवै-
चित्र्यदर्शनन्तु शृङ्गारो नामेत्यादिना विभावादिविशेषसंयोगः उत्पत्तिलक्षणाद्य-
न्योन्याश्रयशङ्का वर्णदेवतयोस्त्वागमानुविद्धत्वमिति स्फुटं निश्चयदर्शनोपायत्व-
मुत्पत्त्यादीनां न संभवति विभावादिविशेषसंयोगस्तु तद्वैलक्षण्यनिदर्शनमि-
त्युक्तः

तत्रोत्पत्तिं तावदाह · तेषामित्यादिना । तेषां रसा-
नामुत्पत्तौ हेतवः सूचकाश्चत्वारः रसानामुत्पाद्योत्पादकप्रकारो यावान् संभवति
स चतुर्भिरेव सूचित इति यावत् । तथाहि - तदाभासत्वेन तदनुकाररूपतया हेतुत्वं
शृङ्गारेण सूचितम् । यतो विभावाभावासादनुभावा ~~दस्य~~ व्यभिचार्याभासादिः

~~सूचकाश्चत्वारः रसानामुत्पाद्योत्पादक~~ रत्याभासे प्रतीते चर्वणाभाससार शृङ्गारा-
भासः कामनाभिलाषमात्ररूपा हि रतिरत्र व्यभिचारिभावो न स्थायी तस्य तु
स्थायिकल्पत्वेनाभाति तद्वशाद्विभावाद्याभासता । अतश्चास्थाय्याभासत्वं
रतेः यतो रावणस्य सीता द्विष्टा मद्भुपेक्षिकावेति हृदयं नैव स्पृशतीति । तस्यैशी-
द्व्यभिमानोऽस्यापि लीयत इति एव मयीयं रक्तेति मतिश्च योऽ ह्यन्वदयानि-
कामजमोहसारत्वाच्छुक्तौ रूप्याभासवत् ।

यद्यपि दूराकर्षणमोहमन्त्र इव तन्नाम्नि
याते श्रुतिमित्यादौ रावणकाव्ये तावति रत्याभासतैव न तु हासः स्फुरति तथापि
सीताविभावलक्षणं रावणवयः प्रभृति विरुद्धं च चिन्तादैन्यमोहादिकं व्यभिचा-
रिगणमश्रुपातपरिदेवितादि चानुभावजातमनौचित्यात् तदाभासरूपं सद्धा-
स्यविभावरूपं तद्वक्ष्यते विकृतवेषालङ्कारैरित्यादि ·

एवं तदाभासतया प्रकारः शृङ्गारेण सूचितः
तेन करुणाद्याभासेष्वपि हस्यत्वं सर्वेषु मन्तव्यम् । अनौचित्यप्रवृत्तिकृतमेव
हि हास्यविभावत्वं तच्चानौचित्यम् · सर्वरसानां विभावानुभावादौ संभाव्यते
तेन व्यभिचारिणामप्येषैव वार्ता । अत एव संवित्सतत्त्वनिपुणैः चिरन्तनैः रसभावतदा-
भासव्यवहारस्तत्रतत्र क्रियते · अमोद्वेहेतावपि तदाभासतायां शान्ताभासो हास्य
एव प्रहसनरूपस्यानौचित्यत्यागपुरुषार्थेषु व्युत्पाद्यः · एतच्च लक्षणे वक्ष्यते तत्र
हास्याभासो यथास्मत्पितृव्यस्य वामनगुप्तस्य

लोकोत्तराणि चरितानि न लोक एष
संमन्यते यदि किमङ्ग वदाव नाम ।

यत्त्वत्र भ्रासमुखतत्त्वममुष्य तेन

नहि जहसीति ॥

पार्श्वोपपीडमिह को नापि जहासीति ;

एवं योयस्य नबन्धुः तच्छोकेक करुणोऽपि हास्य एवेति सर्वत्र योज्यम्। अत एवोदाहरणम्। एवमन्यत्तेनानुमेयमिति मुनिना यथाग्रहणं कृतम्। यदीयफलानन्तरं द्वितीयरसोऽवश्यंभावी तस्योदाहरणं रौद्रः रौद्रस्य हि फलं वधबन्धादि तद्विभावकेनावश्यं करुणेन भाव्यम्। यथा वेणीसंहारे

अद्यैवावां रणमुपगतौ तातमम्बां च दृष्ट्वा

घ्राताभ्रातस्ताभ्यां शिरसि विनतोऽहं च दुश्शासनश्च ॥

तस्मिन्बाले प्रसभमरिणा प्रापिते तामवस्थां

पित्रोः पार्श्वं व्यपगतघृणः किन्नु वक्ष्यामि गत्वा ॥

एवं रौद्रानन्तरं नियमेन भयानकः शृङ्गारानन्तरं नियमेन करुणं व्याक्रियते त्वसौ तज्जन्मनि यथा- तापसवत्सराजे वासवदत्तादाहाद्वत्सराजस्य। ननु तत्रारातेर्विच्छेदात् बन्धुताकृतः शोकः नैतत्करुणोत्पत्तिकालेऽपि हि क्रोधस्य विच्छेद एव यदाह। निर्वाणवैरदहनाः प्रशमादरीणां नन्दन्तु पाण्डुतनया इति। नच बन्धुमात्रं हेतुरेवं हि सति " ते लोचने प्रतिदिशं विधुरे क्षिपन्ती"त्यादौ तइति प्राणभूतं निरुपयोगतां गमितं स्यात्। रतिप्रलापेषु च शृङ्गार एव करुणस्य जीवितम्। हृदये वसासीत्याद्युक्तिषु। एवं वीराद्भयानकोत्पत्तिः यथा कर्णस्यात्मजमग्रतः शमयतो भीते जगत्फल्गुनात्। यत्त्वत्र श्रीशङ्कुकेनोक्तं नात्रोत्साहस्य व्यापार इति तदसत्। एवं हि निर्विषय एवोत्साहः स्यात् कर्तव्याननुसन्धानात्। युद्धवीरे च परपराजयजनितः प्रतापापरपर्यायः शत्रुदहयदाहदायी तद्वनितादिषु

भयानक एव जीवितं यथा

स पातु वो यस्य हतावशेषाः

तत्तुल्यवर्णाञ्जनरञ्जितेषु ॥

शृङ्गारसाक्ष्यैव च विद्रसन्ति

दैत्याः स्वकान्ताजयनोत्पलेषु ॥

नियमेन भवतीति वक्तव्यम्। नियमश्चकारेणोक्तो रौद्रादित्यानन्तर्यसूचकपञ्चम्यनन्तरं प्रयुक्तेन यस्तु रसो रसान्तरं फलत्वेनाभिसन्धाय प्रवर्तते तस्योदाहरणं वीरः महापुरुषोत्साहो हि जगद्विस्मयफलाभिसन्धानेनैव यथा- दोर्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत इत्यादि। रौद्रस्तु परविनाशनं फलत्वेनाभिसन्धाय प्रवर्तते न करुणमिति शेषः विदूषकहासस्तु नायकाहासफलत्वेनाभिसन्धत्त इति मन्तव्यम्। यस्तु रसस्तुल्यविभावत्वान्नियमेन रसान्तरं हि परमाक्षिपति तस्योदाहरणं बीभत्सस्तस्य हि ये विभावा रुधिरप्रभृतयः तेऽवश्यं भयहेतवः तथा तद्व्यभिचारिणो मरणमोहाद्यपस्मारास्तदनुभावास्तु मुखविकूर्णनाद्याः यथा वेणीसंहारे - संस्तभ्यन्तां निहतदुश्शासनपीतशोणशोणितं पीतं बीभत्सवृकोदरदर्शनं वैक्लव्यस्खलितप्रहरणा विद्रवन्ति बलानीति ॥ एवं तदाभासतद्द्वारेण रसान्तराक्षेपकत्वे शृङ्गार उदाहरणम्। तेन शृङ्गारानुकृतिरित्यत्र तु शब्दो वीप्सायां द्वितीयो हेतौ तेनैवं योजनाया अनुकृतिः सहास्यः यतः प्रकीर्तितः। एवं विभावको हास्य इति शेषः। तद्यथा शृङ्गारः आर्यः शृङ्गारवती अनुकृतिरित्यर्थः। यत्र शृङ्गारादद्भुतोत्पत्तेराशङ्का ददृशुः पृथुरतीकृता इत्यादौ निर्मूलमेवोदयने हि शृङ्गारो ब्रह्मणि विस्मयसंभावना। सा च न तात्कालिकात्वेन

नोत्तरकालिकत्वेन। किन्तु पूर्वतरमेवेति न किंचिदेतत्। परम्पराफलत्वेन
रसान्तराक्षेपे रौद्र उदाहरणम्। रौद्रस्य यत्कर्मफलात्मकं वधादि चकारात्तस्य
यत्कर्मफलरूपं स एव करुणः। एवकारेणात्यन्तव्यवहितो परम्परो पराकरोति
समनन्तरफलत्वेन रसान्तराक्षेपे उदाहरणं त्वस्या नियोगो वीरस्य सम्यक् निकटं यत्
फलं सोऽद्भुतो विपरीतः समन्ताद्या कीर्तिर्यशः प्रतापरूपा ततो हेतोः अपिश-
ब्दात् शृङ्गारोऽपि वीरस्यानन्तरं फलं द्रौपदीस्वयंवरादौ सहभावेन रसान्तराक्षे-
पे बीभत्स उदाहरणं यदेव बीभत्सस्य दर्शने विभावादिरूपं स एव भयानक-
स्तद्विभावत्वात् उपचारस्य सहभावप्रतीतः फलं तमेव शब्दो द्योतयति तुश
पूर्वतो विशेषमाह- अयमेव चाक्षेपप्रकाशत्वात्संभाव्यते। नत्वधिक इति सा
त्वस्यापि सन्न नोक्तः।

येचात्रोत्पत्तिहेतव उक्ताः ते यथा स्वं पुरुषार्थ-
चतुष्कव्याप्ताः तत् हितसौन्दर्यातिशयजननरूपरञ्जकहासादयः तदनुगा-
मित्वेन रूपकेषु निबन्धनीयाः। एतावन्त एव च रसा इत्युक्तम्। पूर्वं तेनान्येऽ-
पि गार्ध्यप्रसिद्ध्या एतावतां प्रयोज्यत्वमिति यत् भट्टलोल्लटेन निरूपितं
तदवलेपेनापराम्पृश्येत्युक्तं वर्णाभिधानं पूजादौ ध्यान उपयोगि मुख्यरागोऽपीत्य-
न्ये। स्वच्छपीतौ गौमाद्भुताविति शान्तवादिनां पाठः तत्तद्रससिद्धौ सासादे-
वता पूज्येति देवतानिरूपणं विष्णुः कामदेवः प्रमथा भगवतो गणाः क्रीडापराः
रुद्रस्त्रैलोक्यसंहारकर्मा। अत एव चोदयतीति यमेन वधादिके संपादिते
करुणः महाकालोऽधिदैवतमिति शेषः। स हि तद्विभावं कङ्कालं श्मशानादि
सेवते महेन्द्रस्त्रैलोक्यराजो ब्रह्मा अचिन्त्याद्भुतस्रष्टा बुधः शान्तोऽजोऽद्भुत

इति शान्तवादिनः केचित्पठन्ति। बुद्धो जिनः परोपकारैकपरः प्रबुद्धो वा
तत्रोत्पत्तिलक्षणमन्योन्याश्रयत्वात् न निश्चयकारी वर्णदैवतात्मकमप्यागम
सिद्धत्वादित्येकप्रघट्टकेनोपसंहरति एवमित्यादिना। एतेषामिति सर्वेषा
मित्यर्थः।

अति विशेषलक्षणानि वक्तुमासूत्रयति इदानीमि-
त्यादिना "विशेषलक्षणं सजातीयाद्व्यवच्छेदकम्" न विजातीयाद्व्यवच्छेदं
विना सजातीयत्वम्। नचासौ सामान्यलक्षणं विनेति। तत्पृष्ठ विशेषलक्षण-
मिति दर्शयितुं सामान्यलक्षणमनुवदति। अनुभावेत्यादिना "लक्षणानि च
तानि निदर्शनानि च विशेषात्मकानि तेन प्रत्येकं लक्षणविशेषा उच्यन्त
इत्यर्थः। विशेषलक्षणानि वा सामान्यलक्षणस्य निदर्शनानि येषु सामान्यल-
क्षणं निर्दिश्यते योज्यते उत्तत्दाश्रीयते च तद्विना तस्योदाहर्तुमशक्यत्वात्
चकारो लोकोत्तरतयादरं सूचयति। ये स्थायिनो भावा लोके चित्तवृत्त्यात्मनो
बहुप्रकारपरिश्रमप्रासवनिबन्धनकर्तव्यताप्रावन्ध्याभिधायिनः तानपि नामरस-
त्वं विश्रान्त्येकायतनत्वेन उपदेशदिशान्विष्यामः। विभावान्यथायोगमुपहरद्भिः
कविनटैर्हि ते रसतां नीयन्ते। यदाह "या व्यापारवती रसान्रसयितुं काचित्
कवीनां नवा दृष्टि"रिति नटानान्तु तदुपजीवितत्वात् ननवा दृक्पश्यति
नरसयत्यतो नवेति तस्माद्रसनोपयोगि विभावाद्यौचित्यमस्माभिः उपदिशद्भिः
स्थायिनो रसतां नीता भवन्तीत्यनेन लक्षणरूपस्य फलं दर्शयति। तत्र कामस्य
फलत्वादशेषहृदयसंवादित्वाच्च तत्प्रधानं शृङ्गारं लक्षयति तत्रेत्यादिना "उज्ज्व-
लवेषात्मक इत्यन्तेन सूत्रेण" तत्रेति क्रमनिर्धारणे एवं सतीत्यर्थे वा एतत्सूत्र

भाष्येण व्यक्तयन्नुद्वयपदनामेति व्याचष्टे यत्किंचिदित्यादिना। हस्तपृष्ठहृदिम-
ण्डितः शृङ्गारस्तेन सूचीमध्यादि उपमीयते। तेन उज्ज्वलवेषात्मके शृङ्गारशब्दो
न चातिप्रसङ्गः। आप्तोपदेशस्य नियामकत्वात् इति चिरन्तनाः। तदनुपपन्नम्।
उपमानोपमेययोः विशेषविषयविभागानवभासात्। तथा तस्मादयमत्रार्थः रतिरे-
वास्वाद्यमाना मुख्यः शृङ्गारः रतिमास्वादयद्भिः तद्बहुमानपरः शृङ्गारीत्युच्यते।
यस्तु सज्जनादिवर एव तन्यसनिति सारसनास्वाददशा लोके भवन्त्यपि न
चिरमवतिष्ठते। तदास्वादे चोपयोगी यथास्वं विभावादितया शास्त्रनिषिद्ध-
मजुगुप्सितं संस्फुटं मनोहरं च तदुपचारात् शृङ्गारशब्दवाच्यम्। तदाह उपमीय-
ते तदुपयोगितया तथा मीयते लक्ष्यत इति यावत्। कथमिति दर्शयति यस्ता-
वदिति" तावच्छब्देनावधारणवाचिना शृङ्गारवाच्यो मुख्योऽर्थस्तत्र नास्तीति दर्श-
यति स शृङ्गारवानिति। तदनुज्ज्वले वेषे शृङ्गारशब्दः उपचरित इत्याह- ननु
मुख्यतया रत्यास्वादे शृङ्गारशब्दस्य प्रवृत्तौ किं निबन्धनमित्याशंक्याह- यथा
चेत्यादि। गोत्रं पितृसन्तानादि। कुलं मातृसन्तानं स्तत्रयति आचारो व्यवहारः ततः
उत्पन्नानि लोके प्ररूढानि मूले तु नाद्याप्तोपदेशेन नामकरणलक्षणेन समयेन
सिद्धानि पुंसामिति मनुष्यजातेः नराणां नारीणां च। नराणां हि पितृसन्तानानु-
सारितेन नाम विष्णुशर्मेत्यादि। स्त्रीणां तु मातृवंशानुसारी कनकप्रभाचन्द्रप्रभे-
ति।

एवं रसादीनां तच्छास्त्रविदिवृद्धव्यवहारतो निरूढानि
प्राक्कल्पब्रह्माद्याप्तप्रणीतानि नामानि। तदेवोपसंहरति। एवं शृङ्गारो रसः स
आचारव्यवहाराल्लोकेऽपि सिद्धः कुतो हेतोर्हृद्योज्ज्वलवेषात्मकत्वात् एतदुक्तं भवति

प्रतिशास्त्रसमयानुसमयानुसारिणोऽपि शब्दान्त वृद्धव्यवहारपरंपरया लोके
प्रसिद्धा उपचारतोऽन्यत्रापि व्यवह्रियन्ते। यथा सांख्यपुरुषोऽयं न किंचित्करोति
पुष्करोऽत्र तेन मे विरचितोऽत्र महत्तान्योन्यमस्येति तद्वदमी शृङ्गारादिशब्दाः
इहैव विषये मुख्याः लोके तु सांख्यपुरुषादिशब्दवत्। यस्तु शृङ्गारशब्दान्मत्वर्थीयेन
व्युत्पत्तिमाह- तस्य रूपमपि विस्मृतमास्कां हि प्रत्ययोऽदन्त आरब्धवृन्दारक इति
यथात एवोणादिषु निपातितो यंशब्दः।

यस्तु पृथग्भावेन गोत्रादिनामानि व्याचष्टे न्या-
सत्यम्भ्रान्तदीक्षितानि तस्य प्रकृते न किंचिदियमुपयुज्यते। न च गोत्राचारोत्प-
न्ने नामनि नियामक आप्तोपदेशो लोके इत्यास्तामेतत्"

अथ रतिस्थायीति सूत्रभागं भाष्येण स्पष्ट-
यति स चेत्यादिना "स्त्रीपुरुषशब्देन परस्पराभिलाषसंभोगलक्षणया लौकिक्या
अवस्थयेयं स्त्रीति या तेनाभिलाषमात्रसारायाः कामावस्थानुवर्तिन्या व्यभि-
चारितरूपाणीति यापि लक्षणैवेयं स्थायिरूपा प्रारम्भादिफलप्राप्तिपर्यन्तव्या-
पिनी परिपूर्णसुखैकफला रतिशब्दका भवति हेतुरस्य कविर्हि लौकिकरतिवा-
सनानुविद्धस्तथा विभावादिना हरति नटद्वारानुभावान्यथा रत्यास्वाद शृङ्गारो भव-
तीति आस्वादयितुरपि प्राक्कक्ष्यायां रत्यङ्ग उपयोगीत्युक्तः प्रागेवमुक्तं भवति। रतिक्री-
डास्थार्थत्व परमार्थतत्कामिनोरेव तत्रैव सुखस्य धाराविश्रान्तेः अपरस्य तु
माल्यादिविषयसौन्दर्यस्य कविना कृतस्य सङ्कल्पत्वात् संवेदनाद्वैतयान्योन्यनिम-
ज्जनात्मकमीलनाख्यो हि परमो भोगसंविद एव प्रधानत्वादन्यत्र तु जडस्यभो-
ग्यत्वादत एवाह" श्वासायासविडम्बनेनैव वपुषि प्राणाः पुनर्जानकीति "

अत एव यत्कैश्चिदाचोद्यतरते राधारभेदेन भेदात् कथमेको रस इति तदनभिज्ञया एकैव ह्यसौ तावतीरतिः यत्रान्योन्यसंविदेकवियोगो नभवत्येवोत्तरमयुवप्रकृतिः उत्तमयोत्तमाचोत्तमौ एवं युवानौ तत्रोत्तमयुवत्वादिन तत्संविदुच्यंते नतु कार्यैकस्यैव हि परमार्थत उत्तमयुवत्वं विशेषः सचाव- स्थावान्तरं तत्र व्यवहारस्य भूतत्वात् तत्प्रकृतिः सा संविदास्वादयोग्यत्वात् शृङ्गाररसीभवतीति अनुत्तमत्वे तु वार्द्धमयुवत्वे चेति नसा रतिसंविद्वि- योगस्य संभावमात् अपियुक्तसंवित्प्राणस्तु शृङ्गारः यथा= वारिसिनेचारिहिअ- दिंहिलंगणाठुकं हविए क हटिमुक जक मरणिम अठठुतीति हविपरितिःव्याख्या- तापरस्परं जीवितसर्वस्वाभिमानरूपा विषयतिव्यापयति चित्तवृत्तिमन्यत्र ज्ञापनया संक्रमयतीति वेषो विभावानुभावात्मा वेषयतिव्याप्नुवन्ति स्थायिनमिति व्यभिचारिणः ते च उज्ज्वलाः उत्कृष्टा यस्मिंस्तथाभूतः आत्मा यस्येति सूत्रसंक्षि- प्य यद्विभावादिनिरूपितं तद्विभागेन व्याख्येयमित्याशयेन शृङ्गारस्यावस्था भेदमाह तस्य द्वे इत्यादिना "अधिष्ठाने अवस्थे इत्यर्थः अधिष्ठीयुतेऽवस्था- न शृङ्गाररूपेण तेन शृङ्गारस्येमौ भेदौ गोत्वस्येव शाबलेयबाहुलेयौ अपितु तद्द्वयेऽपि अनुयायिनी या रतिः आस्थाबन्धात्मिका तस्याकृती स्वादमानं रूपं शृङ्गारः यदाहुः =

स्नेहानाहुः किमपि विरहह्रासिनस्तेऽप्यभोगा

दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति"

अत एव संभोगे विप्रलंभसंभावनाभीरुत्वे विप्रलम्भेऽपि संभोग मनोराज्यानु- वेध इतीयत्शृङ्गारस्य वपुः अभिलाषेर्ष्याप्रवासादिदशास्वेत्रावान्तरभूताः सत्या-

मास्थाबन्धात्मिकायां रतौ तेन संभोगशृङ्गार इत्यादिव्यपदेशो भोगेऽप्युपचारात् अत एतद्दशाद्वयमेलन एव सत्यतः सातिशयचमत्कारो यथा =

एतस्मिन् शयने पराङ्मुखतया वीतोत्तरं ताम्यतोः

अन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम्"

दम्पत्योश्शनकैरपाङ्गवलनान्मिश्रीभवच्चक्षुषोः

भग्नो मानकलिः सहासरभसव्यावृत्तकण्ठग्रहम्"

तत्र हीर्ष्याविप्रलंभसंभोगमीलनात्मिके एकप्राणीभूतोभयगतविभावानुभावव्यभि- चारिकृतसातिशयारस्वविभक्तिभिस्ते नयनयोश्चोदितं श्रीशङ्कुकेन पुरूरवसउ- न्मादे वत्सराजस्य तापसत्वे चानुज्ज्वलवेषत्वे विप्रलम्भशृङ्गारेऽपि तदनवकाश- मेव भोगस्य रसत्वाभावात् स्नानाद्यवस्थानमिव

यत्त्वत्रोत्तरं तावत् तटस्थै यदुज्ज्वलवेषाभा- वेऽपि रतिमुत्तमा न विजहतीति तथाभाषितं प्रकृतचोद्यापरिहारात् नहि चोदितमनुज्ज्वलवेष कथं शृङ्गार इति तदवास्तु चोद्यमिति चेन्नवचनस्यातिभा- रोऽस्ति नतु मुनिनैवमुक्ते सत्युज्ज्वलवेष शृङ्गार इति अपितु विपर्यय इत्यास्तामेतत् तत्रेति द्वयोरवस्थयोर्मध्ये संभोगावस्था तावदुच्यते तत्र ह वस्तुतः स्त्रीपुंसौ परस्परं विभावौ तयोः उत्तमत्वं चोपयोगीन्युत्वादीनि उत्तमस्यानवसरे रत्यभावात् ऋतु- वसन्तादिः माल्यं कुसुमादिः अनुलेपनं समालंभनं यद्यत्कामस्योद्दीपकमलं- कारः कटकादिः इष्टजनमाला विदूषकादिः एतदुभयमुत्तमत्वसूचकम् यदाह-

असमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः।

अनाक्रम्य जगत्कृत्स्नं किं सन्ध्यां भजते रविः" इति

विषयगीतादयः तदन्तर्भूतमपि माल्यादिप्राधान्यात् पृथगुक्तम्। वरभवने हर्म्यादि।
एतद्देशविशेषोपलक्षणम्। एषामुपभोगः उपवनस्योद्यानस्यानुभवनं श्रवणं च
परभवनस्थस्यापि एतत्सङ्कल्पादेरप्युपलक्षणम्। क्रीडा जलावगाहनादिका लीला।
नस्याकृतिः आदि
आनुग्रहणादन्यदपि हृद्यं हंसयुगलकचित्रपुस्तदर्शनादि। एतच्च समस्तमेव
शृङ्गारविभावत्वेन मन्तव्यम्। यावान्कश्चिदयं विषयसंभारो हृद्यतमः तत्पूर्ण-
तायां सत्युत्तमस्य रत्युदयः। अत एव रत्नावल्यां हर्म्यवर्णनमुद्यानगमनं
कामदेवपूजा वसन्त इत्यादि सर्वमेवा संगृहीतम्" राज्यं निर्जितशत्रु योग्यस-
चिवे न्यस्त इत्यादिना "एवं च सर्व एव समुदितो विभावः इति कात्स्न्येनिकमालम्बन-
विभाव उद्दीपनविभाव इत्यत एव मुनिना नायं विभाग उक्तः। सूचितो वा
युक्तं चैतत्, यथैकत्रैव रूपके उद्यानतुमाल्यादीनां सर्वेषां दर्शनादेको रसः स्यात्।
विभावाभेदात्॥

ननु प्रथमं प्रमामात्रदर्शनेन उद्यानभवनादिसंभ-
वः। कएवमाह- ऐश्वर्यपूर्णस्य हि तावदात्मीयसमृद्धिसंभारसंस्कारानवगमात्
पूर्णतैव विभाववर्गस्य स्यात्। प्राधान्ये हि रूपकं तत्र तत्रोदाहरणं। तेन पृथक्-
पृथगुदाहरणदानं अनुपपन्नम्।

या तु मुक्तकादौ पृथक्कयाभावेऽपि रसवित्त्रो-
त्तमेकतापसस्तत्रानुसन्धानाच्चमत्कार इति यांस्त्वनुक्तमादिविषये अपरिपूर्णो-
द्दीपनत्वेन चमत्कारो दृश्यते यथाहि सत्थहि वधिते नुनाहि पणीत्तु दिसीगमिहा
अमहं हभुवं हचदुघरी दुक्तु एलंधा इति तथाकमभ्वपेरङ्ग इत्यादि। तत्र एक-
ङ्गस्य सौभाग्यस्य प्राधान्याच्चमत्कारोदय इति तात्पर्यम्। न तु तदभावकृता

चमत्कृतिः। एतैः कविनोपनिबद्धैः नटेन च साक्षात्कारकल्पतामानीतैः सम्यगि-
तविघ्नभोगात्मकसंभोगो रस उत्पद्यते झटित्येव नहि गमनक्रियावत् क्रमपते
रसनाक्रिया निष्पद्यते। अपि तु प्रथम एवावसरे, स च विभावसाक्षात्कारात्मक
एव। तस्य तु प्रथमकक्ष्यायामेव रसनागोचरत्वात् नयनचातुर्यादिभिः रसैः
रसनाद्याभिमुख्यं नीयते। अत एव तस्मिनया अनुभावाच्च आभिमुख्येन यन-
मनुभावं च तद्रसास्वादे समर्थाचरणमुद्दीपनमत एव तदभावेऽपि विभावादि-
वर्णनप्रधानेऽपि काव्ये न चमत्कारः रसनायास्तत्राभावात्। यथा विन्दोभट्टे-
न्दुराजस्य

उपपरिसरं गोदावर्याः परित्यजताध्वगाः
सरणिमपरो मार्गस्तावद्भवद्भिरपेक्ष्यताम्"
इह हि विहितो रक्ताशोकः कयापि हताशया
चरणनलिनन्यासोदञ्चन्नवाङ्कुरकञ्चुकः" इति"

एवमन्यत्राप्युपपद्यत इति तस्याभिनयादियोजनीयं। ननु विभावानां साधार-
ण्यं कथं नियममेवं नहि नाट्य इयं चार्थः कविप्रयत्नसमर्प्यमाणाः तेन तुल्य-
त्वात्प्रयोजकधर्मैद्विकप्रकाशविशिष्टसम्बन्धात् प्रमुख एव विशेषविश्रान्ततां याति
तथा हा प्रिये जनकराजपुत्रीति इत्ययं श्रुत एव नरतिव्यतिरेकेण भावान्तर-
विभावताशंक्या।

एतेन कुणपं कामिनीत्यादि संभावनं प्रत्युक्तम्।
तत्र नयनचातुर्यादिना कान्तादृष्टिर्लक्ष्यते। यत्तु भ्रुवोर्मूलसमुत्क्षेपण्यतुर-
मित्युच्यते तिवक्ष्यते सभ्रूक्षेपं शोकं विवर्तनं कटाक्ष इति ताराकर्म॥

एवं चयोऽन्नानयनानां चातुर्येण भ्रूक्षेपेणकटाक्षेण च युक्तंचारणं ललितं मन्थरं मधुरं।
ललितं नयनाभिरामं कृत्वा यान्यङ्गानि नां हरणानि स्वर्तव्यकान्ति ललितानि सुकुमाराभिधेयानि मधुराणि च श्रवणसुखकराणि यानि वाक्यानि इत्याङ्गाभिनय आङ्गिको वाचिकश्च लक्षितः। अत एव सामान्याभिनयाध्याय वक्ष्यमाणाशेषचेष्टालङ्कारलाभ इति ललितमधुरशब्दौ तदर्थावित्यसत्। आदिग्रहणात्सात्त्विको मुखरागपुलकादिर्गृह्यते। अनुभावकत्वेन ताटस्थ्यपरिहारः। आभिमुख्यनयनेन स्वात्मैकविश्रान्तिशङ्कानिरासः। एवमुत्तरत्रापि॥ एवं विभावसमय एव रसनीयस्यानुभावावसरेऽवस्थाविशेषे रस्यास्पदस्य पश्चाद्व्यभिचारिणः स्वामेव रसनीयतां चित्रयन्तः सातिशयं पुष्यन्तीति पश्चात्ते निरूप्यन्ते। व्यभिचारिणश्चास्येति आलस्यौग्र्यजुगुप्सावर्ज्यमाना येऽप्यन्ये सर्वे व्यभिचारिणः अस्येति। दशाद्वयमयस्येत्यर्थः। जुगुप्सास्थायिन्यपि इह निषिद्धान्यासिद्धास्थायिनामपि व्यभिचारित्वं अनुज्ञापयति। आलस्यादि च स्वविभावप्रमादादिविषयमेव निषिद्धं तेन वपुरलसलसद्बाहुलक्ष्म्या इति तथाकानिच्छिहानिवपुरथुत् केवलमलसेक्षणमित्यादिनापि रूपकं मन्तव्यम्। एवं प्रयोगे काव्ये च विभावादीनां क्रम एवं समाश्रयणीयः। उत्पन्नस्य लब्धप्रतिष्ठता। तथाभूतस्य परिवारसंघटनमिति हि प्रतीतिक्रमः॥

ननु निर्वेदादयः संभोगेन व्यभिचारिण इत्याशंक्याह- विप्रलम्भकृतास्त्विति॥ तुशब्दो विशेषं द्योतयति। वाक्यैकवाक्यतया दुःखप्रायनिर्वेदादिमुक्ता आलस्यादिव्यतिरिक्ताश्च सुखमया एव धृत्यादयोऽत्र व्यभिचारित्वेन संभोगे उपन्यस्ता इति प्रकटयति परस्परांशोपजीवनं चात्र

जीवितमिति दर्शयितुं अस्यैतदुच्छिन्नमेवोक्तं तत एव च भगवदनुग्रहपवित्रवाचा कालिदासेन रघुवंशे संभोगविप्रलम्भात्मकव्यामिश्ररसानासंपत्तये प्रत्यनीकोद्देशेन रामभद्रस्य स्वकर्मपूर्ववर्णस्थावर्णनेनादृतं स्वप्नान्तर्भूतोऽपि स्वप्नः प्राधान्यादुपात्तः क नीलकण्ठव्रजसीति सिविणवए विहुदाम्ं जपउ सुमरावि उतरुढ संसु आसि पुअ गक गाकाविउति तथा आकृतापि सहायैरित्यादौ हि स एव प्राणः संभोगदशायान्तु विभावसान्निध्ये निद्राद्यभावात् विबोधोऽपि व्यभिचारी संभोगेऽपि रतिश्रमकृतनिद्रादि यद्यप्यस्ति। तथापि नरतौ तन्निरतामाभिधत्ते। विप्रलम्भे तु तादृगिति भावनापरस्परोत्तमेव एवैव निद्रादिबाहुल्यापेक्षं चेत्थं अभिधानमुन्मादापस्मारव्याधीनां यानात्यन्तं कुत्सिता दशा सा काव्ये प्रयोगे च दर्शनीया। कुत्सितातु न संभवेऽपीति हृदयः

वयन्तु ब्रूमः तादृश्यां दशायां स्वजीवितनिन्दात्मिकायां तद्देहोपभोगसाररत्यात्मकावस्थाबन्धोऽपि विच्छिद्यत एवेति संभव एव मरणमचिरकालप्रत्यापत्तिमयमत्र मन्तव्यम्। येन लोकोऽवस्थानमेव जन्मेति यथा

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोः
देहत्यागादमरगणनालेख्यमासाद्य सद्यः।
पूर्वाकाराधिकचतुरया सङ्गतः कान्तयासौ
लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु॥

अत एव सुकविना वाक्यभेदेनापि मरणमाख्यातप्रतीति विश्रान्तिस्थानत्वपरिहाराय

तृतीयपादेन च विभावानुसन्धानकं दर्शनं पुनर्ग्रहणेन स एवार्थः सुतरां चोदितः।

अन्ये त्वाहुः। मरणमिति न जीवितवियोग उच्यते। अपि तु चैतन्यावस्थैव। प्राणत्यागकर्तृकात्मिका या संबन्धाद्यवसरगता मन्दाख्या व्यभिचारिभावैनोति सुतरामोदाहरणमेतदिति। आदिशब्देन दैन्यमोहादयः। एते व्यभिचारिणोऽपि स्वानुभावैरनुभाविता विप्रलम्भमनुभावयन्ति। तस्मादनुभावैरित्युक्तम्।

अन्ये त्वादिशब्दं करणवाचिनमाश्रित्य तदीयानुभावान्प्राधान्येन दर्शयन्ति " एकशेषेण द्वयमप्यन्ये विप्रलम्भो विडम्बनं सिद्धः। इह तु उपचारात्तदीयं फलं विरहात्मकं गृह्यते नहि परस्परं रतिमतोर्विडम्बनमस्ति तेन विरहेण कृतं सुप्तुतमां प्रोषित इति दर्शयन् मुनिरनेन विनाशृङ्गारो न प्रयोगेन काव्ये हृद्यतामवलम्बित इति दर्शयति। तथा हि- संभोगेऽप्येकघनशर्करास्वादस्थानीयता परिहाराय वैषम्यं गोत्रस्खलितस्पर्धामन्यद्वाकलहविप्रलम्भहेतुभूतं कवयो निबध्नन्ति। वामो हि काम इति वात्स्यायनादिभिरभिहितम्। मुनिनापि वक्ष्यते। यद्वामाभिनिवेशित्वमिति " एते च व्यभिचारिणो बिम्बुदुन्मेषनिमेषयुक्त्यैव स्थायिसूत्रे मध्ये प्राकटयन्तस्तिरोदधतश्च तद्वैचित्र्यमावहन्ति। न तु स्थिराः॥

यद्यपि स्थाय्यपि न स्थिरः। तथापि संस्काररूपतया धारावाहिसजातीयप्रवाहरूपतया च स्थिर एव। व्यभिचारिणस्तु नैवं क्षणमपि भवन्ति। संस्कारमपि स्वकं स्थायिसंस्कार एव प्रौढयन्ति तथैव

स्मरणाच्च तेन व्यभिचारिषु पृथक्पृथग्येषां केषांचिदुदाहृतं तत्तत्तल्लान्यायानुपातिं॥

तथाहि- धृतौ यदुदाहृतं असंभाव्यं देवादित्यादि। तत्रापि हर्षविस्मयगर्वमतिप्रभृतीनां च तोतिमामिति वम्चितेत्यादिसूचितानां संभार एव किमपरं त्रैलोक्यादिमित्यादौ चावान्तरवाक्यारम्भे स्मृतिप्रभृतिभिः सर्वत्र भाव्यम्। अन्यथा हि धृत्यैकवचनत्वे सर्वत्र श्लोकार्थे दृष्टिरेकैव चित्रन्यस्तेव भवेत्। अस्यास्सर्गविधावित्यत्रापि अवान्तरवाक्यसमाप्तौ धृतिहर्षविस्मयादयो भवन्त्येव। अत एव विच्छिद्य विच्छिद्य वितर्कान्तरं समुदेति। ननु व्यभिचारी क्षणमप्यवतिष्ठते। चलं हि गुणवृत्तमिति हि तत्रभवन्तः। अत एव प्रयोगवैचित्र्यमन्यथा वैचित्र्यात् स इव प्रयोगः स्यात्। मध्येऽन्ते चाश्रयाः स्फुटाः। ते च विस्मयं धृतिप्रभृतीति नित्यास्तामेतत्। वाक्यैकवाक्यत्वेनावस्थाद्वयस्यूतस्य शृङ्गारस्य यत्स्वरूपप्रमुखं भेतदेव परिशोधयितुं पूर्वपक्षयति अन्ये हीति " करुणविषये आश्रयणं विद्यते येषां भूम्ना अत एव कर्मधारयमत्वर्थीयाभ्यामितीह नाश्रितम्। भूम्ना वहति ह्यत्र पूर्वपक्षस्य प्राणितं।

ननु त्वयोक्तमसंदेवास्त्वित्याशंक्याह। वैशिक्येत्यादि। वेश्या वैश्यावर्गः करुणं च संभोगात्मके तत्प्रयोजनं शास्त्रं कामसूत्रे येकृतवन्तस्तैः शृङ्गारो दशभिरभिलषितादिभिर्मरणान्ताभिः अवस्थाभिर्युक्तो दर्शितः॥ अवस्थाग्रहणेन च तावन्तो बहवो विप्रलम्भा इत्याशङ्कां निराकरोति। तेन चिन्तादयोऽपि व्यभिचारित्वेन रतेस्तैरनुज्ञाता इति तात्पर्यम्। चर्कोण्ये-णेदमाह। परस्परास्था बद्धात्मकत्वे रतिरूपे स्थिते सति तदङ्गभूता दशावस्था

विप्रलम्भाङ्गं यथोदयनस्य चित्रफलकावलोकनतः प्रभृति।

नन्वत्रापि न रतिः क्वास्य विषयस्यानवगमात्
न हि चित्रमात्रं नलिनीः संस्तरादेः साक्षिणो विद्यमानत्वादाकृत्या च काम्यमानतौ-
चित्यस्य लाभात् यदि परन्नाम तत्रा... तत्कुत्रापयोगीति यदा तु विप्रलम्भा-
ङ्गता न भवति तदा स्वातन्त्र्यं यथा रावणस्यापि। तदुक्तमस्मदुपाध्याय भट्ट-
तोटेन स्वातन्त्र्येण प्रवृत्तौ तु सर्वप्राणिषु संभव इति॥

नन्वेवं व्यभिचारिभेदात् करुणः कथं विप्र-
लम्भात् भिद्यत इत्याशंक्याह- करुणस्त्विति॥ अथ... मप्रकृतेस्तावत् न
विप्रलम्भः स्थाय्यभावात्। तदभावो विभावसामग्री वै... देति तत्र तावत् करुणे
पृथक् दृढप्रतिष्ठ एव। उत्तमप्रकृतावपि रतिविपरीतः शोकः करुणे स्थायी अत
एव हि निरपेक्षो बन्धुजनादिविषये या अपेक्षा रताविव लम्बं न यथोक्तमन्वा-
बन्धः कुसुमसदृशप्राणमिति ततो निष्क्रान्तो भावः शोकाख्यो यस्मिन् शाप-
क्लेशे विनिपतितस्येष्टजनस्य यो विभावनाशो वधो बन्धो वा ततः समुत्थानं
यस्य शापग्रहणेनाप्रतिकार्यत्वे सत्युत्तमप्रकृतेः शोकोदयस्थानमेतदिति
दर्शयति। अन्यथोत्साहक्रोधादि विभावत्वं स्यात्। शोकत्वमेव च पराकर्तुं कवि-
कुलचक्रवर्तिना पुरूरवस ऊर्वशी शापप्राप्तिरनुरूपत्वाद्धितत्वेन निबद्धा। एवं
विभावस्थायिविभेदो दर्शितः।

येऽपि चैते निर्वेदाद्यास्तेऽपि वस्तुतो रत्यननु-
गृहीता निरपेक्षात् शोकाद्भवन्त्यन्योन्य एव ततोऽप्युह निरपेक्षभाव इति। एवं प्रसङ्गात्
करुणस्य स्वरूपमभिधाय प्रकृते योजयति। औत्सुक्यचिन्तेति। चिन्ताशब्दो

ऽशेषनिर्वेदाद्युपलक्षणम्। औत्सुक्यप्रधाना ये चिन्तादयः तेभ्यः सम्यगुत्थानं
विजृम्भो यस्य। अत एव सापेक्षा यत्र रत्याख्यो भावस्ते च सापेक्षाद्रत्याख्यात्
भवन्ति न हि विप्रलम्भे विभावस्थायी च संभोगात् भिद्यते एक एवासाविति
हि बहुश उक्तम्॥

एतदुक्तं भवति॥ औत्सुक्यं विषयोन्मुख्यं तच्च नष्टे
विषये न संभवति। एवं परीक्ष्य परीक्षाफलमुपसंहरति एवमेष इति॥ शृङ्गार-
इत्येकवचनेनैक एव शृङ्गार इत्युपसंहृतम्। एवं सूत्रार्थे परीक्ष्य स्थापिते तद-
र्थस्य सुखग्रहणार्थं सूत्रार्थस्य विवरणरूपत्वात् सूत्रसमीपेऽप्युपचितपाठात्
कारिकामधुनापठन्ति॥ अपि चेति न केवलं सूत्रं परीक्षापि यावदियं कारिकेति
समुच्चयार्थः। एवं सर्वत्र मन्तव्यम्। तां कारिकां पठति॥

सुखप्रायेष्टसंपन्न ऋतुमाल्यादिसेवकः।
पुरुषः प्रमदायुक्तः शृङ्गार इति संज्ञितः॥

पुरुष इति भोक्ता संवेदनात्मकोऽभिप्रेतः। भोक्तैव च स्थायिसंविद्रूपो व्यभिचारि-
णस्तु भोगस्वभावाः तेन रतिरेव पुरुषः तथा चोक्तम्॥ श्रद्धादयोऽयं पुरुष इति।
एवं प्रमदापि। तत्र भोक्तृत्वे पुरुषस्य प्राधान्यम्। प्रमदायास्तु भोग्यत्वे प्राधान्यादेव
च तस्य भोग्येनापरतन्त्रीकरणमिति नायिकान्तरयोगेऽपि न शृङ्गारहानिः।
भोग्यस्य तु पारतन्त्र्यादेवान्यसंमीलने शृङ्गारभङ्ग इति दर्शितमतः स्थायिभेदः
शङ्कनीयः। सुखप्रायेष्टसंपन्न इत्यादि पुरुषविशेषणत्वेन समुदितस्यैव विभा-
वत्वं दर्शयति विभावादयो रसोदयं विना स्वादैकघ भोक्तरीति निमग्नत्वं भोक्तृ-
प्रधानत्वं च दर्शयति। विषयसंभारपूर्णताभिमानजैव रतिरुचिता। एतदर्थमेव

जेसए अंह तादेण दिण्णेति ईदिसं सकण्णपूरदंणें सेति च एवं भवत्सं पल्लव-
मेव नायिकायाः प्रदर्शितम्। अन्यथा नोत्तमत्वं स्यात्। निजजातिकुलानुरूप-
संपदभावे तु रतिः पुरुषार्थरूपत्वानुपदेश्या। अत एव तत्र सर्वस्य प्रतीतिवै-
रस्यानन्तरसंभावनमिति श्लोकस्य तात्पर्यार्थः। विषयसामग्री संपूर्णा रस इति
ये मन्यन्ते तेषामुभ्रान्तिकारणमयं श्लोकः। संचेत्थं व्याख्यातो न भ्रान्तिजनकः
संश्रियत इत्यनेनान्वर्थतां पराकरोति॥

तथा हि॥ उणादिषु शृङ्गारशब्दो निपातित
इति नैकवल्लं श्लोकवृत्तमिदम्। सूत्रार्थानुविद्धे यावद् दृश्ये अपीति अपि चेत्यस्य
भिन्नक्रमस्यार्थः। प्रियो जनो विदूषकादिः। गान्धर्वशब्दो गीतादिद्यविषयोपल-
क्षणम्। काव्यसेवाशब्देन विषयसंकल्पं विभावत्वेन लक्षयति। यस्त्वाह- काव्यार्थो-
क्तात् रसात् काव्यार्थविदो भावान्तरं प्रादुर्भवति अतः सुखजनकत्वात्काव्या-
र्थो रस इति सम्प्रत्युक्तो नहि विषयसामग्री रस इति पूर्वं दर्शितम्। धृतिप्रमोद-
शब्देन व्यभिचारिणो लक्षयति। एक एव च परमार्थतः शृङ्गार इत्यभिप्रायेणादौ
अवस्थोपलक्षणद्वारेण सर्व एवोपसंहृतो मन्तव्यः।

अथ हास्यं लक्षयितुमाह- अथेति। आत्मश-
ब्देनेदमाह- रतिरास्वादनाख्यां प्रतीतिं विदधाना न तां रतिरूपामेव विधत्ते
प्रमुखे विभावादौ साधारण्यात्। हासे तु य आस्वादः सोऽपि विकृतवेषादीनां
सामाजिकान्प्रति लोकवृत्तेन हासहेतुत्वेति विभावसाधारण्यद्वारेण तदेकस्वभा-
व एवेति हासात्मकरसनाख्य चर्वणाचर्वणीयत्वाच्चास्य रतिशोकादिवत् परमतत्त्वा-
तीयसंविदास्वादे धारारूढसुखदुःखरूपत्वेन निस्साधारणात्मीयत्वनियमस्त्विह।

गृहीतं हेतुबलादेवोत्पद्यते यतः अतोऽनयोर्मुनिना प्रभवग्रहणं कृतम्। अन्येषु
तु विभावे साधारण्यसंभावनात्तदात्मकग्रहणं नयविनयादेरन्यायकारिणः समा-
ने कालादेरपूर्ववस्तुनश्च सर्वान्प्रत्युत्साहक्रोधभयजुगुप्साविस्मयहेतुत्वेन साधा-
रण्यविभावत्वादित्यलं बहुना॥ तत्र वेषः केशादिरचना। अलङ्कारः कटकादिः॥
स चैतयोऽपि विकृतो देशकालप्रकृतिवयोऽवस्थाविपरीतो हास्यस्य विभावः॥
एतेन सर्वे रसा हास्येऽन्तर्भूता इति दर्शितम्।

अथ विदूषकोऽपि तद्वेषं विदधद्धास्याभासं
प्रथयतीत्येतच्च प्रागेवोक्तम्। परस्य संबन्धी परः। एवंभूतो देवदत्तस्य वेषोऽय-
मलङ्कारो वा इत्युद्घट्टकभाण्डनृत्तादौ दर्श्यमानो हासं करोति। वेषालङ्कारो
गतागतिवादेरप्युपलक्षणम्। धार्ष्ट्यं निर्लज्जता। लौल्यं विषयेष्वनियतता॥
कुहकं कक्षग्रीवादिस्पर्शनैर्विस्मापनविधिप्रसिद्धं बालानां अङ्गविगमो विक-
लादिव्यङ्गः। एषां दर्शनमिति समासः। दोषा अतत्कृतेरपि भयादयः। अकार्य-
करणादयश्च विकृतवेषादय एव वा तेषामुदाहरणं वर्णनम्। आदिग्रहणात्सङ्क-
लस्मृत्यादि। ओष्ठादेः स्पन्दनशब्देन सम्बन्धः। व्याक्रोशनं विकासो निमीलनं च
आकुंचनं त्वीषत् एतद् दृष्टायोज्यम्। आस्यरागो मुखरागः। पार्श्वयोर्ग्रहणं पीडनं तन्द्रा-
शब्देन मोहं। एते च विभावा अनुभावा व्यभिचारिणश्च प्रकृतित्रयभेदेन यऽस्मि-
तादिभेदा वक्ष्यन्ते तेषु यथायोगं योजनीयाः। द्विविधश्चायमिति आत्मस्थैर्वि-
भावैः विकृतवेषादिभिर्विदूषकः स्वयं हसति स तस्यात्मस्थो देवीं च हासयतीति
तस्याः परस्थः इत्यादिदमसत्। एवं हि विभावानामात्मस्थत्वविभागः स्यात्॥
न हासस्य। किं च स्वामिनः शोकेऽनुजीविषु शोकं करोतीति परस्थता सर्वत्र स्यात्।

स्वयं हि परत्र दर्ष्यादो व्यक्तः परस्थ इति चेत् गम्भीरस्य प्रभोरनुजीवि[तं]गता-
नुभावव्यक्तः क्रोधोऽपि परस्थो भवेत्। तद्विभाव आत्मस्थः अतः विभावकस्त्वन्य
इत्यस्य सत्परिहासोऽपि तद्वद्धासे विभावः स्यात्। एतच्च रत्यादिषु सर्वेष्वप्यस्ति
तस्मादयमत्रार्थः। परं हसन्तं दृष्ट्वा स्वयं विभावानपश्यन्नपि हसन् लोके दृष्टः
तथा विभावादिदर्शनेऽपि गाम्भीर्यादनुदितहासोऽपि परकीयहासावलोकेन
तत्क्षणं हासविशेषः संपद्यत एवेति स्वभावः। यथा अम्लदाडिमादिरसास्वादः
संक्रमणस्वभावोऽस्यात्रापि दन्तोदकविकारात्तदनुरूपसंक्रमदर्शनादेवसंक्रमन्ति।
एवं हासस्य भावतः संक्रमशालित्वमिति काष्ठभूयिष्ठा तानासावत इत्याह- षट्भे-
दाश्चेति॥ द्वौ द्वाविति यथाक्रमविभावतारतम्यमित्यादि इति केचित्। तन्न सत्।
भेदान्तराणामपि प्रसङ्गात्। तस्मात्संक्रमणाभिप्रायेणैतत्। स्मितं हि यदुत्क्रमप्र-
कृतौ तत्संक्रान्तं हसितं संपद्यते। अत एव त्र्यवस्थो हास इति वक्ष्यते। षडवस्थो
ह्यन्यथा स्यात्॥ स्मितस्य ईषत्तायां हसितं। ततो विशेषेण ततोऽपि परस्यगतं
समीपगतं अन्यदपहसितं अतिशयेन वेत्युपसर्गभेदादर्थभेदः। सौष्ठवमनुल्बण-
णत्ता। द्विजा दन्ताः धीरमिति मन्थरं कृत्वा ईषत्त्वं निर्वाहविकसितैरिति। अर्थेति
स्मितानन्तरं संक्रमणकाल इत्यर्थः। तदिति स्मितमेव संक्रान्तं सेदवंरूपतामेतीत्य-
र्थः। जिह्माख्याया भाविन्या दृष्ट्याः निरीक्षणं यत्रकाले उचितं तत्र संस्थानादौ अ-
स्थान इत्यकाले शोकाद्यवसरे विकृष्टं श्रवणकटुनाटक इति नाटकशब्दो रूपक-
मात्रवृत्तिः। स्वसमुत्थ इत्यसंक्रान्तस्मितविहसितापहसितलक्षणः परसमुत्थः
संक्रान्तो हसितोपहसितातिहसितरूपः हसितादिरूपसंक्रमणयोः कृष्टप्रकृतौ
स्मितादिरूपरतिक्रोधशोकादिस्तु न संक्रमणं भवतीति उक्तमेव। तत्र हि

युगपदेव वास एव विभावस्तच्चित्तवृत्तिमायापुरुषो विभावतामिति न कृत एव
विभावास्तस्य चित्तवृत्तिं प्रसूय संक्रमयाद्यस्य प्रसुवतो हासमिव सर्वेषां आत्म-
स्थ परस्थ भेदोपलक्षणमेतदित्यन्ये। एतच्चासत्। अनुभवसिद्धमेव हीदं हासः सं-
क्रामतीति॥

अन्यस्त्वाह- तिसृषु प्रकृतिषु त्र्यवस्थो विभावतारतम्यात्
द्विरूपः पुनरात्मपरस्थत्वेन द्विविधेति द्वादशभेदोऽयमिति कारिकातात्पर्यमिति।
अत्र च पृथग्विभावनमपि भवति। तत्त्वतिप्रसङ्गावहः तन्नामिति नोदाहृतम्।
इदानीमवसरायातं करुणं लक्षयति अथ करुणो नामेति। अथेति क्रमे तत्रचा-
यं क्रमः। संभोगेन हास्याङ्गत्वेनापेक्षितो विप्रलम्भेन च समानव्यभिचारिकत्वात्
करुण इति गीताकारः।

एतच्च पूर्वापरविरुद्धम् अस्माभिस्तूद्दिष्टौ विभाग एव क्रमो दर्शितः। तस्या-
भिनयः प्रयोज्यो यस्यास्वाद्यमानस्य करुण इति व्यपदेशोदया[त्] हृदयता हि करुणा
लोके प्रसिद्धा सा च लिङ्गैरनुकर्तरि शोकं प्रतीयतां सामाजिकानामिति करुण-
व्यपदेश इति श्रीशङ्कुकः॥ एतच्च पूर्वापरविस्मरणविजृम्भितमस्य। यतः शोकं
प्रतिकृतिस्तस्य करुणा दया च नाम परित्राणेच्छा सा कथं शोकानुकरणं किं प्रति च
तेषां दयेति न विद्मस्तस्मात् करुण इति [शोकस्य] शोकः सर्वसाधारणत्वेन प्राग्यु-
क्त्यास्वाद्यमानस्य संज्ञा तदर्थमेव नामशब्दः तत्प्रभवत्वं शृङ्गारवद्व्याख्येयम्। अशा-
न्त्यप्रतीकारहेतूपलक्षणं शापग्रहणम्। शापक्लेशे पतितस्येष्टजनस्य ये विप्रयो-
गादयः तत्र विप्रयोगोऽयं संगमो विभावनाशनादिविद्रवो देशोच्चाटनम्। तत्र
विप्रयोगेऽपीति विशेषः। उपाध्यायतः। अन्त्रादिकमरणं अग्न्यादिकृतो विभावः

कृतउपघातइति त्वसत् । विभावनाशेन गतत्वात् । व्यसनेन मृगयाद्यादिना
अनर्थजनकेन संयोगः विभावनाशादयोऽपि स्वात्मगता नोत्तमप्रकृतेः शोकं
कुर्युः मध्यमाधमप्रकृतीनान्तु कुर्युरेवेत्यादिग्रहणं परिदेवनमात्मनो दैवस्यान्य-
स्य चोपालम्भः । निश्वासशब्देन तदनन्तरभावी उच्छ्वासोऽप्युपलक्ष्य सनरूपो
लक्ष्यते । स्मृतिलोपेन स्तम्भप्रलयौ लक्ष्येते । वैवर्ण्याश्रुस्वरभेदा अत्र बहिरुद्भि-
न्नस्वभावाः चित्तवृत्त्यात्मानो गृह्यन्ते । तथाहि वक्तारो भवन्ति अश्रुणा पूर्णोऽस्य
कण्ठो न च नयनजलं दृष्टमिति । एते ह्यश्रुप्रभृतयो व्यभिचारित्वाभिनेयत्वोप-
जीवनायैव मध्ये निर्दिष्टा इत्यवोचाम । वक्ष्यामश्चैतेन नपौनरुक्त्यमेवमन्यत्रापि
व्याधेरुन्मादापस्मारौ भेदेन वक्ष्यामः । वधशब्दो बन्धादेरप्युपलक्षणम् । प्रियमि-
ष्टजनवधादियेन वाक्येनोच्यते तस्य श्रवणात् । तेन च इष्टजनस्य विभावनाशादि-
दृश्यमानं श्रूयमाणं वा कविभिः करुणविभावत्वेनोपनिबन्धनीयमिति तात्पर्यम् ।
एभिरित्येवंप्रकारैः भावशब्दोऽत्रार्यायां विभाववाची अनुभावांस्तु द्वारेण चव्यभि-
चारिणोऽप्युपलक्षयितुमार्यान्तरं सस्वनेत्यादिबहुवचनं प्रकृतिदेशकालदशा-
हेत्वादिभेदेनानेकप्रकारत्वज्ञापनार्थं मोहो जडता तेनान्ये व्यभिचारिण उप-
लक्ष्यन्ते । देहस्यायासनं पातनवेष्टनादि अभिघात उरस्ताडनादि । एते चानुभा-
वाः प्रकृतिभेदेन यथायोगं विभजनीयाः । करुणो रौद्रादित्युत्क्रमः सकीर्त्तिरौद्र
इति क्रमं केचिदाहुः ।

अधुना रौद्रं लक्षयति । अथ रौद्रो नामेति । आत्म-
ग्रहणस्यायमाशयः । अन्यायकारिता प्राधान्येन क्रोधस्य विषयस्तादृशि च
जने सर्वोऽपि मनोरथैरपि रुधिरपानमपि नामादीयन्ते । तथा चाह लोकः

तादृशो यदि लभ्येत तत्तदीयं रुधिरमपि पीत्वा न तृप्येत । महाकविना भा-
मेनापि स्वप्रबन्धउक्तः ।

त्रेतायुगं तद्धि न मैथिली सा
रामस्य रागपदवीं मृदु चास्य चेतः
लब्धा जनस्तु यदि रावणमस्य कायं
प्रोत्कृत्य तन्न तिलशो न वितृप्तिगामी ॥ इति ॥

तेन हास्यवत्साधारणविभावत्वाच्चर्वणापि क्रोधमय्येवेति तद्रसनात्मा रौद्रः
क्रोधात्मक एव उद्रिक्तं हन्तृत्वं येषान्त उद्धताः तद्वेषधारिणो ये नटाः तत्प्रकृतिः
चर्वणोदयहेतुरस्य अत्र व्याचक्षते युद्धहेतुकोद्धतमनुष्येषु भीमसेनादिषु
रुधिरपानादिलक्षणः रक्षोदानवास्तु स्वभावरौद्रा इति । तदसत् । भीमस्य रुधिर-
पानन्न युद्धहेतुकम् । अपि तु विपर्यये । उद्धतस्वभावत्वादेव ह्यसौ क्रोध-
परवशः सन्ननुचितमपि प्रतिज्ञातवान् तन्निर्वाहायैव शाक्ताधिष्ठानमस्य
कविना वेणीसंहारे वर्णितम् । तस्मात्सर्व एवैते स्वभावक्रोधना तदनुसारिणि नटे
रौद्र आस्वाद्य इति मुतस्य प्रकृतिसंग्रामहेतुक इति चायमर्थः । युद्धस्य कविनट-
प्रदर्श्यमानहेतुकत्वे सत्ति हेतुधीरो हि तस्योचितो हेतुर्न क्रोधः । तथा च प्राधान्ये-
न युद्धेन वीर एव व्यपदेक्ष्यते तथाम्हि । नन्वेते स्वभावक्रोधना अपि किमुद्दी-
पनमपेक्षन्ते ओमित्याह स चेति । क्रोधादिपरकर्तृकं आधर्षणं दारादिस्वी-
करणं अधिक्षेपो देशजात्यभिजनविद्याकर्मनिन्दा अनृतस्य वकस्यापि
अपसत्यस्य वचनं उपघातो गृहभृत्याद्युपमर्दनं वाक्पारुष्यं वधाद्युपन्यासेन
तर्जनं अभिद्रोहो जिघांसा मात्सर्यं गुणेष्वसूया आदिग्रहणाद्राज्यापहरणादि

एतैरुत्पद्यते तद्विभावत्वेन वर्ण्यमानैः अस्य ताडनादीनि कर्माणि रक्तनयनाद-
योऽनुभावा इति पृथङ्निरूपणं तुल्येऽप्यनुभावत्वे विशेषख्यापनार्थं विशेषस्तु
पूर्वेषां वचनमात्रेणव्यावर्णितं रङ्गे प्रत्यक्षतोऽप्रदर्शनीयत्वात्। यद्वक्ष्यते युद्धं
राज्यभ्रंशो मरणं नगरोपरोधनं चैव अप्रत्यक्षकृतानि प्रवेशकैः संविधेयानि।
रक्तनयनादि रङ्गे प्रत्यक्षेणकृतं प्रहरणं तु पूर्वत्र प्रमादपठितमिति केचित्।
इदन्तु पृथगभिधाने तुच्छं प्रयोजनम्।

अयं चात्राशयः रक्षोदानवोद्धतमनुष्याः
उद्दीपनहेतुभिर्विनापि चेष्टितमात्रं यदपिकुर्वते नर्मगोष्ठ्यामपि च तत्र ताड-
नादिप्रधानं तद्दर्शयति यच्च किंचिदारभन्त इति उद्दीपनसंभवे ताडनादिरस्त
एव रक्तनयनाद्याधिकी भवति। अत एव पुनश्शब्दः तत्र ताडनं तलाद्यभिघातः
पाटनं द्विधाकरणम्। पीडनं मर्दनम्। कर्तनं छेदनम्। परस्परमित्यादि वियोजनं
आवेष्यन्तो प्रहरणानां आसमन्तादुद्धरणं शस्त्रस्य संपातनमाविदारयन्तोऽपि
संप्रहरणं विदारयतः पातनं तेन रुधिरस्याकर्षणं रक्षःप्रकृतयो हि निर्मणा
विप्रहरन्ति। किन्तु रुधिरगमनमात्रफलं नत्वधिकं रक्ते च ते नयने भ्रुवोर्मूलस-
मुत्क्षेपो भ्रुकुटी। दन्तोष्ठस्य यथायोगं पीडनं हस्तास्ययोरन्योन्यनिष्पेषः संघर्षणं
भावा इति व्यभिचारिणः असंमोहः संमोहविपरीतो विरोधेन तत्राहत्ति संगृहीत-
सम्यग्बोधः उत्साहोऽत्र व्यभिचारी क्रोधस्य प्राधान्येन रसनीयत्वात् स्वेदो ह्यो
बाह्या आभ्यन्तरसात्त्विकाभावेऽपि विषस्पर्शज्वरादिनाभवन्ति ततो नैकान्तिका
अन्तरा अनुद्भिन्ना व्यञ्जनग्रहणादिभिरुद्भिन्ना बाह्यैः स्वेदादिभिर्व्यभिचा-
रिरूपाः पठिताः। एषोऽत्र रौद्रो रस इत्यभिप्रायं गृहीत्वा चोदक आह

यदभिहितमिति। सिद्धान्ती तु एष रौद्रो भवत्येवेत्यभिप्रायेणाह अस्त्यन्यथा
मिति। अन्येषां कविनटाभ्यां प्रयुज्यमानानां क्रन्धीजन्यत्वनावकाशो अनुवृत्तिः
अत्रेति राक्षसादिषु एतदेव व्यनक्ति। तेहीति स्वभावशब्दानन्तरं मत्कारणकार्य-
वेत्ययोगव्यवच्छेद एव सूचितः। स्वयं तेषां भावजन्तुत इत्यर्थः। तेनाङ्गरौद्रापत्या-
सोऽपि अविरुद्धोऽन्यथा स्वभावरौद्र एव रक्ताक्षादिभिरभिधेयस्य अनुबद्धवाद-
मुख्यादि तत्र राक्षसादिकं दर्योऽपि न परिजन सद्यो हृद्यादीति प्रतीयन्त इत्याश-
येनाह कस्मादिति।

अत्रोत्तरं बहुबाहव इति। लोकप्रसिद्धाकारविपरी-
तो हि तेषामाकारस्तत्र च परिविनाशनादिसन्धिजनितकल्पक्षयादिकं दृष्टमेव
कर्म तेषां व्याप्रियन्तेऽतस्ता दृश्येष्वदृष्टेषु स एव क्रोधात्मकोऽभिसन्धिः जन्यत
इति सामाजिकानां नाट्यदर्शने रौद्रास्वादः तथा च रागादेव य क्रोधकाले दृष्टं तस्य-
दैव तेषां उद्वृत्तं तारकयोरुद्वृत्तिर्लोचनमत एव भीममसितं कृष्णं सदैव रूपं येषां
नित्ययोगः इति। अत एव च न बहुव्रीहिस्तत्र कृतः।

न केवलं तत्कायस्तदीय इत्थं यावच्चेष्टितमपि तदीयं
दृश्यमानं रौद्रास्वादजनकमेवेति दर्शयति। चेष्टितेति। स्वभावेनेति च तस्यापि क्रि-
रेऽपि यच्चेष्टितं वाचिकं कायिकं वा तदेषां ताडनादिप्रधानमिति दृश्यमानं काव्ये
प्रयोगे च रौद्रास्वादहेतुः यागाङ्गे अधिकारणे यस्यमानस्तु चेष्टितं अप्रत्यक्षत्वा-
न्नोक्तं सर्वमिति यदुक्तं तत्स्फुटयति। शृङ्गारश्चेति। शृङ्गारशब्देनात्र तद्विभावः
प्रमदोद्यानादिः सोऽपि तैः प्रसभमिति क्रूराकारतया सेव्यते यत्रोग्रस्य वर्जनमु-
क्तं पुनरन्यदिति चशब्दस्यार्थः। तथा आसीते पतितर्वाविभ्रमहरभ्राम्य

इत्याद्युदाहरणम्। तथा नानादेवसेवादितिगाढक्रोडं मत्तयमकृतः शृंखलाशामदत्तेति रौद्रत्वं न कदाचित्कुर्वन्नयनापीति दर्शयति प्रायश इति।

गर्विष्ठदतमनुष्येषु तर्हि कथं रौद्रविकारो नहि ते बहुबाहुत्वादियुक्ताः इत्याशंक्याह। तेषां चेति। राक्षसादीनामनुकारिण इति तामसप्रकृतितया तत्सदृशाः अनुगामित्वेन [illegible] इत्यर्थः कथमित्याह। संग्रामसंप्रहारग्रहणेन पूर्वोक्तं ताडनपाटनादि गृह्यते। तेन बहुबाहुत्वाद्यभावेऽपि उद्धतमनुष्या वागङ्गचेष्टितेन क्रोधोचितो रौद्रप्रकृतय इति लक्ष्यन्ते। एवं रक्षोदानवेत्यादावयोगव्यवच्छेदो निश्चितः।

अन्ये तु वीरप्रधानाः अश्वत्थामजामदग्न्यादयः तेषु कारणमहिम्ना भवत्येव क्रोधो रौद्रास्वादयोग्यः राक्षसादीनामपि पहासशोकादिः स्वःकारणादितोऽभिभूतक्रोधो हास्यकरुणाद्यं चेह योगो भवत्येव तेनैषां न रौद्र एव रसः

ननु सामाजिकानां तथाभूतराक्षसादिदर्शने कथं क्रोधात्मक आस्वाद उच्यते। हृदयसंवाद आस्वादः क्रोधे च हृदयसंवादः तामसप्रकृतीनामेव सामाजिकानामिति दानवादिसदृशाः तन्मयीभूताः अन्यायकारिविषयं क्रोधमास्वादयन्तीति न किंचिदवद्यम्॥ विकृतं यच्छेदनं यंञ्यादिकरणं +युद्धादिपरेण क्रियमाणौचित्यं तेन युद्धाद्यनुमितस्य परक्रोधादेर्विभावत्वमुक्तम्। संग्रामाय संभ्रमः शस्त्राह यत्त्वीरसम्बद्धमिदमाह युद्धवीरेऽपि हितन्नास्ति इह तु वक्ष्यते उग्रकर्मेति। उग्राणि औग्र्यप्रधानानि यानि रणेन त्वरा। अनुभावानाह- नानेति॥ मारणप्राधान्यं नानाप्रहरणेन शिरःकर्तनादि हृतशरीरस्यापि

क्रोधातिशयं सूचयन् वीराद्भेदमाह- युद्धवीरेऽपि हि तन्नास्ति। इह तु वक्ष्यते। उग्रकर्मेति उग्राणि औग्र्यप्रधानानि यानि शिरःकर्तनादीनि तेषां या क्रियाऽभिनीतिः सा आत्मा प्रधानं यस्येति भरतमुनिरुक्तश्लोकेनोपसंहरति इति रौद्ररस इति।

क्रमप्राप्तं वीरं लक्षयति युद्धवीरे हि संग्रामसंप्रहारयोगो रौद्रेऽपीति। वीरं जिघांसेत्यानन्तर्यमथशब्देनाह- उत्तमानां प्रकृतिः स्वभावो यतः उत्साहोऽतो वीररसोऽपि तथा यदि वा काव्ये नाट्ये च प्रयुज्यमान उत्तमप्रकृतिर्हेतुर्यस्योत्तमवर्णतायां हि सर्वत्रोत्साहः आस्वाद्यो ह्यादिसंपत्तिरिति सैव विभावत्वेनोपदिष्टा। असंमोहेनाध्यवसायो हि वस्तुतत्त्वनिश्चय इति मन्त्रशक्तिः दर्शिता असद्वृत्तत्वाभिनिवेशोऽसंमोहो रावणाहतः उत्साहकारीत्यसन्, भवत्यत एव चतुर्ष्वपि नायकेषु वीरत्वमनुयायित्वेन वक्ष्यते धीरोदात्त इत्यादि। तत्र सर्वो जन उत्साहवानेव किं तु विषय इत्यनुपदेश्यचरिताय दीयत उचरितमुपदेशार्हं तेषामुचित एवावसरे उत्साहोऽभिव्यक्तिः उचितत्वं चावसरस्यासंमोहनोहादिसंपत्तिरिति सैव विभावत्वेनोपदिष्टा। असंमोहेनाध्यवसायो हि वस्तुतत्त्वनिश्चय इति मन्त्रशक्तिर्दर्शिता। असद्वृत्ताभिनिवेशोऽसंमोहो रावणाहतः उत्साहकारीत्यसत्॥ अशब्दार्थत्वात्। तत्रापि च पराक्रमनयादिरेव विभावः सन्ध्यादिगुणानां सम्यक् प्रयोगो नयः इन्द्रियजयो विनयः बलं हस्त्यश्वरथपादाताः पराक्रमः परकीयमण्डलाद्याक्रमेणावस्कन्दः युद्धादिके सामर्थ्यं शक्तिः। प्रतापः शत्रुविषये सन्तापकारिणी प्रसिद्धिः प्रभावोऽभिजनधनमन्त्रसंपत् आदिग्रहणेन यशः प्रभृति। एते च संपूर्णस्वभावा एव विभावा भवन्त्युत्तमस्य

कदाचित्कश्चिदधिक इति पृथक्पृथगुदाहरणमसत् ।

वस्तुतो ह्यत्रोदाहरणं सर्वमेव रामादिचरिते सचि-
वायत्तसिद्धौ च वत्सराजप्राये नायके यथायोगं सचिवगता अप्येते मन्तव्याः ।।
प्रतिनायकगता अपि चैते उत्साहव्यञ्जका इति यथायोगं व्यस्तसमस्तभेदकल्पनं
कविना कार्यम् । स्थैर्यमचलनं गाम्भीर्यकृतं संवरणं शौर्यं युद्धादिक्रिया । त्यागो
दानं वैशारद्यं सामाद्युपायचतुष्कस्य एकद्वित्रिचतुरादिभेदैः यथाविषयं नियोजनम् ।
विविधधर्मादिलक्षणमर्थजातं विशेषैरभिसन्धाय विषादित्वात् अविस्मयाद-
मोहाच्च योऽध्यवसायो निश्चयः स चोत्साहयतीत्युत्साहः

एतदुक्तं भवति । आपत्पङ्कनिमग्नतां स्वल्पे
सन्तोषं मिथ्याज्ञानं चापास्य यस्तत्त्वनिश्चयः स एवोत्साहहेतुः प्रधानतयोपदिष्ट
तमः प्राधान्यादशास्त्रिकानुचितबन्धादपीति मोहविस्मयप्राधान्यं स्थितिः
स्थैर्यं वीर्यं शौर्यं गर्वपदेन तदनुभावो लक्ष्यते । उत्साहनमुत्साहो बलस्य विष-
ण्णप्रायस्योत्तेजनं यथा सेतुबन्धकाव्ये । पराक्रमः पराक्रमणा इत्थमत्र भवद्भि-
र्यतितव्यं योद्धव्यमिति बलस्य व्यापारणादितिकर्तव्यानां भृत्यानां प्रभावनाप्र-
भावसंपादनं आक्षेपो वस्त्वन्तरस्य सूचनं । तेन कृतानि तत्प्रधानानि यानि वा-
क्यानीति गम्भीरदुरवगाहार्थं वाक्यानामित्युक्तम् । वीरस्य भीतानयवप्रधानत्वात्
भयानकं लक्षयति अथेति । विकृतो रवोऽट्टहासादिः सत्त्वानां पिशाचानां दर्शनं
त्रासोद्वेगौ परगतौ शून्यागारस्यारण्यस्य च गमनं प्राप्तिः स्वजनस्य यौ वध-
बन्धौ तयोर्दर्शनं प्रत्यक्षेण श्रवणं आगमेन कथा विदानिक्रान्तरयोरपि पुनरनु-
सन्धानेन स्मरणं वेपितुं प्रवृत्तं यत् करचरणं आदिकमेव भयव्यञ्जकव्याख्यादि

वैलक्षण्यसूचनात् पुलकारोमकूपान्नतिः स्वरस्य भेदस्य भावविपर्ययः । गुरुनृ-
पयोरित्ययमाशयः । भयं तावत्स्त्रीनीचबालादिषु वक्ष्यते नोत्तममध्यमप्रकृति-
षु । तेऽपि तु गुरुभ्यो राज्ञश्च भयं दर्शयेयुः तद्दर्शनेऽपि एवं सुतरामुत्तमत्वं भवति ।
अप्रभुत्वं चामात्यानां । यथाह- स्वेच्छाचारी भीत एवास्मीति । अनुभावाश्चैतथा-
श्लिष्टास्तत्र क्रियन्ते । लोके येन सत्यत एव भीतोऽयमिति गुर्वादीनां प्रतीतिर्भवति ।
अस्वाभाविकत्वाच्च कृतकत्वं बहुतरकालानुवर्तनेन आस्वाद्यत्वाच्च रसत्वं न च
व्यभिचारित्वं तद्विदत्तदास्याद्यदि स्वभावत एव नाकिंचित्कालत्वमुत्पद्यते । न
गात्रादीनां भेदो वर्णकर्मसंस्थानादिविपर्ययो वाक्यमतिक्रम्याति वोद्घर्णं कांदिशी-
कत्वेन विलक्षचक्षुः कृताः उद्वेगत्वं सन्नसादो गात्राणां स्रस्तताम् मुखस्य तालु-
निशोषः हृदयस्पन्दनं अतिवेगेन हृ भयमित्यभिनयमिति वीररसइत्यायातः
संबध्यते ता एता स्थायी एकप्रघट्टतया पूर्वाचार्यैः लक्षणत्वेन पठिताः मुनिना तु
सुखसंग्रहाय यथास्थानं निर्दिष्टाः । सत्त्वसमुत्थमिति सत्त्वं मनस्समाधानं तज्जन्यं
इति नटस्येयं शिक्षा सा च सर्वविषयेति टीकाकारः । तदिदमसत् । कविनटशि-
क्षार्थमेव सर्वमिदं प्रकरणं लोके विभावानुभावाभिनयादि व्यवहारात् । तस्मा-
दयमत्रार्थः । एतत्तावद्भयं स्वभावजं रजस्तमःप्रकृतीनां नीचानामित्यर्थः । येऽपि
च सत्त्वप्रधानास्तेषां सत्त्वसमुत्थं प्रयत्नकृतमेभिरेवानुभावैः कार्यम् । किन्तु मृदु-
चेष्टितैरेतैस्तत्कृतकं पुनःशब्दो विशेषद्योतकः ।

ननु च राजादि किमिति गुर्वादिभ्यो भयं कृतं
दर्शयति दर्शयित्वा किमिति मृदून् गात्रकम्पनादीन्प्रदर्शयति । किमिति भयानक
एव कृतकत्वमुक्तं सर्वस्य हि कृतकत्वमुक्तं भवति यथा वैश्याधनार्थीति कृतकं -

रतिमादर्शयति] इत्याशंक्यसाधारणमुत्तरमाह- तथैव कार्यमिति" भयेहिप्रदर्शि-
ते गुरुर्विनीतं जानाति। मृदुचेष्टिततया चाधमप्रकृतिमेनं गणयति। कृतकश्रृङ्गारा-
वैशेयोपदिष्टानां नकाचित् पुरुषार्थसिद्धिः। तेनैव हि उक्तेन प्रकारेण कार्यं पुरुषा-
र्थो लभ्यन्ते र्थविशेषो लभ्यते। यत्र तु राजा नकृतकं परानुग्रहाय क्रोधविस्म-
यादीन्दर्शयति तत्र व्यभिचारित्वेन तेषां न स्थायित्वेत्येतदर्थसूचितामेव गुरुवेशा-
न्तरप्रसिद्धामार्यां पठति। करचरणेति॥ नित्यमिति" कृतकत्वेऽकृतकत्वे च] अवसर-
प्राप्तं बीभत्सं लक्षयति अथेति। हृदयस्यापि किंचित् कस्यचित् निसर्गतः
अप्रयत्नं लशुनमिव द्विजानाम प्रियं (जा)त्यादि दोषाद्यथा श्लेष्मोपहतस्यक्षीरं
अचोद्यं स्वरूपेण (दु)ष्टमपि तु मत्ताद्युपहतं अनिष्टं यत्रानिशं भुक्तत्वेनेच्छाविह-
तासंहारः पिण्डीकारणं मुखस्येति तदङ्गानां संकोचनं उल्लेखनमुल्लाघः निष्ठी-
वनं कफनिरासनं उद्वेजनं गात्रोद्धूलनं नासाप्रच्छादनं दुर्गन्धप्राये दृष्टं प्रति-
घातादव्यक्तानि पादयोः पतनानि यदिवास्थिकं स्थिककङ्कालाद्याकुले पितृवने सं-
चरतोऽस्फुटितानि पादपतनानि क्वचिद्दीर्घाणि अन्यत्र ह्रस्वानीति सवित्रान्ते
अद्भुत इत्युक्तं लक्षयितुमाह- अथेति" दिव्या गन्धर्वादयः ईप्सितः शक्यप्राप्ति-
रर्थो अन्यो मनोरथस्तयोः प्राप्तिः उपचयनं देवकुलेच गमनस्तं(त्ता)स्याद्भुतविभावो
येन तत्रत्यं सरः संनिवेशादि नक्वचित् दृष्टम्। सभागृहविशेषः विमानादीनि
दिव्यरथा मायारूपपरिवर्तनादिका इन्द्रजाले मन्त्र द्रव्य हस्तयुक्त्यादिना असं-
भववस्तुप्रदर्शनं तस्येत्यद्भुतस्य हर्षशब्देनात्र तदनुभावाः साध्विति वदनं
साधुवादः दानं धनादेः प्रबन्धं सततं कृत्वा हाहाशब्दस्य (क)कारणं चलस्य
अङ्गुलस्य भ्रमणं अतिशेत इत्यतिशयोऽन्यापेक्षया योऽर्थउत्कृष्टस्तेन वाच्यभूतेन

युक्तं यद्वाक्यं यस्य शिल्पं कर्मरूपं कर्मात्मकं प्रशंसायां रूपं सर्वमित्येवं प्रकार-
मिति यावत्। स्पर्शग्रहशब्देन तद्विभावतया (वादयो) विनयो लक्ष्यमाणः लक्ष्यते। किंचि-
दाकुञ्चिते नेत्रे कृत्वा

किंचिदाकुञ्चिते नेत्रे कृत्वा भ्रूक्षेपमेव च"
तथांसगण्डयोः स्पर्शात् स्पर्शमेवं विनिर्दिशेत्"

इति गात्रस्योर्ध्वं साह्लादं धूननं उल्लुकसनं बहुवचनं प्रकृतिभेदेन प्रकारवैचित्र्यं
सूचयति।

अथ प्रधानभूतविभावानुगुणभावप्रतिपादनं भेदप्रद-
र्शनं व्याजेन करोति। श्रृङ्गारमित्यादिना वाक्यरौद्रोहि तत्र स्वभावरौद्र इति व्य-
वहरिष्यते। स्वभावानुसारित्वाद्वाक्यस्य धर्मोपघातज उत्तमानामपि शोभनहेतु-
त्वात् शोकशब्देन स्वजनादिनाशोच। एते त्रयो विभावा धर्मशब्देनाग्निष्टोमादि-
क्रिया अत एव तद्धनादीनि नियमानुभावात्मकं प्रतिनायकगतलुविभावरूपम-
पि व्याजादिति कृतक इत्यर्थः। अनेनानुभावमार्दवं दर्शितम्। अपराध्यन्तीत्य-
पराधा(द्दा)श्चोरादयः

यत्तु स्वभावत्रस्तहृदयानां स्त्रीबालादीनां तृणेऽपि
कम्पमाने भयं तद्वित्रासितकम्। विशेषेण त्रास्यत इति वित्रासितो बालादिः तत्प्र-
कृतित्वाद्भयानकम्। तथोक्तम्- ततः संज्ञायां कन्। गुर्वाद्यपराधात् परमार्थतोऽपि
उत्तमानां दयावेग इति वसत्। भयं हि विनाशाशङ्कात्मकं नोत्तमेषु संभवति
तथा च भयन्नाम स्त्रीनीचप्रकृतिकमिति सामान्येन लक्ष्यते। रुधिरान्त्रादिदर्श-
नाद्ये बीभत्सक्षोभणत्वात्क्षुद्रहृदः।

1

यदाहुः क्रौञ्चात्स्वाङ्गं जुगुप्सति तथापि तर्कबाधने प्रतिपक्षभावजमिति तेन
सोऽपि परमार्थतस्त्रिविध एव द्वितीयक इत्यनेन तस्य दुर्लभत्वेनाप्राचुर्यं सूचयति
किय इति यत्र सभावि मानादयोऽनुभावाः आनन्दयतीति आनन्दो मनोरथाव-
प्त्यादिः स एव हर्षयतीति हर्षः एषु च शृङ्गारमित्यादिषु श्लोकेषु चकारात् विभावा-
नुभावान्तरनिरासशङ्कां पराकर्तुमेवकारः; इयन्त एव तेषां मुख्यत्वेन संगता इति
दर्शनार्थाः तथाशब्दा अनुरक्तविभावा ऊहनीया इति यथायोगं योज्यम् केचित्पुनर्नव
रसा इति पठन्ति तन्मते शान्तस्वरूपमभिधीयते तत्र केचिदाहुः शान्तः शमस्था-
यिभावात्मकः तपस्यद्योगिसंपर्कादिभिः विभावैरुत्पद्यते तस्य कामक्रोधाद्यभा-
वरूपैः अनुभावैरभिनयः व्यभिचारी धृतिमतिप्रभृतिः।

एतदपरे न सहन्ते शमशान्त्योः पर्यायत्वात्
एकोनपञ्चाशद्भावा इति संख्यात्यागात् किं च विभावा ऋतुमाल्यादयः तत्समन-
न्तरभाविनि शृङ्गारादावनुसन्धीयत इति युक्तम् तपोऽध्ययनादयस्तु न शान्तस्य
शमनस्य हेतवः तत्त्वज्ञानस्यानन्तरहेतवः इति चेत् पूर्वोक्तोदित तत्त्वज्ञानोऽपि तर्हि
प्रयोज्यत इति तपोऽध्ययनादीनां विभावता त्यक्ता स्यात् कामाद्यनुभावोऽपि
(नटानुभावैः) नानुभावैर्हि शान्ताद्विपक्षादप्यावृत्तेः अगमकत्वात्प्रयोगात् [ ] समवायितं च [न हि]
चेष्टास्तु परमः प्रयोगयोग्यः सुप्तमोहादयोऽपि हि निश्वासोच्छ्वासपतनभूषणादिभिः
चेष्टाभिरेवानुभाव्यंते धृतिप्रभृतिरपि प्रप्तविषयोपभोगः कथं शान्ते स्यात्
नत्वाकिंचित्करत्वमात्रेण तत्त्वज्ञानोपायिप्युता धन्ते विनेये चेति परदुःखदुःखित-
मनसो दृश्यते सम्यग्दर्शनसमावस्थां प्राप्ता अपि तु संसारे तन्न शान्तो रस
इति अत्रोच्यते इह तावत् धर्मादित्रितयमेव मोक्षोऽपि पुरुषार्थः शास्त्रेषु

स्मृतीतिहासादिषु च प्राधान्येनोपायतो व्युत्पाद्यत इति सुप्रसिद्धम् यथा च
कामादिषु समुचिताश्चित्तवृत्तयः रत्यादिशब्दवाच्याः कविनटव्यापारेणास्वाद-
योग्यताप्रापणद्वारेण तथाविधहृदयसंवादवतः सामाजिकान्प्रति रसत्वं शृङ्गारा-
दितया नीयन्ते तथा मोक्षाभिधानपरमपुरुषार्थोचिता चित्तवृत्तिः किमिति
रसत्वं नानीयत इति वक्तव्यम् या चासौ तथाभूता चित्तवृत्तिः सैवात्र स्थायि-
भावः एतत्तु चिन्त्यम् किन्नामासौ तत्त्वज्ञानोत्थितो निर्वेद इति केचित् तथाहि-
दारिद्र्यादिप्रभवो यो निर्वेदः ततोऽन्य एव हेतोस्तत्त्वज्ञानस्य वैलक्षण्यात् स्थायिसं-
चारिमध्ये चैतदर्थमेवायं पठितोऽन्यथा माङ्गलिको मुनिस्तथा न पठेत् जुगुप्सां
च व्यभिचारित्वेन शृङ्गारे निषेधं मुनिर्भावानां सर्वेषामेव स्थायित्वसंचारित्व
चित्तताप्त्वानुभावस्थत्वात् नियोग्यतोपनिपातिता निर्देशाद्यर्थ बलाकृष्टा॥

ननु जानाति तत्त्वज्ञानजन्य निर्वेदस्थास्यन्तरोप-
मर्दकभाववैचित्र्यसहिष्णुभ्यो रत्यादिभ्यः ये परमस्थायी शान्तः स एव हि स्था-
य्यन्तराणां उपमर्दकः इदमपि पर्यनुयुज्यते तत्त्वज्ञानजो निर्वेदो न्यवस्थायीति
वदता तत्त्वज्ञानमेवात्र विभावत्वेनोक्तं स्यात् वैराग्यबीजादिषु कथं उपायंतदु- (विभा)
(का) पायतादिचेत् कारणकारणोऽयं विभावतान्यवहारः सचातिप्रसङ्गावहः

किं च निर्वेदो नाम सर्वत्रानुपादेयताप्रत्ययो
वैराग्यलक्षणस्य च तत्त्वज्ञानस्य प्रत्युतोपयोगी विरक्तो हि तथा प्रयतते यथास्य
तत्त्वज्ञानमुत्पद्यते तत्त्वज्ञानाद्धि मोक्षो न तु तत्त्वं ज्ञात्वा निर्विद्यते निर्वेदाच्च मोक्ष
इति वैराग्यात् प्रकृतिलय इति हि तत्रभवन्तः॥

ननु तत्त्वज्ञानिनः सर्वत्र दृढतरं वैराग्यं दृष्टं

तत्रभवद्भिः

अप्युक्तं तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति भवत्येवं तादृशान्तु वैराग्यं ज्ञान-
स्यैव पराकाष्ठेति भुजङ्गविभुनैव भगवताभ्यधायि। ततश्च तत्त्वज्ञानमेवेदं
तत्त्वज्ञानमालयापरिपोष्यमाणमिति न तन्निर्वेदः स्थायी। किन्तु तत्त्वज्ञानमेव स्था-
यीति भवेत्

यत्तु व्यभिचारिव्याख्यानावसरे वक्ष्यते तच्चिरकाल
॥यथा
विश्रमविप्रलब्धस्योपादेयत्वनिवृत्तये यत्सम्यग्ज्ञानं यथा दुग्धोऽनड्वांस्तनभर-
कृः
नतो गौरिति परं परिष्वक्तः षण्ढो युवतिरिति लावण्यरहितः कृता पैडूर्याशा वि-
ता॥इ
कचकिरणे काचशकले मया मूढेन त्वां कृपणमगुणज्ञे प्रणमतेति। तन्निर्वेदस्य
खेदरूपस्य भावत्वेनैतच्च तत्रैव वीक्ष्यामः।

ननु मिथ्याज्ञानमूलो विषयगन्धः तत्त्वज्ञानात्
प्रशाम्यतीति दुःखजन्मा सूत्रेणाक्षेपात् अपादैर्महर्षिः मिथ्याज्ञानापचयकारण-
तत्त्वज्ञानं वैराग्यस्य दोषापायलक्षणस्य कारणमुक्तम्। ननु ततः किम्। न नु वैरा-
ग्यं निर्वेदः क एवमाह- निर्वेदो हि शोकप्रवाहप्रसररूपश्चित्तवृत्तिविशेषो वैराग्यं
तु रागादीनां प्रध्वंसः।

भवतु वा वैराग्यमेव निर्वेदः। तथापि तस्य स्वकार-
णवशात् मध्यभाविनोऽपि न मोक्षे साध्ये सूत्रस्थानीयतात्यपादाचरितैव। किं च
त्व ।म३॥
तत्त्वज्ञानोत्थितो निर्वेद इति शमस्यैवेदं निर्वेद शमहतं स्यात्। समासान्तयोः
पर्यायत्वन्तु हासहास्याभ्यां व्याख्यातं सिद्धम्। साध्यते यदलौकिकत्वेन सा-
धारणासाधारणतया च वैलक्षण्यं शमशान्तयोरपि सुलभमेव। तस्मान्न निर्वेद-
स्थायीति अन्ये मन्यन्ते। रत्यादय एवाष्टौ चित्तवृत्तिविशेषाः उक्तास्त एव

या
कथितविभावविविक्तश्रुताद्यलौकिकविभावविशेषसंश्रया विचित्रा एव तावत् ततश्च
स्थायी
तन्मध्यादेवान्यतमोऽत्र तत्रानाहतानन्दमयस्वात्मविषया रतिरेव मोक्षसाधनमि-
ति सैव शाक्ता स्थायिनीति यथोक्तं यश्चात्मरतिरेव स्यात् आत्मतृप्तश्च
मानवः। आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यत इति।

एवं समस्तविषयं वैकृतं पश्यतो विश्वं च शोच्यं
विलोकयतः सांसारिकं च वृत्तान्तमपकारित्वेन पश्यतः सातिशयं असंमोह-
र्था
प्रधानः विनयमाश्रितवतः सर्वस्मात् विषयसार्थात् बाह्यतः सर्वलोकस्पृहणीया-
दपि प्रमदादेर्जुगुप्समानस्य पूर्वस्वात्मातिशयलाभात् विस्मयमानस्य मोक्ष-
सिद्धिरिति हासादीनां विस्मयान्तानामन्यतमस्य स्थायित्वं निरूपणीयं जैत-
तन्मुनेर्न संमतम्। यावदेव हि विशिष्टाद्विभावात् परिगणयत्यादिशब्देन च
न
तत्प्रकारानिबान्यसंगृह्णीते तावदेव तद्भ्रतिस्फालौकिकहेतूपन्नानां रत्यादीना-
मनुजानन्नेवापवर्गविषयत्वम्।

एवंवादिना तु परस्परमेव विचारयतामेकस्य
त
स्थायित्वं विशीर्यत एव तदुपायभेदात्तस्य तस्य स्थायित्वमित्यप्युच्यमानं प्रगु-
णमेव स्थायिभेदेन प्रतिपुरुषं रसस्याप्यानन्त्यापत्तौ मोक्षैकफलत्वादेको रस
इति चेत् क्षेमैकफलत्वे वीररौद्रयोरप्येकत्वं स्यात्।

अन्ये तु पानकरसवदविभागं प्राप्ताः सर्व एव
(इ)
रत्यादयोऽत्र स्थायिनमित्याह- चित्तवृत्तीनामयुगपद्भावात् अन्योन्यं च विरोधा-
देतदपि न मनोज्ञम्। कस्तर्ह्यत्र स्थायी। उच्यते। इह तत्त्वज्ञानमेव तावत् मोक्षसाध-
नमिति तस्यैव मोक्षस्थायिता युक्ता तत्त्वज्ञानं च नामात्मज्ञानमेव आत्मनश्च

व्यतिरिक्तस्यैवाक्षदयस्येव ज्ञानं परो ह्येवमात्मनात्मैव स्यात्। विपश्चितं चैतदस्म-
द्गुरुभिः अस्माभिश्चान्यत्र वितन्यत इति इह नातिनिर्बन्धः कृतः। तेनात्मैव
ज्ञानानन्दादिविशुद्धधर्मयोगी परिकल्पितविषयोपरागरहितोऽत्र स्थायी, न चास्य
स्थायितया स्थायित्वं वचनीयम्। रत्यादयो हि तत्तत्कारणान्तरोदयप्रलयोत्प-
द्यमानविरुद्ध्यमानवृत्तयः कंचित्कालमापेक्ष्यकतया स्थायिरूपात्मभित्तिसंश्रया-
षट् स्थायिन इत्युच्यन्ते। तत्त्वज्ञानं तु सकलभावान्तरभित्तिसंश्रयाः षट् स्थायिन
इत्युच्यन्ते। तत्त्वज्ञानं तु सकलभावान्तरभित्तिस्थानीयं सर्वस्थायिभ्यः स्थायितमं
सर्वा रत्यादिकां स्थायिचित्तवृत्तिं व्यभिचारीभावयन्ति सर्गत एव सिद्धस्थायिभा-
वमिति (ता) तत्त्ववचनेन। अत एव पृथगस्य गणना न युक्ता। नहि खण्डमुण्डयोर्मध्ये
तृतीयं गोत्वमिति गण्यते तेनैकान्नपञ्चाशत् भावा इत्यव्याहतमेवास्यापि कथं
पृथक् गणनेति चेत् पृथगास्वादयोगादिति ब्रूमहे। नहि रत्यादय इवेतरासंवृत्ते-
न वपुषा तथाविधमात्मरूपं लौकिकप्रतीतिगोचरः स्वगतमप्यविकल्परूपे
व्युत्थानावसरेऽनुसन्धीयमानं चित्तवृत्त्यन्तरकलुषमेवावभाति। भासतां वा
लोके तथा तथापि न संभवन्मात्रस्थायिनां गणनं रसेषु तेषु अनुपयोगात्
अपि तु व्यभिचारित्वाल्लक्षणीयत्वं विज्ञायते नेति तथा ह्येकान्नपञ्चाशता भावैरि-
त्येतत्पक्षे घटकोपपत्तिः। न चास्यात्मस्वभावस्य व्यभिचारित्वं संभवादेवेति चिरमा-
वहत्वादनौचित्याच्च समात्मस्वभावस्य दमशब्देन मुनिर्व्यपदिष्टः। यदि तु स एव
शमशब्दे व्यपदिश्यन्ते निर्वेदशब्देन वा तन्न कश्चिद्दोषः केवलं शमश्चित्तवृत्त्यन्तं
निर्वेदोऽपि दारिद्र्यादिविभावान्तरोत्थितनिर्वेदतुल्यजातीयो न भवति तज्जाती-
य एव हेतुभेदेऽपि तद्व्यपदेशयो रतिभयादिभिरिव। तदिदमात्मस्वरूपमेव

तत्त्वज्ञानं शमता च यत्कालुष्योपरागविशेषा एवात्मनो रत्यादयस्तदनुगमेऽपि वि-
शुद्धमस्य रूपमव्युत्थानसमाधिबलादाधिशय्य व्युत्थानेऽपि प्रशान्तिता भवति
यथोक्तम्। प्रशान्तवाहिताग्निसंस्कारादिति तत्त्वज्ञानलक्षणस्य च स्थायिनः समस्त-
तोऽयं लौकिकालौकिकाश्चित्तवृत्तिकालोपाध्याभिचारितमभ्येति। तदनु भावा
एव च यमनियमाद्युपकृता अनुभावादुपाङ्गाभिनयस्य ध्यायतये च ये स्वभावाभि-
नया वक्ष्यन्ते। अत एव एतद्विषया एव। अयमेव हि स्वभावः किंभाऽपि क्वचित्
ईश्वरानुग्रहप्रभृतयः वृद्धयोश्च रत्यादयोऽत्रास्वाद्यन्ते केवलं यथा विप्रलम्भे केव-
लं औत्सुक्यं संभोगेऽपि वा प्रेमासमाप्तौ मत्तिमति तथा च रौद्रे औग्र्यं यथा
च करुणवीरभयानकाद्भुतेषु निर्वेदनिर्वृति त्रासहर्षव्यभिचारिणोऽपि प्राधा-
न्येनावभासन्ते। तथा न जुगुप्सायां सर्वथैव रागप्रतिपक्षत्वात्।

तथा हि = महाव्रतेन कपालादिधारणमसमुद्भा-
र्यादिसमुद्रादिविस्तारसंक्षेपादिकर्मी कृतिर्हि धर्मे जुगुप्साहेतुत्वेनैव निजाभ्य-
नं च देवराट्पुत्रजन्माद्युपदिष्टं स्वात्मनि च कृतकृत्यस्य परार्थघटनायामेव
उद्यम उत्साहोऽस्य परोपकारविषयेच्छाप्रयत्नरूपो दया . . पर्यायोऽभ्यधि-
कोऽन्तरंगः। अत एव . . दयावी . . केचित् दयावीरत्वेन व्यपदिशन्ति
अन्ये धर्मवीरत्वेन"

नन्वुत्साहोऽहङ्कारप्राणः शान्तस्त्वहङ्कारशैथिल्या-
त्मक व्यभिचारित्वं हि विरुद्धस्यापि नानौचितम्, रताविव निर्वेदादेः शास्याभा-
द्वलकमित्यादौ हि परोपकारणे हि उत्साहस्यैव प्रकर्षो लक्ष्यते।

नन्वुत्साहवत्या काचित् अप्यव्यवस्थायोविच्छा

प्रयत्नाव्यतिरेकेण पाषाणतापत्तेः। यत एव परिदृष्टपरापरत्वेन स्वात्मोद्देशेन
कर्तव्यान्तरं नावशिष्यते। अत एव शान्तहृदयानां परोपकाराय शरीरसर्वस्वा-
दिदानं न शान्तविरोधि। आत्मानं गोपायेत्यादिनाद्य कृतकृत्यविषयं शरीरस्थु-
त्मुपदिश्यते सन्यासीनान्तदृष्ट्यादि तात्पर्याभावात्।

तथाहि=

धर्मार्थकाममोक्षाणां प्राणाः] संस्थितिहेतवः।
तान्निघ्नता किं न हतं रक्षता किन्न रक्षितम्। इति॥

सुप्रसिद्धचतुर्वर्गसाधकत्वमेव देहरक्षाया निदानं दर्शितम्, कृतकृत्यस्य ज-
लेऽग्नौ श्वभ्रे वा पतेदिति सन्यासित्वे श्रवणात्। तद्यथा—कथंचित् प्राज्यशरी-
रं परार्थे न त्यज्यते। तत्किमिव न संपादितं भवति किमुत जीमूतवाहनादीनां नय-
तत्त्वमिति चेत् किं तेन नस्तत्त्वज्ञानित्वं तावदवश्यमस्ति। अन्यथा देहात्ममा-
निनां देह एव सर्वस्वभूते धर्माद्यनुद्देशेन परार्थे त्यागस्यासंभवत्वात् युद्धविही-
नशरीरस्य त्यागायोद्यमः [illegible]देशेनैव प्रवृत्तेर्भृगुपतनादावपि शुभतरदेहान्तर-
संपिपादयिषैवाधिकं विजृम्भेत। तत्त्वार्थानुद्देशेन परार्थः संपत्त्यै यद्यपि ते
देहत्यागपर्यन्तं उपदेशदानादि तत्तदन्तश्चात्मतत्त्वज्ञानानां असंभाव्यमेवेति तेऽपि
तत्त्वज्ञानिनः ज्ञानिनां सर्वेष्वाश्रमेषु मुक्तिरिति स्मृतिषु श्रुतौ च यथोक्तम्। देवा-
र्चनरतस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः श्राद्धी चरेदविद्यावित् गृहस्थोऽपि हि
मुच्यत इति। केवलं परार्थो हि सन्धिजान्धर्मान्परोपकारात्मफलत्वेनैवाभि-
संधाय हितां पुनरपि देहस्य तदुचितस्यैव प्रादुर्भावोऽबोधि। सत्त्वादीनां
तत्त्वज्ञानिनामपि विश्रान्तिलाभस्वभावौचित्याद्यथा रामस्य विराङ्कं पितुराज्ञां

पालयतः॥

एवं शृङ्गाराद्यङ्गत्वेऽपि मन्तव्यम्। एत एव शान्तस्य स्थायि-
त्वेऽप्यप्राधान्यम्। जीमूतवाहने त्रिवर्गसंपत्तेरेव परोपकृतिप्रधानायाः फल-
त्वात्। अनेनैवाशयेन नाटकलक्षणे वक्ष्यते। ऋद्धिविलासादिभिर्गुणैः इत्य-
नेन हि ऋद्धिविलासप्रधानमर्थकामोत्तरं सर्वं चरितं सकललोकहृदय-
संवादसुन्दरप्रयोजनं नाटके निवेशयितव्यमित्युक्तम्। एतच्च तत्रैव वर्ण-
यिष्यामः। अनेनैव चाशयेन न शान्ते कश्चन मुनिना जात्यङ्कोऽपि नि-
र्दक्ष्यते॥ तेन जात्यङ्कविनियोगाभावात् तदसत्त्वमिति प्रत्युक्तम्।

अन्ये तु जीमूतवाहनकरुणे पुत्रत्राताऽभवि-
ष्यतीति शरणार्थिनीं वृद्धामेव त्रातवान्। शक्तिश्चास्य न काचित्परहिंसाच
न काचिदित्येवमाहुः। तेषामनुमतमेव नाह बोधितानां पुनरप्युद्दात्मक जीवितम-
भिसन्धानानुप्रविष्टं शक्तिरस्येदिति। न च काकतालीयवृत्त्या शत्रुमुपदिशा-
ति तत्सिद्धं दयालक्षणो उत्साहोऽत्र प्रधानम्।

अन्ये तु व्यभिचारिणो यथायोगं भवति यथो-
क्तं तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्य इति अत एव निश्लेषत्वादनुभावाभाव इति
प्रत्युक्तम्। यदा तु पर्यन्तभूमिकान्तोहेतुभावाभावस्तदास्या प्रयोज्यत्वं रतिशोकादावपि
पर्यन्तदशायामप्रयोगस्यैव युक्तत्वात्। हृदयसंवादोऽपि तथाविध तत्त्वज्ञानबीजसं-
स्कारभावितानां भवत्येव यद्वक्ष्यति मोक्षे चापि विरागिण इति सर्वस्य[illegible]त्यत्र हृदय-
संवादं भयानके वीरप्रकृतेरभावात्

ननु तादृशि प्रयोगे वीरस्य क आस्वादः उच्यते।

यत्रायं निबध्यते तत्रावश्यं पुरुषार्थोपयोगिनि शृङ्गारवीराद्यन्यतमस्यैव तन्नि-
ष्ठत्वेषां आस्वादः यत्रापि प्रहसनादौ हास्यादेः प्रधानता तत्राप्यनुनिष्पादिरसा-
न्तरनिष्ठ एवास्वादोऽभिनयाभिनयादिकार्यं . . . धिकादेऽप्युद्दिष्टे दैवरूपकभेद-
चिन्तनं निमित्तमिति केचित्. तस्मादस्ति शान्तो रसः. तथा च चिरन्तनपुस्तकेषु
स्थायिभावान्रसत्वमुपनेष्यामः इत्यनन्तरं शान्तो नाम शमस्थायिभावात्मक इत्यादि
शान्तलक्षणं पठ्यते.

तत्र सर्वरसानां शान्तप्राय एवास्वादो न विषयेभ्यो
विपरिवृत्त्या तन्मुख्यतालाभात् केवलं वासनान्तरोपहित इत्यत्र सर्वप्रकृतित्वाभि-
धानाय पूर्वमभिधानं लोके च पृथक्पृथक् सामान्यस्य न गणनमिति स्थास्नुस्य
पृथग्युक्तसामान्यमपि तु विवेचकेन पृथगेव गणनीयमिति विवेचकाभिमतसामाजि-
कास्वादलक्षणप्रतीतिविषयतया सपृथग्भूत एव॥

इतिहासपुराणाभिधानकोशादौ च नवैव रसाः श्रूय-
न्ते. श्रीमत्सिद्धान्तशास्त्रेष्वपि. तथा चोक्तम्.

अष्टानामिह देवानां शृङ्गारादीन्प्रदर्शयेत्.
मध्ये च देवदेवस्य शान्तं रूपं प्रकल्पयेत्.

तस्य च वैराग्यसंसारभीरुतादयो विभावाः सहितैरुपनिबद्धैः विज्ञायन्ते. मोक्ष-
शास्त्रचिन्तादयोऽनुभावाः निर्वेदमतिस्मृतिधृत्यादयो व्यभिचारिणः. अत एवेश्व-
रप्रणिधानविषये भक्तिश्रद्धे स्मृतिमतिधृत्युत्साहाद्यनुप्रविष्टेभ्यः अन्यथैवाङ्गमिति
न तयोः पृथग्रसत्वेन गणनम्.

अत्र संग्रहकारिका =

मोक्षाध्यात्मनिमित्तः
तत्त्वज्ञानार्थहेतुसंयुक्तः॥
निश्रेयसधर्मयुतः
शान्तरसो नाम विज्ञेयः॥

विभावस्थाय्यनुभावयोगः क्रमाद्विशेषणत्रयेण दर्शितः॥

स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।
पुनर्निमित्तापाये तु शान्त एव प्रलीयते॥

इत्यादिना रसान्तरप्रकृतित्वमप्युपसंहृतम्.

यत्तु डिमे हास्यशृङ्गारपरिहारेण षड्रसत्वं च
लक्ष्यते तत्रायं भावो दीप्तरसकाव्ययोरिति भाविना लक्षणेन रौद्रप्राधान्ये तावद्डिमे
तद्विरुद्धस्य शान्तस्य संभावनैव न. किं निषेधेन. शान्तासंभवे तु दीप्तरसका-
व्ययोरित्येतेन किं व्यवच्छेद्यं शृङ्गारहास्यवर्ज्यं षड्रसयुक्त इति ह्युक्ते तत्र प्रस-
ङ्गः॥

ननु करुणबीभत्सभयानकप्राधान्यमनेन पादेन व्यवच्छे-
द्यते नैतत्सात्वत्यारभटीवृत्तिसम्पन्नेनैव तन्निरासात्. शान्ते तु सात्वत्यैव वृत्तिरि-
ति तद्व्यवच्छेदकमेवैतत्. तेन धीमल्लक्षणं प्रत्युत शान्तरसस्य सद्भावे लिङ्गम्.
शृङ्गारस्तु प्रसभसेव्यमानः संभाव्य एव तदङ्गं च हास्य इति तयोरेव प्रतिषेधः
कृतः प्राप्तत्वात्सर्वसाम्याच्च. विशेषतो वर्णदेवताभिधानमनुचितमप्यस्य तत्कल्पि-
तमिति ज्ञेयम्. उपपत्तिस्तु शान्तस्यापि दर्शितैव. सत्त्वाभावो हि हास्यः सठ-
विभावत्वेन चास्य वीरबीभत्सौ अत एवास्य रसस्य यमनियमे स्वरप्रणिधानादु-

पदेशोऽनुपयोगितया महाफलत्वं सर्वप्राधान्यमिति वृत्तव्यापकत्वं चोपपन्नमि-
त्यलमतिप्रसङ्गेन ॥

तत्त्वास्वादोऽस्य कीदृशः उच्यते, उपरागदायिभिः उत्साहरत्यादिभिः उपरक्तं यदात्मस्वरूपकएव विरलोद्भूतीतरत्नान्तराल निर्भासमानसिततरसूत्रं यदाह तत्स्वरूपं सकलेषु रत्यादिषूपरञ्जकेषु तथाभावेनापि सकृद्विभातोऽयमात्मेति न्यायेन भासमानं परोन्मुखतात्मसकलदुःखजालहीनं परमानन्दलाभसंविदेकत्वेन काव्यप्रयोगप्रबन्धाभ्यां साधारणतया निर्भासमानमन्तर्मुखावस्थाभेदेन लोकोत्तरानन्दानयनं तथाविधहृदयं निधत्त इति

एवं ते नवैव रसाः पुमर्थोपयोगित्वेन रञ्जनाधिक्येन वेयतामेवोपदेश्यत्वात्, तेन रसान्तरसंभवेऽपि पार्षतः प्रसिद्ध्या संख्यानियम इति यदन्यैरुक्तं तत्प्रत्युक्तम्, भावाध्यायेऽपि चैतद्वक्ष्यते, आर्द्रतास्थायिकः स्नेहो रस इति त्वसत्, स्नेहो ह्यभिषङ्गः स च सर्वो रत्युत्साहादावेव पर्यवस्यति ॥

तथाहि – बालस्य [illegible] तापित्रादौ स्नेहोदयेऽपि विश्रान्तः स्नेहो
सुतो मित्रजने रतौ लक्ष्मणादौ भ्रातरि धर्मवि[illegible] एव, एवं वृद्धस्य पुत्रादावपि वीति द्रष्टव्यम्, एषैव गन्धस्थायिकस्य लौल्यरसस्य प्रत्याख्याने सरणिर्मन्तव्या, हासे वा रतौ वान्यत्र पर्यवसानात्,

व व
एवं भक्तावपि . . . वाच्यमिति अध्यायार्थमुपसंहरन् भाविनोऽवकाशं ददत् सङ्गतिं प्रकटीकर्तुम् ह-[illegible]वमेते रसा ज्ञेया नवैतिरसवद्गीतमित्यादिव्यपदेशास्त्वयते मुख्या एवोपचारा इति दर्शयति ।

लक्षणलक्षणानीति भावनादिलक्षणं रसलक्षणमेव पूरयति विभावव्यभिचार्यनुभावलक्षणेन रसलक्षणमेव पूर्यते, रसेति स्थायिभावप्रभवः ऋतुमाल्यादिविभावतो येन चातुर्याद्यनुभावक इत्युक्तमपि साकाङ्क्षमेव कीदृशो हि रतिः, कश्च विभावः कश्चानुभावः, तेन यद्यप्यापाततो भावानां लक्षणमिदं प्रतिभाति महाचार्यो, तथापि वाक्यैकवाक्यतया रसलक्षणमेवेदमित्यपिशब्दस्यार्थ इति शिवम् ॥

क्त
इत्यादिशात्त्यष्टकमध्यवृत्तिः
यस्य स्वहृन्मण्डलसंप्रयोज्या ॥
स्थायी शिवश्चेतसि तेन वृत्तिः
कृता रसाध्याय इह क्रमेण ॥

इति माहेश्वराभिनवगुप्तविरचितायां नाट्यशास्त्रविवृतौ रसाध्यायः षष्ठः
समाप्तः ॥

Compared with original mss. [illegible]
31.12.17

Compared with the Mss of Mr. Govindadas of ~~[illegible]~~ Benares.

~~Transcribed from the Ms. of Mr. Ry.~~ Ampalakat ~~Karunakara menon of Chalapuram in 1917-18~~

Compared with a different ~~Calicut~~ of Ms obtained from Sr. Manavikrama Anujan Kunjunni Raja 31.12.17
Second Raja Calicut. [initials]
28.4.24